॥ श्रीः ॥

श्रीमदन्नम्भट्टविरचितः

तर्कसंग्रहः ॥

तस्य व्याख्या च

सुखप्रवेशिनी ॥

तर्कार्णव शिरोमणिना

(उत्तमूर्)

ति. वीरराघवाचार्येण

विरचिता

श्रीतञ्जापुरसन्निकृष्टपञ्चनदस्थे

श्रीनिवासमुद्रणालये

मुद्रिता ।

मूल्यम्] 1934 [रू १-०-०

भूमिका ॥

एकः—सखे सुन्दर ! क्षोदक्षमं सार्वभौमं ते पाण्डित्यमिति सन्तुष्यामि ।

अन्यः—किं भोः परिहासेन ? अधीतप्रायेऽपि तर्कशास्त्रे सन्ति शास्त्रान्तराणि सामग्र्येणाधिगन्तव्यानि, येषु मे सम्प्रति स्वल्प एव परिचयः ।

एकः—प्रकरणग्रन्थाः परिचिताः । इतस्ते कस्तत्र श्रमः । अस्माकं पुनरधीतमप्यनधीततुल्यम् ।

अन्यः—कथमेवमेकपदे सर्वथा जाड्यमभिनयसि ।

एकः—नायमभिनयः; यदस्ति तदुच्यते । यदि पुनर्नाटकादिपठनमेव नः कृत्यमभविष्यत् , नूनमयं क्लेशो न व्यज्ञास्यत । अलङ्कारग्रन्थाः पुना रसगङ्गाधरप्रभृतयः परीक्षार्थे परिक्लृप्तास्तर्कपद्धतिपरिष्कृता न बुद्धिमारोहन्ति ; न पठितुं शक्यन्ते ।

परः—सत्यमाह मित्रम् । विनैव काव्यानुवचनं सदा शास्त्रग्रन्थानेवाऽऽवर्तयतामपि प्रक्रियाभाग एव नः पाण्डित्यम् । मञ्जूषाभूषणसारादयस्तु तर्कसरणिमनुसरन्तः प्रायो दुरवगाहाः । का कथा व्युत्पत्तिवादविज्ञाने ।

अन्यः—ईदृशः श्रमो मीमांसाध्यायिनां न भवेदित्यालोचयामि ।

अपरः—वस्तुतस्तर्कशास्त्रे कियानपि प्रवेशो नःप्रवेशपरीक्षासमय एवावश्यकः। अन्यथा मीमांसापठनेऽप्यार्हन्ती न गण्यते । एवमप्यादरेणापठनादल्पमत्र ज्ञानं न भाट्टदीपिकादौ तर्कविद्भिरचिते धारणप्रवचनपर्यन्ताविघानाय प्रभवति । न तरां भाट्टरहस्ये ।

अन्यः—(इतरमवलोक्य) सखे ! किमेवमवनतमुखो जोषमासीनो ध्यानपर इव लक्ष्यसे ।

इतरः—किं ब्रह्म ध्यायामि । सुहृन्मणयो हृदयमुद्घाट्य शोचन्ति । अहं पुनरन्तर्विषण्णोऽस्मि । किं मे वक्तव्यमस्ति । एकतो मीमांसान्यायमेदुरेषु यत्र क्वचिद्व्याकरणस्पर्शिषु विशेषतस्तर्कनिकरपरिबृंहितेषु सिद्धिब्रह्मानन्दीयशतदूषणीन्यायसिद्धाञ्जनादिषु कथं नामानधीततर्कः पिपठिषामप्यधिगन्तुमलम् ।

अन्यः—किमेवं सर्वेऽप्येकमुखं भाषन्ते । सुहृन्मणयः ! यावद्यावत्तर्कशास्त्रग्रन्थे परिज्ञानम् , तावत्तावच्छास्त्रान्तरेषु सर्वत्र शोधनक्षमं शेमुषीप्रसरणमिति सत्यम् । अथापि मुक्तावलीपर्यन्तप्रकरणग्रन्थः प्रवेशतः प्रागेवाध्याप्यत इति कथं नु व एतावानायासः ?

इतरः—अध्याप्यते । अथापि सुखप्रवेशस्तत्र नेति तदात्वे बुद्धेः परिश्रमं दातुमनिच्छन्तः उपेक्षितवन्तः स्मः । तदिदं साम्प्रतं क्लेशे पर्यवसितम् ।

परः—तावान्परिश्रमस्तदैव चेत् क्रियते, किमिति तर्ककक्ष्याप्रवेशं परित्यक्ष्यामः । अधीते हि तर्के पश्चादश्रमेण सर्वमध्येतुं शक्यम् ।

अपरः—सत्यम् । अयमत्र क्लेशः । तर्कसंग्रहो हि प्रथममधीयते । स चेत् केवलं प्रतिपदार्थमात्रग्रहणेनाधीयते, नोपरि ग्रन्थेषु सुलभः प्रवेशः । अत एव शाब्दबोधपद्धतिमपि तत्राध्यापकाः प्रदर्शयन्ति । यदि तया पद्धत्याऽधीयते, तत्र न सकृच्छ्रवणमात्रेण सर्वं बुद्ध्यत इति चिन्तनाऽपेक्षिता । तत्राध्यापकेनोच्यमानमन्यादृशम् । चिन्तनागुरुसरणिरन्यादृशी । पुनः प्रश्ने पुनरध्यापको बुद्धिबलेनान्यथा वक्ति । तत्र न किञ्चित् प्रतिष्ठितं भवति । एवमशक्त्या तदा विरतोद्योगाः

पश्चाद्दीपिकामुक्तावल्यादिषु कथं पदमर्हान्ति ?

अन्यः—सह व्याख्यानेन संग्रह आवर्तनीयः ।

इतरः–सन्ति परं व्याख्याः । बोधप्रकारः कुत्रापि न सम्यगदर्शि । पट्टाभिरामादयस्तु क्वचिद्बहु वदन्ति । अन्यत्र जोषं गच्छन्ति । अपरत्र स्खलन्ति । न वा संपूर्णं बोधवर्णनं व्याख्यानं किञ्चिदस्तीति शृणुमः ।

एकः–श्रुतं मया साम्प्रतमेकं व्याख्यानं सुखप्रवेशिनी नाम प्रचारोन्मुखं, यत्रापेक्षितोंशः प्रायः सर्वः समस्तीति । अपि दृष्टं सुन्दर !

अन्यः–-इदमेवाहमप्यावेदयितुं प्रवृत्तः । प्रायेण हि प्रौढग्रन्थकारैः सर्वमपि शास्त्रं तर्कशास्त्रीकृतम् । तदस्याः सुखप्रवेशिन्याः सावधानमध्ययने सर्वत्रापेक्षिते सुखः प्रवेशो भवति । तन्मुखेनोत्साहेनाधीतान्यप्रकरणग्रन्थानां मीमांसावेदान्तसाहित्यव्याकरणादिषु तत्र तत्र सुखः प्रवेशः । तदिदं व्याख्यानं सुहृद्भिरादरेण ग्राह्यम् । अवश्यं च प्रचारं प्रापणीयम् ।

सर्वे—अहो ! भाग्यम् ! महान् लाभः ! तथैव करिष्यामः । सर्वमतः सम्पत्स्यते ।

———

शोधनिका ॥

पुट	पंक्तिः	
१	१०	एताः सकला
६	८	प्रवृत्तः आदौ
७	१९	शब्दार्थस्यामे
९	१८	विभागवाक्य
१२	२४	तात्मत्वरूप
१६	७	गन्धोऽस्या अ
१८	१६	प्रतियोगिनि चा
१९	१८	तावदिति ।
,,	२३	च्छीतजल
२१	२१	यार्थ आश्र
२४	१७	सर्वेषु अपि श
२६	१८	कालवृत्तीत्यर्थः
३०	१७	कारे जीवपदेनै
३२	१९	सुख
३९	२०-२१	स्वभिन्नसंख्या
५३	११	विशिष्टमुद्दिश्य
५६	७	कारणेऽव्याप्ति
५९	८	निष्ठसम्बन्धः
६०	२१	शब्दस्य सं
,,	२२	तद्विषयिताव
६१	२४	निष्ठश्रोत्र
६८	१८	कं च महानसाद्यवच्छि- [न्न वा य
७०	२२	विशिष्टमित्य
७१	१२	करणम्
७२	८	सतिसप्तमी
,,	२३	यश्च न मिथो
७६	१	महानसम्
,,	६	यत्प्रकारवि
,,	८	विशेष्यता
७९	१०	व्याप्यत्वान्य
८०	२४	निरूपण
८१	६	नुमानोपमानेति
८२	४	क्तप्रत्ययेन
८४	११	निर्धारणम्
८५	३	तने पद
८८	३	वैशिष्ट्यज्ञानं
९१	२४	स्मृतिरित्यादिना
९६	३	कुञ्चनम्
,,	५	सामान्यम्
९८	८	प्रतियोगिनो या
९९	१२	नाशेत्यादिर्व्य
१०२	१	श्यित्वं प्रयोजकत्वरूपं चतुर्थ्यर्थो

॥ श्रीः ॥

तर्कसंग्रहः ॥

सुखप्रवेशिनीसमेतः

निधाय हृदि विश्वेशं विधाय गुरुवन्दनम् ।
बालानां सुखबोधाय क्रियते तर्कसङ्ग्रहः ॥

सुखप्रवेशिनी ॥

श्रीशैलकृष्णमेघाय श्रितसर्वेष्टवर्षिणे ।
अनवद्याय कस्मैचिदस्मै श्रीनिधये नमः ॥ १ ॥

नमो लक्ष्मीहयास्याय शुद्धाय ब्रह्मरक्षिणे ।
कलाधिदेवता एताः सकला यत्कलाश्रिताः ॥ २ ॥

सन्त्येव संग्रहव्याख्या बह्व्यः संक्षिप्तविस्तृताः ।
सुखप्रवेशिनी सेयमुपकाराय भूयसे ॥ ३ ॥

लक्षणादिपरिष्कारा लक्षिता दीपिकादिभिः ।
अतोऽत्रावश्यविज्ञेयमादौ संगृह्य दर्श्यते ॥ ४ ॥

प्रौढग्रन्थेष्वनायासप्रवेशाऽऽधित्सया पुनः ।
प्रायशोऽत्र विपश्चिद्भिर्बोधवादः प्रशस्यते ॥ ५ ॥

प्राज्ञानां बुद्धिवैचित्र्याद्भिन्ना बोधोक्तिपद्धतिः ।
वैयाकुलीं विसृज्यादौ बालैराद्रियतामियम् ॥ ६ ॥

यदि क्वचन यत्किञ्चिदन्यथेतीह भाव्यते ।
क्रमेण शोध्यतां नाम को न गच्छन् स्खलत्पदः ॥ ७ ॥

प्रारम्भे संग्रहः पाठ्यो बालैः प्रायेण काव्यवत् ।
अथेयं टिप्पणी धार्या सुधीभिरनसूयुभिः ॥ ८ ॥

तत्रभवानन्नंभट्टस्तर्कशास्त्रप्रमेयं न्यायवैशेषिकनिष्णातनिपुणमतिनिर्धारितं निरूपयितुं प्रवृत्तो यथाचारं मङ्गलमारचयन् चिकीर्षितं प्रतिजानीते **निधायेति** । प्रेक्षावत्प्रवृत्त्युपयोग्यनुबन्धिचतुष्टयमुत्तरार्धे दर्शितम् । **बालानामि**त्यधिकारी । **सुखबोधायेति** प्रयोजनम् । **तर्के**ति विषयः । **संग्रह** इति प्रतिपाद्यप्रतिपादकभावः सम्बन्ध इति ।

अथ शाब्दबोधप्रक्रियावगमसौकर्यायायमत्यल्प उपोद्घातः क्रियते । १. एकैकस्मिन्नपि पदे प्रकृतिप्रत्ययविभागेनाप्यर्थो विवेचनीयः । २. तत्र प्रत्ययस्य सोऽर्थो वक्तव्यः, योऽर्थ उत्तरत्राश्रयतासम्बन्धेनान्वियात्, यस्मिंश्चार्थे प्रकृत्यर्थः प्रायो निरूपितत्वसम्बन्धेन । यथा भूतले घट इत्यत्राधेयत्वं सप्तम्यर्थ इत्येवम् । ३. तथा समस्तपदेषु विगृह्यार्था विवेक्तव्याः। तत्र विग्रहार्था बुद्धिवैशद्यमात्रोपयोगिनस्तत्पुरुषादौ । लक्षणया प्रतिपाद्यमानः समासार्थ एव शाब्दबोधाकारे प्रविष्टः । यत्र तु समासे न लक्षणा, तत्र विग्रहार्थसमासार्थयोर्न वैलक्षण्यम् । तत्र तत्पुरुषे प्रायः पूर्वपदे लक्षणा । बहुव्रीहौ च पूर्वपदं तात्पर्यग्राहकम् उत्तरपदे लक्षणा । लक्ष्यश्चार्थस्तत्पुरुषे, पूर्वपदस्य विग्रहे प्रत्ययान्तस्य योऽर्थस्तदाश्रयपर्यन्तः । यथा राजपुरुष इत्यत्र राजपदस्य राज्ञः पुरुष इति विग्रहात् राजस्वत्वाश्रयपर्यन्तो लक्ष्यः । तस्याभेदसम्बन्धेन पुरुषेऽन्वयः । बहुव्रीहौ च समस्तपदस्य यत्पदविशेषणत्वम् , तत्पदार्थेऽभेदान्वययोग्योऽर्थो लक्ष्यः । यथा पीताम्बरो हरिरित्यत्राम्बरपदस्य पीतरूपवदम्बरविशिष्टोऽर्थः । ४. तथा

समानाधिकरणप्रयोगे विशेषणविभक्तीनामभेद एवार्थः; अथ वा निरर्थकत्वमेव। अभेदसम्बन्धेन विशेषणस्य विशेष्येऽन्वयः। ५. एवं सर्वत्र प्रथमान्तपदार्थस्यैव शाब्दबोधे मुख्यविशेष्यत्वम्। क्वचिदेव त्वन्यथा। ६. एवं बोधे सम्बन्धविधया भासमानानामपि बोधाकारलेखने प्रकारविधया प्रदर्शनं व्युत्पादनसौकर्याय। ७. तथा आधेयता अधिकरणतेत्यादिराधेयाधिकरणादिनिष्ठो धर्मः। तत्राधेयताधिकरणतयोः, प्रतियोगितानुयोगितयोः, विशेष्यताप्रकारतयोः, विशेष्यतासंसर्गतयोः, संसर्गताप्रकारतयोः, प्रकारताप्रकारितयोः, विशेष्यताविशेष्यितयोः, संसर्गतासंसर्गितयोः, विषयताविषयितयोः, अवच्छेदकताऽवच्छिन्नतयोरेवञ्जातीययोर्मिथः सापेक्षधर्मयोर्निरूप्यनिरूपकभावः। आधेयतानिरूपिताऽधिकरणता, अधिकरणतानिरूपिता आधेयतेत्येवम्। विशेष्यिताप्रकारितयोः प्रकारितासंसर्गितयोरेवंविधयोर्धर्मयोर्मिथोऽवच्छेद्यावच्छेदकभावः। विशेष्यित्वावच्छिन्ना प्रकारिता, प्रकारित्वावच्छिन्ना विशेष्यितेत्येवम्। तत्र धर्मयोरेकनिष्ठत्वेऽवच्छेद्यावच्छेदकभावः, भिन्ननिष्ठत्वे च निरूप्यनिरूपकभावः। विशेष्यित्वं हि ज्ञाननिष्ठं, प्रकारित्वादिकमपि। आधेयत्वन्यत् अधिकरणं चेतरदिति। एवं यथाऽऽधेयतानिरूपिताधिकरणता भवति, तथाऽऽधेयनिरूपिताऽपि। आधेयं चाधिकरणतां प्रति निरूपकम्। एवमधिकरणनिरूपिताऽऽधेयता, आधेयतानिरूपकमधिकरणम्। एवमन्यत्र। अत्र न परस्परनिरूप्यनिरूपकभावः। अपि त्वाधेयत्वादिधर्मस्य निरूपितत्वम्। अधिकरणादिपदार्थस्य निरूपकत्वमेवेति। ८. एवमाधेयतादीनामुक्तधर्माणां तत्र तत्रावच्छेदकमपि किञ्चिद्भवति। यद्धर्मपुरस्कारेण वस्तुन्याधेयत्वादिकं गृह्येत, स धर्मस्तत्राधेयतादावच्छेदकः। यथा घट आधेय इत्युक्तौ घटत्वपुरस्कारेण घट आधेयता गृह्यत इति घटत्वमाधेयतावच्छेदकम्, घटत्वेनावच्छिन्नाऽऽधेयतेत्यादिकमवहितचित्तैस्तत्र तत्र विज्ञेयमिति॥

निधायेत्यादि । विश्वस्येशं विश्वेशम् । ईशो नियन्ता नियमनाश्रयः । नियमनमिच्छाविशेषः । षष्ठ्या विषयित्वमर्थः । तत्र विश्वपदार्थस्य निरूपितत्वसम्बन्धेनान्वयः । अथ तस्याश्रयतासम्बन्धेन नियमने । तथा च विश्वनिरूपितविषयिताश्रयनियमनाश्रयमिति विग्रहार्थः । तत्पुरुषसमासत्वाच्चात्र पूर्वपदस्य विश्वनिरूपितविषयितावदिति लक्षणयाऽर्थः ; विश्वविषयकमिति यावत् । तस्याभेदसम्बन्धेन नियमनेऽन्वयः । विश्वविषयकाभिन्ननियमनाश्रयमिति विशिष्टार्थः । द्वितीयार्थो विशेष्यित्वं निधायेति धात्वर्थेऽन्वेति । तस्य निपूर्वकधाञ्धातोराधेयत्वप्रकारकारोपोऽर्थः । हृदीति सप्तम्यर्थो निरूपितत्वम् । हृत्पदार्थस्य हृदयस्य निरूपितत्वसम्बन्धेन निरूपितत्वेऽन्वयः । निरूपितत्वमपि हृदयमादायैव निरूपणीयम् । सप्तम्यर्थस्य धात्वर्थैकदेशे आधेयत्वे । तथा च विश्वेशनिरूपितविशेष्यित्वाश्रय, हृदयनिरूपितनिरूपितत्वाश्रयाधेयत्वप्रकारकारोपेति विशिष्टार्थः । अथ वा हृदि निधाय मनसिकृत्य मनोजन्यबुद्धौ विषयीकृत्य । ज्ञानसामान्यस्य मनोजन्यत्वेऽपि हृदीत्यभिधानं विषयान्तरतो निरुद्धेन विशुद्धेन मनसोत्पाद्यत्वाभिप्रायेण । अत एव ग्रन्थकारेणैव दीपिकायां 'तद्ध्यानपरो भूत्वे' त्युक्तम् । तथा च हृच्छब्दो विषयान्तरासंवलितचिन्तनरूपज्ञानविशेषलाक्षणिकः । निधायेति धातोर्विषयीकरणं विषयतानुकूलव्यापारोऽर्थः । निरूपितत्वमेव सप्तम्यर्थः । अस्य विश्वेशमिति द्वितीयार्थाधेयत्वस्य च विषयतायामन्वयः । तथा च विश्वेशनिरूपिताधेयताश्रय,ज्ञानविशेषनिरूपितनिरूपितत्वाश्रय, विषयतानुकूलव्यापारेति विशिष्टार्थः । ल्यप उत्तरकालिकत्वमर्थः । धात्वर्थस्य तत्र निरूपितत्वसम्बन्धेनान्वयः । तस्य च क्रियत इति कृतावाश्रयतासम्बन्धेन ।

विधाय गुरुवन्दनम् । गुरोर्वन्दनम् गुरुस्स्वस्मादुत्कृष्ट इति ज्ञा-

नानुकूलो व्यापारः । अतो वन्दनं स्वावधिकोत्कृष्टत्वप्रकारकज्ञानानुकूलव्यापारः । गुरोरिति षष्ठ्यर्थो विशेष्यित्वं वन्दनपदार्थैकदेशे ज्ञानेऽन्वेति । समासत्वात्तु गुरुपदं गुरुविशेष्यके लाक्षणिकम् । तस्याभेदेन ज्ञानेऽन्वयः । ये त्वेतादृशस्थले एकदेशान्वयं न स्वीकुर्वन्ति, तैर्गादाधरः पञ्चलक्षण्यादिग्रन्थः परिशीलनीयः । वन्दनमिति द्वितीयार्थो विषयित्वं विधायेति धात्वर्थेऽन्वेति । विधानं कृतिः । ल्यबर्थादिकं पूर्ववत् ।

सुखबोधाय बालानाम् । बालाः प्रकृतज्ञानकामत्वेऽपि क्लेशासहिष्णवः । षष्ठ्यर्थः समवेतत्वम् ; बोधान्वयि । सुखेन बोधः सुखबोधः । तृतीयेति योगविभागाद्वा 'कर्तृकरणे कृता बहुलम्' इति बहुलग्रहणाद्वा समासः । यद्वा सुखसाहितो बोधः सुखबोधः । अथ वा सुखो बोधः सुखबोधः । सुखपदमक्लेशविशिष्टपरम् । बाला हि लोके क्लेशसाध्ये कार्ये न प्रवर्तेरन् । अतः प्रकृते बोधे क्लेशः पूर्वं नापेक्षितः । अक्लेशे स्थित एव बोधः स्वयंभवतीत्युच्यते सुखबोधेत्यनेन । बोधो ज्ञानम् । उद्देश्यित्वं चतुर्थ्यर्थः कृत्यन्वयि । क्रियत इत्यत्र यकः कर्मत्वं प्रकृते विषयत्वमर्थः । कृतेस्तत्रान्वयः । तस्य च तर्कसंग्रहपदार्थे । कर्त्राकांक्षायां मयेत्यध्याहार्यम् । अयमस्मच्छब्दोऽन्नम्भट्टार्थकः । समवेतत्वं तृतीयार्थः कृत्यन्वयि । **तर्कसंग्रह**पदस्य तर्क्यन्ते प्रतिपाद्यन्त इति तर्काः पदार्थास्तेषां संग्रहः संक्षेपेण कथनम् संकुचितज्ञानजनकशब्दप्रयोगः । तथा च तर्कविषयकाभिन्नसंकुचितज्ञानजनकशब्दप्रयोग इति विशिष्टार्थः । तर्कपदस्य हि तर्कविषयके लक्षणा ; तस्य च ज्ञानेऽभेदेनान्वय इति । एवंरूपत्वादेवास्य ग्रन्थस्य तर्कसंग्रह इति नाम । अत्र चेदं पदं ग्रन्थकृत्सङ्केतवशाद्योगरूढ्या विलक्षणानुपूर्वीकप्रकृतग्रन्थपरम् ।

तथा चायमखण्डवाक्यार्थबोधः—विश्वविषयकाभिन्ननियमनाश्रयनि-

द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्त पदार्थाः ।

रूपिताधेयताश्रय, ज्ञानविशेषनिरूपितनिरूपितत्वाश्रय, विषयत्वानुकूलव्यापारनिरूपितोत्तरकालिकत्वाश्रय, गुरुविशेष्यकाभिन्न- स्वावधिकोत्कर्षप्रकारकज्ञानानुकूलव्यापारनिरूपितविषयित्वाश्रयकृतिनिरूपितोत्तरकालिकत्वाश्रय, क्लेशासहिष्णु (प्रकृतज्ञानकाम) निरूपितसमवेतत्वाश्रयाक्लेशविशिष्टाभिन्नज्ञाननिरूपितोद्देशियित्वाश्रय, (अन्नम्भट्टनिरूपितसमवेतत्वाश्रय) कृतिनिरूपितविषयत्वाश्रयस्तर्कसंग्रहग्रन्थ इति ।

एवं पदार्थानां संग्रहे प्रवृत्तं आदौ तान् सप्तधा विभजते द्रव्येति । ननु 'सामान्यवचनं पूर्वं विशेषस्य ततः पर' मिति न्यायात् पदार्थसामान्यलक्षणं प्रागभिधाय पश्चाद्विभागवचनमेव युक्तम् । न हि पशुस्वरूपमेवाजानतः कतिविधः पशुरिति जिज्ञासा सम्भवति । अतो विभागजिज्ञासाभावात् तद्वचनं न युक्तमिति चेत् सत्यम् ; तथाऽपि तर्कसंग्रह इत्यत्र तर्कपदार्थपरिशीलनेन तर्क्यमाणत्वं प्रतिपाद्यमानत्वमित्येवंरूपं वा तर्कसंग्रहः क्रियत इति वाक्यश्रवणेन प्रकृतग्रन्थप्रतिपाद्यमानत्वरूपं वा सामान्यं गृहीतमासीदिति विभागवचनं युक्तम् । यद्यप्युत्तरत्र द्रव्यादिविभागस्थले कथं सामान्यलक्षणमनभिधाय तद्वचनमिति शङ्कायामियं परिहारगमनिका न भविष्यति ; तथाऽपि द्रव्यगुणकर्मेत्येवमासेन प्रयुक्तत्वात् द्रव्यादिपदस्य प्रवृत्तिनिमित्तमितरव्यावृत्तं किमपि किमपि स्यादेवेत्येवं शिष्यस्य ज्ञानसम्भवात् तथाभूतसामान्यधर्मज्ञानमेव विभागवचने पर्याप्तम् । अन्यादृशलक्षणं तु यावत् लक्ष्येयत्ताज्ञानं न भवति तावत् न शक्यं सम्यग्ज्ञातुमित्यभिप्रेत्य विभागारम्भ इति द्रष्टव्यम् । पदार्था इति । पदस्य अर्थः पदार्थः अर्थोऽभिधाविषयः शक्तिविषयः । विग्रहे पदस्येति षष्ठ्यर्थ आधेयत्वं शक्तावन्वेति । केन सम्बन्धेनाधेयत्वमिति त्वन्य-

त् । समासे च पदशब्दस्य पदगतेति लक्षणयाऽर्थः पदगताभिन्नशक्तिविषय इति पदार्थशब्दार्थः । पदार्थाः पदगतशक्तिविषयाः, वाच्या इति यावदित्यलम् ।

अत्र केचिदित्थं बोधं वर्णयन्ति । द्रव्यादिपदानि द्रव्यत्वादिपराणि । सप्तेत्यस्य सप्तविधाः सप्तविभाजकधर्मवन्त इत्यर्थः । विभाजकधर्मेत्यत्र द्रव्यत्वादीनामभेदेनान्वयः । सप्तेति विभक्त्यर्थश्चाभेद एव । तथा च पदार्था द्रव्यत्वगुणत्वकर्मत्वसामान्यत्वविशेषत्वसमवायत्वाभावत्वाभिन्नसप्तविभाजकधर्मवदभिन्ना इति । नैतद्युक्तम् ; द्रव्यादिपदानां लक्षणाकल्पनस्य क्लिष्टत्वात् । एवं लक्षणयार्थबोधनमपेक्ष्य शक्त्या तद्बोधनस्य न्याय्यतया, द्रव्यत्वगुणत्व.... ....भावत्वानि सप्तपदार्था इति यदि प्रयोगः क्रियेत, स साधुः स्यात् । यद्यप्येवमापत्तिं केचित् स्थलान्तरे स्वयमेवोद्भाव्य, विभागवाक्येषु धर्मिवाचकधर्मलाक्षणिकशब्दप्रयोगे सत्येव बोधोऽन्यथा नेति नियमः कल्प्यत इति समादधुः ; अथापि नावाचकं प्रयोक्तव्यमिति न्यायविरुद्धं लाक्षणिकमेव प्रयोक्तव्यमिति नियमकल्पनं न हृदयङ्गमम् । अतो द्रव्यादिपदे लक्षणाङ्गीकारे सप्तपदे लक्षणां विनैव पदार्था इत्यस्य पदार्थविभाजकधर्मा इत्यर्थं स्वीकृत्य द्रव्यत्वाद्यभिन्नाः सप्त पदार्थविभाजकधर्मा इति बोधवर्णनमितः साधीयः ।

अन्ये पुनः, इति सप्त पदार्था इति इतिशब्दमध्याहृत्य सप्तपदस्य सप्तविधार्थकतया तद्घटकविधापदार्थविभाजकधर्मेष्वितिशब्दस्याभेदेनान्वयः । इतिशब्दार्थः प्रकारः, द्रव्यादिपदयथाश्रुतार्थस्य चेतिशब्दार्थे आधेयतासम्बन्धेन । द्रव्यादिवृत्तिप्रकारश्च द्रव्यत्वादिरूप इति सम्भवत्यभेदः । तथा च द्रव्यादिनिष्ठप्रकाराभिन्नसप्तविभाजकधर्मवदभिन्नाः पदार्था इति बोधं मन्यन्ते । तदपि न रुचिरम् ; इतिशब्दार्थस्य प्रकारस्योत्तरपदार्थेऽभेदेना-

न्वयस्यादर्शनात् । घट इति द्रव्यमिति हि प्रयुज्यते, न पुनर्घट इति जातिरिति । तत्र च घटनिष्ठप्रकारविशिष्टं द्रव्यमिति बोधः । उक्तं च कैश्चिदन्यत्र 'अव्ययनिपातातिरिक्तनामार्थस्यैव नामार्थेऽभेदसम्बन्धेनान्वयस्य व्युत्पत्तिसिद्धत्वा' दिति । अतो यदि इतिशब्दाध्याहारः, तर्हीतिशब्दस्य हेतुपरतया प्रयोज्यत्वमर्थमङ्गीकृत्य द्रव्यगुणकर्माद्यभेदप्रयोज्यसप्तविधत्वविशिष्टाभिन्नाः पदार्था इत्येवञ्जातीयकबोधस्वीकारः श्रेयान् । किञ्चैवं 'द्रव्यगुणकर्मसामान्यविशेषसमवायानां षण्णां पदार्थाना' मिति कणादसूत्रभाष्ये कथं बोधः । न हि तत्रेतिशब्दाध्याहारः सम्भवति । समवायानामित्यस्याप्रथमान्तत्वात् । तत्र पदार्थानामित्यत्रैवाभेदसम्बन्धेनान्वय इति चेत् अत्रापि तथैवास्तु, अविशेषात् । अध्याहारं विनैवोपपत्तौ तस्यायुक्तत्वाच्च ।

ननु पदार्थानां सप्तत्वपर्याप्त्यधिकरणत्वं न सम्भवति, तेषामनन्तत्वात् । अतः सप्तपदस्य सप्तविधा इत्येवार्थः । तत्र च विधेत्यनेन केषां विभाजकधर्माणां ग्रहणमिति जिज्ञासायां द्रव्यत्वादिरूपधर्माणामिति लाभार्थं द्रव्यगुणेति पदं प्रयुक्तम् । तदत्र यदि तत्पदार्थस्य विधेत्यत्रान्वयो न स्वीक्रियते कथं तर्हि जिज्ञासाशान्तिरिति चेत्; पदार्थानामनन्तत्वादन्वयासम्भवात्, सप्तपदस्य सप्तविधा इत्यर्थः कामं स्वीक्रियताम् । अथापि न द्रव्यगुणेऽति द्रव्यत्वगुणत्वादिपरत्वं, किं तु यथाश्रुतार्थकत्वमेव । तस्य च पदार्थशब्दार्थ एवान्वयः, न सप्तपदार्थैकदेशे । तथाच द्रव्यत्वादिविशिष्टाभिन्नाः सप्तविधाभिन्नाः पदार्था इत्येव बोधः । एवञ्च 'अरुणयैकहायन्या सोमं क्रीणाती'त्यत्रारुणापदार्थ एकहायनीपदार्थश्च पृथक्पृथक्क्रियायामेवान्वेतीति वादिनां मते अरुणया क्रीणाति, एकहायन्या क्रीणातीत्येवार्थलाभात् या एकहायनी सैवारुणेति कथं ज्ञायते अरुणापदेनान्यस्यापि ग्रहणसंभवादिति शङ्कायां यथा अरुणयैकहायन्या क्रीणातीत्येकवाक्योपादानबलात्सन्निहिते-

कहायन्या एवारुण्यमिति बुद्ध्यत इति निर्वाहः, तथात्राप्येकवाक्योपादानबलाद्धे द्रव्यत्वादयस्त एव सप्त विधा इत्यत्र विभाजकधर्मा इति बुद्ध्यत इति निर्वाहः कार्य इति जिज्ञासाशान्तिसिद्धिः । एवं शाब्दबोधे भानमस्वीकृत्यार्थसिद्धिर्बहुलं सर्वैरङ्गीक्रियत इति भाट्टरहस्यादौ व्यक्तम् ।

ननु द्रव्याद्यभिन्नत्वस्य सप्तविधाभिन्नत्वस्य च यदि पदार्था इत्यत्रान्वयः, तर्हि पदार्थोद्देशेनोभयविधानमिति सिद्ध्यति। विधेयानेकत्वे च वाक्यभेदो दोष इत्याहुः । स इह स्यादिति चेन्न ; न ह्युभयोरेकत्रान्वयमात्रेण वाक्यभेदः । किन्तु विधेयमज्ञाततया ज्ञापनीयं यत्रानेकं तत्र वाक्यभेदः । अत्र तु द्रव्याद्यभेदस्य पदार्थेष्वन्वये तावतैव सप्तविधत्वं ज्ञायत इति सप्तत्वस्यानुवादत्वमिति न दोषः । ननु द्रव्याद्यभेदान्वये द्रव्यत्वादयः सप्त धर्मा इत्येतावत् ज्ञायते । ते विभाजकधर्मा इति न ज्ञायते । अतः सप्तविधत्वमपि विधेयमिति चेत्, सप्तपदस्य सप्तविधेत्यर्थः कथं ज्ञायते, अन्यथाऽपि यत्किञ्चिदबाधितार्थवर्णनसम्भवात् । यदि द्रव्यत्वादीनां विभाजकधर्मत्वौचित्यपर्यालोचनया सोऽर्थो ज्ञायत इत्युच्यते, तर्हि सप्तशब्दार्थनिर्धारणात् प्रागेव तेषां विभाजकधर्मत्वं ज्ञातमिति सप्तविधत्वं न विधेयम् । किं च संख्यावाचिपदनिर्देशं विनापि विभागवाक्यलेखनं बहुलं दृश्यते । तत्र विभाजकधर्मत्वबोधः कथम् ? तत्रोद्देश्यवाचकपदस्यैव तद्विभाजकधर्मवत्पर्यन्तलाक्षणिकत्वादिति चेत् तर्हि सर्वत्र विभाजकवाक्य ऐकरूप्याय पदार्थशब्दस्यैव पदार्थविभाजकधर्मवन्त इत्यर्थोऽस्तु । एवं च सप्तपदं सप्तत्वविशिष्टार्थकमेव । न च तेषामनन्तत्वात् सप्तत्वविशिष्टाभिन्नत्वं बाधितमिति वाच्यम् , पदार्थशब्दार्थैकदेशे विभाजकधर्म एव तदन्वयस्वीकारात् । अथवा 'सविशेषणे हि विधिनिषेधौ सति विशेष्ये बाधे विशेषणमुपसंक्रामत' इति न्यायेन विभाजकधर्मेषु सप्तत्वे तात्पर्यपर्यवसानसम्भवेनेदृशस्थले

विशिष्टेऽन्वयो न बाधित इति । अथ वा पदार्था द्रव्याद्यभिन्ना इत्येतावताऽपि विभागपरता वाक्यस्य लभ्यत एव । तथा हि—पर्यायशब्दप्रयोगायोगात् द्वन्द्वादिबलाच्च द्रव्यगुणादीनां परस्परभेदावगमे सति द्रव्यत्वादीनां परस्परासामानाधिकरण्यं प्रतीयते । पदार्थेषु परस्परविभिन्नबहुभेदोक्त्या पदार्थत्वव्याप्यत्वं द्रव्यत्वादौ सिद्ध्यति । पदार्थत्वरूपोद्देश्यतावच्छेदकव्यापकत्वस्य विधेये भानाच्चैषां धर्माणां यावत्त्वं बुद्ध्यत इति समभिव्याहृतपदार्थतावच्छेदकव्याप्यपरस्पराऽसमानाधिकरणयावद्धर्मवचनरूपविभागपरत्वं सुगमम् । अतः पदार्थपदं न पदार्थविभाजकधर्मवत्परम् । सप्तपदस्य तु सप्तत्वविशिष्टार्थकत्वेऽनन्वयश्चेत् सप्तविधार्थकत्वं काममस्तु । अथापि न तस्य विधेयत्वम्, प्राप्तत्वात् ।

यद्वा सप्तपदमपि सप्तत्वविशिष्टार्थकमेव । द्रव्यत्वविशिष्टगुणत्वविशिष्टाद्यभिन्नपदार्थेषु सप्तत्वविशिष्टाभेदान्वयः । सविशेषणेहीति पूर्वोक्तन्यायेन द्रव्यत्वादीनामेव सप्तत्वे तात्पर्यम् । तथा च यथा 'रामः कृतधनुर्भङ्गः पर्यणैषीद्विदेहजाम्' इत्युक्तौ कृतधनुर्भङ्गस्सन् पर्यणैषीदित्यर्थे सति कृतधनुर्भङ्गत्वविशिष्टमुद्दिश्य परिणयकर्तृत्वविधानेऽपि कृतधनुर्भङ्गत्वस्याप्यर्थाद्विधानम्, तद्वत् पदार्था द्रव्यादयः सन्तस्सप्तेति द्रव्याद्यभिन्नत्वविशिष्टपदार्थोद्देशेन सप्ताभिन्नत्वविधानेऽप्यर्थात्सिद्धवन्निर्देशबलात् द्रव्याद्यभिन्नत्वविधानं भवति । एवञ्च द्रव्याद्यभेदात् सप्त पदार्था इत्यत्रेवात्रापि सप्तत्ववैशिष्ट्यं प्रति द्रव्याद्यभिन्नत्वस्य प्रयोजकत्वमपि लभ्यते । उद्देश्यविधेयभावस्थलेऽसति बाधके विधेयप्रयोजकत्वमुद्देश्यतावच्छेदके लभ्यत इत्यानुभविकं यथा धनवान् सुखीत्यत्र ।

ननु द्रव्यादिपदार्थान्वय एव सप्तशब्दार्थस्य भवतु । तथा च द्रव्यत्वादीनां सप्तत्वं सुग्रहमिति चेत् सत्यम् । अथापि सप्तेति निर्देश-

बलादष्टमः पदार्थो नास्तीति ज्ञापितं भवति । तच्च ज्ञापनं पदार्थशब्दार्थेनान्वय एव स्वरसम् । अतो द्रव्यादिभेदात् सप्त पदार्था इति वाक्य इव तदन्वयो युक्त इति ।

अथ वा द्रव्येत्यादि सप्तपदविशेषणम् । पदार्था इति सप्तपदविशेष्यम् । पदार्थेषु सप्तत्वबाधे सप्तविधा इत्यर्थोऽस्तु । तथा च द्रव्याद्यभिन्नसप्तविधाभिन्नाः पदार्था इति बोधः । वस्तुतस्तु अत्र सप्तत्वं न संख्यारूपम् । गुणादौ तदभावात् । अतोऽपेक्षाबुद्धिविशेषविषयत्वरूपम् । अपेक्षाबुद्धिविशेषश्च द्रव्यमेकं गुण एकः कर्मैकम्—अभाव एक इत्यात्मकः । अत्र चैकत्वस्य स्वाश्रयसमभिव्याहृतपदार्थतावच्छेदकवत्त्वसम्बन्धेन द्रव्यादावन्वयः । एकत्वं च समवाये वक्ष्यमाणम् । तथा चेदृशापेक्षाबुद्धिविशेष्यत्वं द्रव्यादीनामेवास्तीति न तेषु सप्तत्वासम्भवः । एवं च सप्तपदार्थे सप्तत्वविशिष्टे द्रव्यादिपदार्थस्याभेदेनान्वयः, तस्य च पदार्थशब्दार्थ इति पदार्था द्रव्यत्वाविशिष्टाद्यभिन्नसप्तत्वविशिष्टाभिन्ना इति बोधः ।

ननु द्रव्यादिसर्वाभिन्नत्वं कस्मिन् पदार्थे सम्भवति । न हि द्रव्ये गुणाद्यभिन्नत्वम् । एवं गुणादावपि न द्रव्याद्यभिन्नत्वम् । अतो द्रव्येत्यादिपदं द्रव्याद्यन्यतमलाक्षणिकमिति चेत्; क एवमाह एकैकस्य सर्वाभिन्नत्वमिति । किं तु विशेषणविभक्त्यर्थोऽभेदः । स चासाधारणधर्मः । तत्र विभक्त्युपात्तेष्वसाधारणधर्मेषु यस्मिन्नसाधारणधर्मे द्रव्यादिषु मध्ये यस्यान्वयो भवितुमर्हति, तस्यान्वयः । एवमेकैकस्मिन्नसाधारणधर्मे एकैकव्यक्त्यन्वये सति अनन्तरं तस्य तस्यासाधारणधर्मस्य पदार्थशब्दार्थव्यक्तिषु वा सप्तशब्दार्थव्यक्तिषु वा यत्र यत्रान्वय उचितस्तत्र तत्रान्वय इति न कश्चिद्दोषः । यथा घटा नीला इत्युक्तौ विभक्त्यर्थाभेदेष्वसाधारणधर्मेषु

तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव ।
रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापर-त्वगुरुत्वद्रवत्वस्नेहशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराः

यथायोगं तत्तन्नीलव्यक्तीनामन्वये तेषां यथासम्भवं घटव्यक्तिष्वन्वयः । न हि तत्र घटपदस्य घटान्यतमे वा नीलपदस्य नीलान्यतमे वा लक्षणा कैश्चिदुक्तास्ति । तद्वत् । इयानेव भेदः । तत्र विभक्त्यर्थेऽभेदेऽन्वयिनः पदार्था नीलत्वपुरस्कारेणैकेन पदेनोपात्ताः । अत्र तु द्रव्यपदादिना भिन्नभिन्नेनेति । स च भेदोऽकिञ्चित्करः । न खलु धवखदिरावित्यादौ द्वन्द्व ईदृशानुपपत्तिः कुत्रापि प्रदर्शिता । न च द्रव्यादिपदे लक्षणाभावेऽपि सप्तपदेऽन्यतमलक्षणाऽऽवश्यकी सप्तत्वपर्याप्त्यधिकरणधर्मवतः कस्यचिदसम्भवादिति वाच्यम् । सप्तत्वपर्याप्त्युपलक्षितधर्मवत्त्वस्य प्रत्येकं सम्भवेन तत्रापि लक्षणां विनैव निर्वाहादिति ।

तथा च पदार्था द्रव्याद्यभिन्नास्सप्ताभिन्ना इति, द्रव्याद्यभिन्नपदार्थाः सप्ताभिन्ना इति, पदार्था द्रव्याद्यभिन्नसप्ताभिन्ना इति वा बोधः ।

एवं पदार्थसामान्यं विभज्यावान्तरविभागं दर्शयति तत्रेत्यादिना । तच्छब्दार्था द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः । त्रलो घटकत्वमर्थः । द्रव्याणीत्यत्र गुणादिविभागप्रतिपादकवाक्यस्थगुणादिपदार्थेषु चान्वेति । एवकारोऽन्ययोगव्यवच्छेदार्थः, यथा गोविन्दः पण्डितो भवति विनीतश्च, गोपालस्तु पण्डित एवेत्यादौ । तथा च नवत्वातिरिक्तसंख्यापर्याप्त्यधिकरणविभाजकधर्मशून्यत्वं तदर्थः द्रव्यान्वयि । न चात्मस्थाने परो जीवश्चेति द्वेधा विभज्य दशद्रव्यगणनसम्भवात् कथमीदृशधर्मशून्यत्वमिति वाच्यम् । नवत्वातिरिक्तसंख्यापर्याप्त्यधिकरणभूता ये प्रकृतविभाजकधर्मासमानाधिकरणधर्मसहिता विभाजकधर्मास्तच्छून्यत्वमिति विवक्षितत्वात् । परत्वजीवत्वयोश्च प्रकृतात्मत्वरूपविभाजकधर्मसमानाधिकरणत्वमेवेति । तथा च

श्चतुर्विंशतिर्गुणाः । उत्क्षेपणावक्षेपणाकुञ्चनप्रसारणगमनानि पञ्च कर्माणि । परमपरं चेति द्विविधं सामान्यम् ।

नवत्वातिरिक्तसंख्यापर्याप्त्यनधिकरणविभाजकधर्मवत्त्वमेवकारार्थ इति सिद्ध्यति । यद्वा नवत्वपर्याप्त्ययोगव्यवच्छेदस्तदर्थः । अथ वा स्वसमभिव्याहृतपदार्थस्य यत्पदार्थेन सम्बन्धस्तद्व्यापकत्वमेवकारार्थः । अत्र समभिव्याहृतपदं नवपदम् । तदर्थस्य द्रव्यपदार्थेनान्वय इति द्रव्यव्यापकत्वमेवकारार्थः । व्याप्यव्यापकभावस्तादात्म्येन ; नवद्रव्यपदार्थयोस्तादात्म्यात् । व्यापकत्वस्य नवपदार्थेऽन्वयः । तथा च द्रव्यादिनिरूपितघटकताश्रयद्रव्याणि पृथिवीत्वविशिष्टाद्यभिन्नानि द्रव्यव्यापकत्वाश्रयनवत्वविशिष्टाभिन्नानीति रीत्या बोधः ।

सामान्यमित्यादि । द्वे विधे यस्य तत् द्विविधम् । विधा विभाजकधर्मः । षष्ठ्यर्थ आधेयत्वं विधायामन्वेति । यन्निरूपिताधेयताश्रयविभाजकधर्मौ द्वित्वविशिष्टाभिन्नाविति विग्रहार्थः । समासे विधापदं लक्षणया द्वित्वविशिष्टविभाजकधर्मवदर्थकम् । द्विपदमीदृशलक्षणातात्पर्यग्राहकम् । तस्याभेदः सामान्ये । चकारार्थः समुच्चयः । स च समुदायः साहित्यम् । तस्य परापरपदार्थयोरन्वयः । इतिशब्दार्थः प्रकारः । तत्र परापरपदार्थयोराधेयतासम्बन्धेन । परापरपदोत्तरविभक्त्योरर्थो नास्ति । प्रकारस्य च सामान्ये आश्रयतासम्बन्धेन । तथा च समुच्चयाश्रयपरापरनिष्ठप्रकारवत् द्वित्वविशिष्टविभाजकधर्मवदभिन्नं सामान्यमिति बोधः । प्रकारश्च तद्वृत्त्यसाधारणधर्म एव परत्वादिः । इतिशब्दस्य हेतुपरत्वे ज्ञानज्ञाप्यत्वमितिशब्दार्थः । परापरपदार्थयोर्विषयतासम्बन्धेन ज्ञानेऽन्वयः । ज्ञाप्यत्वमाश्रयतासम्बन्धेन द्वित्वविशिष्टविभाजकधर्मान्वयि । परमपरं चेति ज्ञाने सति विधाद्वयवत्त्वज्ञानमुत्पद्यत इति भवति विधाद्वयस्य ज्ञाप्यत्वम् । तथा च समुच्चयाश्रयपरापरविषयकज्ञानज्ञाप्यत्वाश्रय द्वित्वविशिष्टविभाजकधर्मवदभिन्नं

नित्यद्रव्यवृत्तयो विशेषास्त्वनन्ता एव । समवायस्त्वेक एव ।

सामान्यमिति। नित्येति । नित्यानि द्रव्याणि तेषु वृत्तिर्येषाम् । सप्तम्यर्थो निरूपितत्वम् । वृत्तिराधेयत्वम् । षष्ठ्यर्थ आधेयत्वं वृत्त्यन्वयि । यन्निरूपिताधेयत्वाश्रयाधेयता नित्याभिन्नद्रव्यनिरूपितनिरूपितत्वाश्रय इति विग्रहार्थः । समासे वृत्तिपदस्य नित्यद्रव्यनिरूपिताधेयताश्रये लक्षणा । पूर्वं तात्पर्यग्राहकम् । तुशब्दः पूर्वस्माद्विशेषाणां वैलक्षण्यं वक्ति । अनन्ताः, न अन्तो येषां तेऽनन्ताः । अन्तो नाम परिच्छेदः संख्यावत्त्वं संख्यैव। तस्य पर्याप्तिसम्बन्धावच्छिन्नप्रतियोगिताकत्वसम्बन्धेनाभावेऽन्वयः । येषामिति षष्ठ्यर्थाधेयत्वस्य चाभावे । यन्निरूपिताधेयतावदभावः पर्याप्तिसम्बन्धावच्छिन्नसंख्यानिष्ठप्रतियोगिताक इति विग्रहार्थः । समासेऽन्तपदस्य निरुक्तसंख्याऽभाववति लक्षणा । नञ्पदं तात्पर्यग्राहकम् । तदभेदो विशेषाणाम् । परार्धसंख्याऽपि हि कतिपयमात्रवृत्तिरेव, न पदार्थसामान्ये, न वा विशेषसामान्ये पर्याप्तिसम्बन्धेन वर्तते ।

नन्वनन्तत्वं द्रव्यादीनामप्यस्ति तत्राह एवेति । अयमेवकारः पूर्वं विभागवाक्येषु दर्शितधर्मव्यवच्छेदार्थः । तथा च किंचित्संख्यापर्याप्त्यधिकरणविभाजकधर्मशून्या इति लभ्यते । तथा च द्रव्यादयोऽनन्ताश्च तादृशविभाजकधर्मवन्तश्च । विशेषास्तु केवलमनन्ताः । नैषां तादृशधर्माः सन्तीति । एवं च नित्यद्रव्यनिरूपिताधेयतावदभिन्ना वैलक्षण्याश्रया विशेषाः पर्याप्तिसम्बन्धावच्छिन्नसंख्यानिष्ठप्रतियोगिताकाभाववदभिन्नाः संख्यापर्याप्त्यधिकरणविभाजकधर्मशून्यत्वाश्रया इति बोधः । ननु विशेषो द्विविधः परमाणुवृत्तिविशेषो विभुवृत्तिविशेषश्चेत्येवं विभागः सुकरः इति चेन्न। परमाणुवृत्तिविशेषत्वादेर्विभाजकधर्मत्वं न युक्तम् । अधिकरणानिरूप्यस्यैव धर्मस्य तत्त्वमुचितम् । अयं च धर्मः परमाणुनिरूप्य इत्याशयात् । समवा-

अभावश्चतुर्विधः । प्रागभावः प्रध्वंसाभावोऽत्यन्ताभावोऽन्योन्याभावश्चेति ॥ तत्र गन्धवती पृथिवी । सा द्विविधा ।

यस्त्विति । तुशब्दो वैलक्षण्यार्थः । एकपदमेकत्वविशिष्टार्थकम् । एकत्वं चेदं न संख्यारूपम्, तस्य गुणत्वेन द्रव्यमात्रनिष्ठत्वात् । नापि स्वसजातीयद्वितीयरहितत्वम् । एवकारपौनरुक्त्यप्रसङ्गात् । अतोऽसाधारणधर्मरूपम् । तच्च भेदविशिष्टान्यधर्मवत्त्वम् । वैशिष्ट्यं स्वप्रतियोगिवृत्तित्वस्वानुयोगिवृत्तित्वोभयसम्बन्धेन । स च धर्मस्तद्व्यक्तित्वम् । न च न तस्य भेदविशिष्टान्यत्वम्, तद्व्यक्त्येतद्व्यक्त्युभयभेदं प्रति तद्व्यक्तेः प्रतियोगित्वादनुयोगित्वाच्च तत्तद्वृत्तित्वरूपोभयसम्बन्धेन भेदविशिष्टत्वादिति वाच्यम्, भेदेत्यस्य व्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकभेदपरत्वात् । व्यासज्यवृत्तिधर्मो नाम पर्याप्तिसम्बन्धावच्छिन्नाधेयताकधर्मः । उभयत्वादिर्हि पर्याप्तिसम्बन्धेनोभयादौ वर्तत इति । अथ वा धर्मविशिष्टान्यधर्मवत्त्वमेकत्वम् । वैशिष्ट्यं स्वसामानाधिकरण्य, स्वावच्छिन्नप्रतियोगिताकस्वाश्रयावृत्तिभेदसामानाधिकरण्योभयसम्बन्धेन । अत्र धर्मपदेन तद्व्यक्तित्वरूपधर्मग्रहणेऽनेकवृत्तिधर्मस्य सर्वस्य धर्मविशिष्टत्वमेव । स्वपदेनोभयत्वादिग्रहणेन तद्विशिष्टत्वं तद्व्यक्तित्वसमवायत्वादौ न सुवचम् । तदवच्छिन्नभेदस्य तदाश्रयवृत्तित्वादिति । ननु द्रव्यादीनामपीदृशैकत्वमस्तीति किं वैलक्षण्यं तत्राह एवेति । अस्यैकत्वातिरिक्तसंख्यापर्याप्त्यधिकरणत्वाभावोऽर्थः समवायान्वयी । संख्या चेयमपेक्षाबुद्धिविशेषविषयत्वात्मकद्वित्वादिरूपा । तथा च समवायो वैलक्षण्याश्रय एकत्वविशिष्टाभिन्न एकत्वातिरिक्तसंख्यापर्याप्त्यधिकरणत्वाभाववानिति बोधः । यद्वा पूर्ववद्व्यापकत्वमेवकारार्थः । व्याप्यव्यापकभावस्तादात्म्येन । समवायव्यापकत्वाश्रय एक इत्यर्थः । एकत्वविशिष्टस्य कस्यचिदपि हि न घटादिव्यापकत्वम् । भवति तु समवायव्यापकत्वमिति वैलक्षण्यम् । अभाव इत्यादि । सामान्यविभागवाक्य इव बोधप्रकारः ।

नित्याऽनित्या च । नित्या परमाणुरूपा । अनित्या कार्यरूपा ।

एवमवान्तरविभागमपि विधाय विभक्तान् प्रत्येकं निरूपयति तत्रेत्यादिना कृत्स्नेन ग्रन्थेन । तत्रशब्दः सर्वलक्षणवाक्यस्थलक्ष्यवाचकपदान्वयी । पृथिव्याद्यन्योन्याभावान्तास्तदर्थाः । घटकत्वं त्रलर्थः । मतुप् अधिकरणतावदर्थकः । अधिकरणतायां गन्धस्य निरूपितत्वसम्बन्धेनान्वयः । पृथिव्यादिनिरूपितघटकताश्रयपृथिवी गन्धनिरूपिताधिकरणतावदभिन्नेति बोधः । गन्धोऽस्य अस्तीति विग्रहे इदंशब्दार्थः पृथिवी, षष्ठ्यर्थो निरूपितत्वम्, स धात्वर्थाधेयत्वान्वयि, अस्तीति तिबाख्यातार्थ आश्रयत्वमाश्रयतासम्बन्धेन गन्धे अन्वेति, तथा च पृथिवीनिरूपितनिरूपित्वाश्रयाधेयतानिरूपिताश्रयतावान् गन्ध इति बोधः । गन्धवत्त्वं पृथिव्या लक्षणम् । लक्ष्या पृथिवी-लक्ष्यतादिस्तत्तन्निष्ठो धर्मः । अत्र कालिकसम्बन्धेन गन्धवत्त्वं कालेऽस्तीत्यतिव्याप्तिः । तद्वारणाय समवायेन गन्धवत्त्वं लक्षणम् । न च गन्धवत्त्वं गन्धनिष्ठाधेयतानिरूपिताधिकरणतावत्त्वम्, समवायेनेति तृतीयार्थोऽवच्छिन्नत्वमाधेयतान्वयि । पृथिव्यां समवायेन गन्ध आधेयो भवतीति साऽऽधेयता तत्सम्बन्धावच्छिन्ना । तथा च समवायसम्बन्धावच्छिन्नगन्धनिष्ठाधेयतानिरूपिताधिकरणतावत्त्वं लक्षणं पर्यवसितम् । एवं च कालेऽतिव्याप्तिस्तदवस्था । पृथिव्यां स्वरूपसम्बन्धेन प्रसिद्धायास्तादृशाधिकरणतायाः कालेऽपि कालिकसम्बन्धेन सत्त्वादिति वाच्यम्; गन्धो लक्षणम् । न तु गन्धवत्त्वम् । समवायस्तु लक्षणतावच्छेदकसम्बन्ध इत्यदोषात् । एवमुत्तरत्र । नित्येति । सेत्यनुषज्यते । एवमग्रेऽपि । परमाणुरूपेति । रूपं स्वरूपम्, असाधरणधर्मवत् । परमाणुरूपं यस्याः सा । षष्ठ्यर्थ आधेयत्वमसाधारणधर्मेऽन्वेति । तथा च यन्निरूपिताधेयतावदसाधारणधर्मवत् परमाणु इत्यर्थः । रूपमित्यस्यासाधारणधर्म इत्यर्थे

पुनस्त्रिविधा शरीरेन्द्रियविषयभेदात् । शरीरमस्मदादीनाम् । इन्द्रि-

---

परमाणो रूपं यस्या इति विग्रहः । षष्ठ्यर्थ आधेयत्वं । उभयथाऽपि समासे रूपपदं पृथिवीपरमाणुत्वविशिष्टेत्यर्थलाक्षणिकम् । तदभिन्ना नित्याभिन्नपृथिवीति बोधः । एवमुत्तरत्र । पृथिव्यादिचतुष्टयं प्रत्येकं द्वेधा विभज्यते । प्रथमः प्रकारो जगदुपादानकारणविवेकोपयोगी । द्वितीय आत्मनो भोगसम्पादकत्वप्रकारविज्ञानोपयोगी । तत् प्रथमां विधामुक्त्वा द्वितीयामाह पुनरिति । अस्यार्थः समुच्चयः । त्रिविधेत्यत्र विधाशब्दस्य हि त्रित्वविशिष्टविभाजकधर्मवतीत्यर्थे लक्षणा । तत्र धर्मे समुच्चयस्याश्रयतासम्बन्धेनान्वयः । अयं च समुच्चयः पूर्वोक्तद्वित्वविशिष्टविभाजकधर्मप्रतियोगिकः । सेत्यनुषज्यते । शरीरेन्द्रियविषयाणां भेदस्तस्मात् । भेदो भेदकोऽसाधारणधर्मः । विग्रहे षष्ठ्यर्थ आधेयत्वम् । समासे विषयपदं पार्थिवशरीरेन्द्रियविषयनिष्ठेत्यर्थकम् । अभेदसम्बन्धेन तस्य भेदेऽन्वयः । ज्ञानज्ञाप्यत्वं पञ्चम्यर्थः । भेदस्य ज्ञाने विषयतासम्बन्धेनान्वयः । प्रयोज्यत्वं वा पञ्चम्यर्थः, त्रिविधापदार्थैकदेशे त्रित्वविशिष्टविभाजकधर्मवैशिष्ट्येऽन्वेति । सम्बन्धस्य हि सम्बन्धिप्रयोज्यत्वमनुभवसिद्धमिति वैशिष्ट्यस्य भेदरूपधर्मप्रयोज्यत्वमक्षतम् । इत्थमेव पूर्वमितिशब्दघटितविभागवाक्येष्वपीतिशब्दार्थस्य प्रकारस्य प्रयोज्यतासम्बन्धेन द्विविधेतिपदार्थैकदेशे धर्मवैशिष्ट्येऽन्वय इति सुवचम् । प्रायशः पदेषु लक्षणामङ्गीकृत्य बोधनिर्वाहस्तु तैस्तैः क्रियमाणो यावद्बलमुपेक्षणीय इत्येतावत्यस्माकं निर्भरः । पार्थिवशरीरादिकं दर्शयति शरीरमित्यादिना । अस्मदादीनामिति । वयमादयो येषां ते । अस्मच्छब्दः शब्दप्रयोक्तृपुरुषवाची । अत्र चायमन्नम्भट्टोऽस्मत्पदार्थः । यद्वाऽहं च यूयं चेति विग्रहेऽस्मच्छब्दश्शब्दप्रयोक्त्रन्नम्भट्ट, तद्बुद्धिस्थशिष्यतदीयप्रकृतग्रन्थपठितृबालादिपरः । आ-

दिशब्दः प्रथमार्थकः । अत्र चोपस्थितिमादाय प्राथम्यं वक्तव्यम् । अतः पदार्थविशेषापेक्षया प्रथमोपस्थितत्वं प्राथम्यम् । तथा च पदार्थविशेषविषयकोपस्थितिविशेषानुत्तरोपस्थितिविषय इत्यादिशब्दार्थः । पदार्थविशेषेत्यनेन स्वसमानाधिकरणपदोपस्थाप्यार्थभिन्ना अर्था गृह्यन्ते । उपस्थितिविशेषेत्यनेन च स्वघटितवाक्यार्थसम्बन्धित्वप्रकारिका प्रकृतवाक्याधीनोपस्थितिः । अयं भावः—भूतले घटादिरस्तीत्यादिशब्दघटितवाक्यप्रयोगे आदिशब्दसमानाधिकरणं यद्घटपदम्, तदर्थ एव प्रकृतवाक्यार्थभूतलास्तित्वसम्बन्धोपस्थितिः पूर्वं भवति । तद्भिन्नपटादौ विशिष्य तत्सम्बन्धज्ञानं च तादृशवाक्याज्झटिति न भवति । अपि त्वादिशब्दग्राह्यः पटादिरेव स्यादिति योग्यतालोचनया विलम्बेन । एवं चादिशब्दप्रयोग एवमनुभवादादिशब्दस्यायमेवार्थो भवितुमर्हति । यदि तु पटादिरिति प्रयुज्यते तदा पट एव समभिव्याहृतपदार्थसम्बन्धप्रतीतिः प्रागिति स एवादिः । अत्र च विग्रहे येषामिति षष्ठ्यर्थो घटकत्वम् । तस्यादिशब्दार्थघटके पदार्थविशेषे, उपस्थितीविषय इत्यत्र विषये चान्वयः । अथ वेदृशस्थलेष्वादिशब्दप्रयोगनिबन्धनमात्रमेतत् । आदिशब्दस्य तु वस्तुनिष्ठभेदप्रतियोगीत्यर्थः । येषामिति षष्ठ्यर्थघटकत्वं वस्तुषु प्रतियोगित्वे चान्वेति । तथा च यद्घटकत्वाश्रय, यद्घटकवस्तुनिष्ठभेदप्रतियोग्यभिन्नावयवमिति विग्रहार्थः । समासे आदिपदमस्तत्तद्भिन्नरूपार्थलाक्षणिकम् । क्वचिदादिप्रभृतिशब्दाः प्रकारवचना अपि भवन्ति । प्रकारः साजात्यम् । तद्ग्रहणे तु वयं सजातीया येषामित्यर्थः । साजात्यं च पार्थिवलोकवासित्वम् । तदा समास आदिपदमस्मन्निष्ठपार्थिवलोकवासित्वाश्रयलाक्षणिकम् । षष्ठ्यर्थः सम्बन्धः सुखावच्छेदकत्वरूपः । सुख आधेयतासम्बन्धेनाद्यर्थान्वयः । अवच्छेदकत्वस्याश्रयतासम्बन्धेन शरीरे । केवलावच्छेदकत्वं न सम्बन्धः ; आ-

यं गन्धग्राहकं घ्राणं नासाग्रवर्ति । विषयो मृत्पाषाणादिः ।

शीतस्पर्शवत्य आपः । ता द्विविधाः । नित्या अनित्याश्च । नित्याः परमाणुरूपाः । अनित्याः कार्यरूपाः । पुनस्त्रिविधाः श-

त्मनो विभुत्वेनास्मदाद्यात्मानं प्रति जलीयशरीरादेरप्यवच्छेदकत्वात् । गन्धेति । गन्धस्य ग्राहकम् । षष्ठ्या विषयित्वं ग्रहधातोर्ज्ञानं ण्वुलो जनकतावदिति चार्थः । विषयिताया ज्ञानेऽन्वयः, ज्ञानस्य च जनकतायां निरूपितत्वसम्बन्धेन । समासे गन्धपदं गन्धविषयके लाक्षणिकम् । अभेदेन ज्ञाने तदन्वयः । पार्थिवेन्द्रियं गन्धग्राहकाभिन्नं घ्राणाभिन्नमिति बोधः । शरीरे घ्राणेन्द्रियस्थानं दर्शयति तच्चेति । तत् पार्थिवेन्द्रियम् । चकारार्थः समुच्चयो नासाग्रवर्तित्वान्वयी । गन्धग्राहकत्वादिना नासाग्रवर्तित्वस्य समुच्चयः । नासाया अग्रं तस्मिन् वर्तत इति । षष्ठ्याः समवायित्वम्, सप्तम्या निरूपितत्वम् । वृतुधातोराधेयत्वं चार्थः । समासे अग्रपदस्य नासाग्रनिरूपिते लक्षणा । अभेदेन धात्वर्थे तदन्वयः । यदि पुनर्नासापदस्य नासासमवायिनि लक्षणा, तस्याभेदेनाग्रेऽन्वय इत्युच्यते, तदाऽग्रपदस्य धात्वर्थेऽन्वयार्थमग्रनिरूपितेति लक्षणाया आवश्यकतया तदेकदेशेऽग्रेऽन्वयो वाच्यः । एवमेकदेशान्वयक्लेशो मा भूदिति अग्रपद एव लक्षणा, नासापदं तात्पर्यग्राहकमिति स्वीक्रियते । णिनिप्रत्ययार्थोऽधिकरणतावान् । अधिकरणतायां धात्वर्थो निरूपितत्वसम्बन्धेनान्वेति । समुच्चयाश्रय, तादृशाधिकरणतावदभिन्नं पार्थिवेन्द्रियमिति बोधः । मृदिति । आदिपदं मृत्पाषाणतद्भिन्नार्थलाक्षणिकम् ।

शीतेति । उष्णादिस्पर्शवति तेजआदावतिव्याप्तिवारणाय शीतेति । स्पर्शेत्यनुक्तौ यद्यपि न कश्चिद्दोषः, अथापि शीतपदस्य गुणिन्यपि प्रयोगाच्छीतलमादाय, तद्वत्त्वं पृथिव्यादेरपीत्यतिव्याप्तिशङ्का स्यादिति तत्पदं प्रयुक्तम् । समवायेन शीतं लक्षणमिति ध्येयम् । ताश्चेति चकारः

रीरेन्द्रियविषयभेदात् । शरीरं वरुणलोके । इन्द्रियं रसग्राहकं रसनं जिह्वाग्रवर्ति । विषयः सरित्समुद्रादिः ।

उष्णस्पर्शवत्तेजः । तच्च द्विविधम् । नित्यमनित्यं च । नित्यं परमाणुरूपम् । अनित्यं कार्यरूपम् । पुनस्त्रिविधम् । शरीरेन्द्रियविषयभेदात् । शरीरमादित्यलोके । इन्द्रियं रूपग्राहकं चक्षुः कृष्णताराग्रवर्ति । विषयश्चतुर्विधो भौमदिव्योदर्याकरजभे-

पृथिवीसमुच्चये । तच्छब्दार्थे तदन्वयः । यथा पृथिवी द्विविधा तथाऽऽपोपीति । वरुणलोक इति । वरुणशब्दस्य वरुणस्वामिके लक्षणा । अभेदेन लोके तदन्वयः । सप्तम्यर्थ आधेयत्वं शरीरान्वयि । रसनमिति । इदं च सर्वेषाम् । कृष्णेति । कृष्णा तारा । अग्रपदं कृष्णतारासमवाय्यग्रनिरूपितार्थलाक्षणिकमित्यादि पूर्ववत् । पार्थिवादिविषयेऽवान्तरविभागप्रदर्शनमशक्यमासीत् । तैजसे तु तच्छक्यमस्तीति विभजते विषय इति । भूमौ भवं भौमम् । दिवि भवं दिव्यम् । उदरे भवं उदर्यम् । आकरे जायत इत्याकरजम् । सप्तम्यर्थोऽवच्छिन्नत्वम् । भूदेशाद्यवच्छेदेन तेजो जायत इति । भौमेत्यादौ प्रत्ययार्थो जन्यतावदिति । जन्यतायां भूम्यादेरवच्छिन्नत्वसम्बन्धेनान्वयः । आकरशब्दः खन्यवच्छिन्ने लाक्षणिकः, तदभेदो जेत्यत्र जनिधात्वर्थजन्यतायाम् । ननु नित्यानित्यसाधारण्येन पुनस्त्रिविधमिति तेजोविभागमारभ्य शरीरेन्द्रियविषयभेदादित्युक्त्या शरीरेन्द्रिययोः कार्यतेजस्त्वावश्यम्भावाच्च विषयपदेन शरीरेन्द्रियभिन्नं कार्यतेजो नित्यतेजश्च ग्राह्यमिति निश्चीयते । एवं च भौमादिविभागस्य कार्यमात्रविषयकतया कथं सामान्यतो विषयश्चतुर्विध इत्युच्यते? सत्यम्; नित्यानित्यविभागप्रदर्शनेन शरीरेन्द्रिययोः कार्यतया च पृथिव्यादाविव तेजस्यपि विषयो नित्यानित्यभेदेन द्विविध इति ज्ञातप्रायमेव । कार्यविषय एव किञ्चिद्ज्ञापनीयमस्तीत्यभिप्रेत्य विषयश्चतुर्विध इत्युक्तम् । अत इह विषयशब्दः कार्यतैजसविषयपर इति । न च भौमेत्यादौ भूमिस-

दात् । भौमं वह्न्यादि । अबिन्धनं दिव्यं विद्युदादि । भुक्तस्य परिणामहेतुरुदर्यम् । आकरजं सुवर्णादि ।

रूपरहितस्पर्शवान् वायुः । स द्विविधः । नित्योऽनित्यश्च ।

म्बन्धीत्याद्यर्थविवक्षणाज्जन्यत्वरूपार्थाविवक्षणाच्च परमाणूनामपि ग्रहणं भवतीति वाच्यम्, आकरजेति जनिधातुप्रयोगेण सर्वत्र जन्यत्वस्यैव स्वरसग्राह्यत्वात् । परमाणावबिन्धनत्वाद्यसम्भवाच्च । परमाणूनां सर्वत्र सञ्चारितया एषां भौमत्वमेषां दिव्यत्वमित्येवं व्यवस्थायाः कर्तुमशक्यत्वाच्च । अतः पूर्वोक्त एवाक्लिष्टः परिहारः । अबिन्धनं अद्भिरिन्धनं प्रकाशो यस्य । तृतीयार्थो जन्यत्वम् । षष्ठ्यर्थ आधेयत्वम् । समानाधिकरणबहुव्रीहिरेव वा । इन्धनपदस्याब्जन्यप्रकाशविशिष्टे लक्षणा । आदिनोल्कादिग्रहणम् । भुक्तस्येति । भोजनं गलाधोनयनम् । क्तप्रत्ययस्य कर्मतावदित्यर्थः । तत्र कर्मतायां निरूपितत्वसम्बन्धेन नयनान्वयः । परिणामः समवायिकारणतानिरूपक(कार्य)द्रव्यम् । तस्य हेतुः जनकतावत् । भुक्तस्येति षष्ठ्यर्थः सम्बन्धः समवायिकारणतान्वयी । स च क्वचित् साक्षात् सम्बन्धः, यथा कपालस्य परिणामो घट इति । क्वचित् परम्परया तदवयवद्वारा, यथा दुग्धस्य परिणामो दधीति । परिणामशब्दस्य समासे परिणामनिरूपिते लक्षणा । तथा च गलाधोनयननिरूपितकर्मताश्रयवस्तुनिरूपितसम्बन्धवत्समवायिकारणतानिरूपकद्रव्यनिरूपितजनकतावत् उदरावच्छिन्नजन्यतावत्तेज इति । वायुं लक्षयति रूपेति । रह धात्वर्थोऽभावः । तृतीयार्थोऽनुयोगित्वम् । रूपाभावस्य हि रूपं प्रतियोगि, अभावोऽनुयोगी । समासे रूपशब्दस्य रूपानुयोगिनि लक्षणा । क्तप्रत्ययार्थो आश्रयतावान् । आश्रयतायामभावस्य निरूपितत्वसम्बन्धेनान्वयः । स्पर्शवानिति मतुबर्थोऽप्याश्रयतावान् । स्पर्शवति रूपरहितस्याभेदेनान्वयः । रूपानुयोग्यभिन्नाभावनिरू-

नित्यः परमाणुरूपः । अनित्यः कार्यरूपः । पुनस्त्रिविधः । शरीरेन्द्रियविषयभेदात् । शरीरं वायुलोके । इन्द्रियं स्पर्शग्राहकं त्वक् सर्वशरीरवर्ति । विषयो वृक्षादिकम्पनहेतुर्वायुः । शरीरान्तःसञ्चारी

पिताश्रयतावदभिन्नस्पर्शनिरूपिताश्रयतावदभिन्नो वायुरिति बोधः । रूपाभावविशिष्टस्पर्शः समवायेन लक्षणम् । वैशिष्ट्यं सामानाधिकरण्यसम्बन्धेन । कालेऽपि कालिकसम्बन्धेन विशिष्टस्पर्शसत्त्वादतिव्याप्तिरिति समवायेनेति । ननु पृथिव्यामतिव्याप्तिः, रूपाभावस्य कालिकसम्बन्धेन तत्र सत्त्वात्स्पर्शस्य च समवायेन सत्त्वात्तत्रोभयोः सामानाधिकरण्यात् । न च सामानाधिकरण्यं नामधेयतानिरूपिताधिकरणतावन्निष्ठाधिकरणतानिरूपिताधेयता । तत्र प्रथमाधेयतायां स्वरूपसम्बन्धावच्छिन्नत्वं निवेश्यते । तथा च पृथिव्यां रूपाभावस्य कालिकसम्बन्धेन सत्त्वेऽपि स्वरूपसम्बन्धेनाभावान्न पृथिव्यां सामानाधिकरण्यमिति वाच्यम् । तन्निवेशेऽप्यतिव्याप्तेः, स्वरूपसम्बन्धावच्छिन्नाधेयतानिरूपिताधिकरणता हि वायौ प्रसिद्धा । सा कालिकसम्बन्धेन पृथिव्यामस्ति । अतस्तादृशाधिकरणतावती पृथिवी । तन्निष्ठाधिकरणतानिरूपिताधेयता च स्पर्श इति सामानाधिकरण्यस्याक्षतत्वादिति चेन्न । वस्तुतो रूपाभावस्य स्वरूपसम्बन्धेन यदधिकरणं वस्तुतस्तादृशाधिकरणनिरूपिता याऽऽधेयता तदेव प्रकृते सामानाधिकरण्यमिति तेन सम्बन्धेन रूपाभावविशिष्टस्पर्शो लक्षणमिति विवक्षणीयम् । अतो न दोषः । सर्वशरीरवर्तीति । शरीरपदं शरीरावयवपरम् । सर्वेषु शरीरेषु शरीरावयवेषु वर्तत इति विग्रहः । अवच्छिन्नत्वं सप्तम्यर्थः । सर्वशरीरावयवावच्छिन्नेति शरीरपदे लक्षणा । अभेदेन वृतुधात्वर्थ आधेयत्वेऽन्वयः । आश्रयो णिन्यर्थः । वायवीयविषयमाह विषय इत्यादिना प्राणश्चेत्यन्तेन वाक्येन । प्रशस्तपादभाष्ये 'चतुर्विधः शरीरमिन्द्रियं विषयः प्राणः' इति चातुर्विध्य-

वायुः प्राणश्च । स चैकोऽप्युपाधिभेदात् प्राणापानादिसंज्ञां लभते ।

मुक्तम् । इह त्रैविध्योक्तौ तद्विरोध इति शङ्काप्रसक्त्यभावाय शरीरान्तःसञ्चारी वायुः प्राणश्चेति विशिष्योक्तम् । तथा च वृक्षादिकम्पनहेतुर्वायुः प्राणश्चेत्युभयमपि विषय एवेत्यर्थः । शरीरेन्द्रियभिन्नत्वमेव विषयत्वमिति प्राणोऽपि विषय एव । भाष्ये पृथगुक्तिस्तु बाह्यवायुविलक्षणकार्यकरत्वप्रदर्शनाभिप्रायेणोपकारातिशयादरेणेति भावः । वृक्षादीनां कम्पनं तस्य हेतुर्जनकतावान् । प्रथमषष्ठ्यर्थ आधेयत्वम्, द्वितीयतदर्थो निरूपितत्वम् । कम्पनपदस्य वृक्षतद्भिन्ननिष्ठक्रियानिरूपितेति लक्ष्यार्थः । जनकतायामभेदेनान्वयी । शरीरेति । अन्तःशब्दोऽन्तरवयवपरः । शरीरस्य समवायित्वसम्बन्धेन तत्रान्वयः । अन्तरवयवस्यावच्छिन्नत्वसम्बन्धेन संपूर्वकचरधात्वर्थे क्रियायामन्वयः । णिनेरर्थ आश्रयतावान् । आश्रयतायां धात्वर्थस्यान्वयः । णिन्यर्थस्य वायौ, तस्य प्राणे, तस्य प्रथमवायुपदार्थस्य च विषयेऽभेदेन; चार्थसमुच्चयस्य प्रथमवायुपदार्थे प्राणे च । ननु शरीरान्तःसञ्चारी वायुः प्राण एवेति कथम्? अपानादेरपि सत्त्वादिति शङ्कायामाह स चेति । सः शरीरान्तःसञ्चारी वायुः । चो वाक्यालङ्कारे, ज्ञातत्वप्रसिद्धिद्योतनार्थो वा, प्रकृतवाक्यार्थस्य पूर्ववाक्यार्थसमुच्चये वा । **एकः** एकशरीरावच्छेदेनैकदा स्वसमानद्वितीयरहितः । स्वाश्रयशरीरावच्छिन्नत्व,स्वसमानकालिकत्व,स्वभिन्नत्वरूपसम्बन्धत्रयेण वायुविशिष्टान्यः । अपेरविरोधित्वमर्थः तच्च सामानाधिकरण्यम् । तस्य लभधात्वर्थेऽन्वयः । एकपदार्थस्य निरूपितत्वसम्बन्धेन सामानाधिकरण्ये । अभेदेनैकपदार्थो वायौ, तत्र लाभोऽप्यस्तीति तयोस्सामानाधिकरण्यम् । **उपाधिभेदात्**, उपाधीनां निमित्तानां शक्यतावच्छेदकानां भेदात् परस्परं भिन्नत्वात् । आधेयत्वं षष्ठ्यर्थः । 'हृदि प्राणो गुदेऽपानस्समानो नाभिसंस्थितः । उदा-

शब्दगुणकमाकाशम् । तच्चैकं विभु नित्यं च ।

नः कण्ठदेशस्थो व्यानस्सर्वशरीरगः' इत्युक्तरीत्या प्राणादिशब्दा हृदयादितत्तद्देशावच्छिन्नवायुवाचिन इति तत्र तत्र शक्यतावच्छेदकभेदः । अथवा क्रियाभेदादिति भाष्ये दर्शनात् प्राणादिशब्दाः प्राणनापाननव्याननोदननसमननरूपक्रियाविशिष्टवाचिनः । तत्तत्क्रिया च भिन्नेति भावः । विवृतं चेदं कन्दल्याम्, 'मूत्रपुरीषयोरधोनयनादपानः, रसस्य गर्भनाडीवितननाद्व्यानः, अन्नपानादेरूर्ध्वं नयनादुदानः, मुखनासिकाभ्यां निष्क्रमणात् प्राणः, आहारेषु पाकार्थमुदर्यस्य वह्नेस्समं सर्वत्र नयनात् समान' इति । भेदादिति पञ्चम्यर्थः प्रयोज्यत्वं लभेऽन्वेति । प्राणापानावादी यस्यास्सा । प्राणापानशब्दौ तत्तच्छब्दपरौ, संज्ञापदसामानाधिकरण्यात् । आदिपदं प्राणशब्दापानशब्दतद्भिन्नशब्दपरम् । तदभिन्ना संज्ञा वाचकशब्दः प्राणशब्दापानशब्दतद्भिन्नशब्दाभिन्नविभिन्नार्थवाचकशब्दमिति यावत् । विभिन्नार्थेति निवेशाभावे विरोधप्रसक्तिरेव नास्ति । एकस्यैव घटस्य घटकुम्भकलशादिबहुसंज्ञालाभदर्शनात् । लभते प्राप्नोति । प्राप्तिः सम्बन्धः तच्च वाच्यत्वम् । संज्ञामित्येकत्वमविवक्षितम् । द्वितीयार्थो निरूपितत्वं वाच्यत्वरूपसम्बन्धान्वयी । तथा च तत्समभिव्याहृतलभधातुना प्राणशब्दादितत्तच्छब्दवाच्यत्वानि सर्वाण्युच्यन्ते । तेषु सर्वेष्वपि शब्दार्थसामानाधिकरण्यान्वयादेकस्यैव सर्वपदवाच्यत्वावगतिः । आश्रयत्वमाख्यातार्थस्स इत्यत्रान्वेति ।

आकाशं लक्षयति शब्देति । शब्दो गुणो यस्य । षष्ठ्यर्थः समवेतत्वम् । यन्निरूपितसमवेतत्वाश्रयगुणः शब्दाभिन्नः । शब्दसमवायीति गुणपदे लक्षणा । कालिकसम्बन्धेन शब्दवति कालेऽतिव्याप्तिरिति समवायेति । गुणेति न लक्षणप्रविष्टम् । तदुक्तिस्तु शब्दस्य गुणत्वात्

अतीतादिव्यवहारहेतुः कालः, सचैको विभुर्नित्यश्च ।

द्रव्यत्वाभावात् किञ्चिदाश्रितत्वस्यावश्यकत्वादाकाशसिद्धिरिति सूचनाय । तथा च समवायेन शब्दो लक्षणम् । पृथिव्यादाविवात्र विभागो नास्तीत्याह तच्चेति । चकारः पृथिव्यादिवैलक्षण्यार्थस्तुपर्यायः । एकम् एकत्वातिरिक्तसंख्यापर्याप्त्यधिकरणतानवच्छेदकसमभिव्याहृतपदार्थतावच्छेदकव -दिति यावत् । नन्वाकाशस्यैकत्वे तस्य काञ्च्यां सत्त्वे कावेरीपरिसरे शब्दो नोत्पद्येत कारणाभावात्तत्राह विभ्विति । सर्वव्यापि, सर्वसम्बन्धीत्यर्थः । रूपादिसम्बन्ध आकाशे बाधित इति सर्वद्रव्यसम्बन्धीति वक्तव्यम् ; विभुनो विभुना न सम्बन्ध इत्यसम्भवात्सर्वमूर्तद्रव्यसम्बन्धीति ; ज्ञानमपि विषयतया तावत्सम्बन्धीत्यतिव्याप्त्या सर्वमूर्तद्रव्यसंयोगीति । तच्च न तत्तन्मूर्तद्रव्यं विशिष्य गृहीत्वा तन्मूर्तसंयोगित्वे सत्येतन्मूर्तसंयोगित्वे सतीत्येवम् । तथा सर्वग्रहणस्याशक्यत्वात् । अतो मूर्तत्वव्यापकसंयोगाश्रयत्वं विभुत्वम् । तत्रापि संयोगित्यनेनैकैकसंयोगग्रहणे न कस्यापि मूर्तत्वव्यापकत्वम् , घटाकाशसंयोगादेः पटादावभावादिति संयोगसम्बन्धेन मूर्तत्वव्यापकत्वं तदिति निष्कर्षः । आकाशस्यैकत्वे यदा तस्य नाशस्तदुत्तरं कथं शब्दोत्पत्तिस्तत्राह नित्यमिति । प्रागभावाप्रतियोगित्वध्वंसाप्रतियोगित्वोभयवदित्यर्थः । चार्थः समुच्चय एकत्वविभुत्वनित्यत्वेष्वन्वेति ।

अतीतेति । अतीतशब्दोऽतीतघटादिवस्तुपरः । अतीत आदिर्येषां ते । आदिशब्दोऽतीतभिन्नवस्तुपरः । तेषां व्यवहारो ज्ञानजनकशब्दप्रयोगः । षष्ठ्यर्थो विषयित्वं ज्ञानेऽन्वेति । समासे आदिपदमतीतभिन्नवस्तुविषयकपरम् । अभेदेन ज्ञाने तदन्वयः । व्यवहारपदस्य ज्ञानजनकशब्दप्रयोगनिरूपिते लक्षणा । हेतुः कारणतावान् । एकदेशे कारणतायामभेदेन तदन्वयः । अतीतादिवस्तुविषयकाभिन्नज्ञानज-

नकशब्दप्रयोगनिरूपिताभिन्नकारणतावदभिन्न इति बोधः । यद्वा अतीत इत्यादिर्येषां ते । इतिशब्दः प्रकारवाची सा चेहानुपूर्वी । व्यवहारः प्रयोगः । यदीयादिभूतो व्यवहारोऽतीतशब्दवृत्त्यानुपूर्व्यवच्छिन्नविषयक इति विग्रहार्थः । समासे आदिपदमतीततद्भिन्नशब्दविषयकपरम् । भिन्नश्च शब्दोऽनागतादिः । अतीतादयो व्यवहारास्तेषां हेतुरित्यादिपूर्ववत् । अतोऽतीततद्भिन्नशब्दविषयकव्यवहारनिरूपिताभिन्नकारणतावानिति बोधः । अतीतादिव्यवहारो हि कालस्यैव व्यवहारः । तत्र कालः कारणम् । व्यवहर्तव्याभावे व्यवहारासम्भवादिति । ननु व्यवहर्तव्यज्ञानमेव कारणम् । न तु व्यवहर्तव्यम् । अतः कारणत्वं कालज्ञानस्यैव, न तु कालस्येत्यसम्भवः । न च कालस्य सर्वकारणत्वान्नासम्भव इति वाच्यम् । ईदृशकारणत्वस्यादृष्टेश्वरयोरपि सत्त्वादतिव्याप्तिरिति चेत् हेतुपदं जनकज्ञानविषयपरम् । कालज्ञानस्य तादृशव्यवहारासाधारणजनकत्वात्कालस्य तादृशज्ञानविषयत्वमस्तीति न दोषः ।

ननु जनकज्ञानेत्यनेन,'अतीतः भूतलं च घटवदि'ति समूहालम्बनज्ञानस्यापि ग्रहणसम्भवात्तद्विषयत्वं भूतलादावित्यतिव्याप्तिरिति चेन्न जनकज्ञानविषयेत्यस्य जनकतावच्छेदकविषयतावानित्यर्थः । नियमेन यद्विषयकज्ञानं जनकम् तन्निष्ठविषयतैव जनकतावच्छेदिकेत्यदोषात् । ननु वर्तमानेत्यस्य शब्दप्रयोगाधिकरणकालेत्यर्थः । अतीतेत्यस्य तादृशकालवृत्तिध्वंसप्रतियोगीति । अनागतेत्यस्य तादृशकालवृत्तिप्रागभावप्रतियोगीति । तथा चातीतादिशब्दप्रयोगजनकज्ञानं शब्दप्रयोगाधिकरणकालवृत्तिध्वंसप्रतियोगीत्यादिरूपम् । तादृशज्ञानविषयत्वं च यथा काले तथा कालवृत्तित्वे ध्वंसे प्रागभावे प्रतियोगिनि चेति तत्र सर्वत्रातिव्याप्तिः । न च जनकज्ञानविषयत्वं नाम जनकतावच्छेदकविशेष्यता-

निरूपितविषयतानिरूपितविषयतानिरूपितविषयतानिरूपितविषयताश्रयत्वम् । विशेष्यता प्रतियोगिघटादिनिष्ठा, तन्निरूपितविषयता प्रतियोगित्वनिष्ठा । तन्निरूपितविषयता ध्वंसप्रागभावनिष्ठा , तन्निरूपितविषयता आधेयताख्यवृत्तिनिष्ठा, तन्निरूपितविषयता काल एव । वर्तमानव्यवहारहेतुत्वं च जनकतावच्छेदकविशेष्यतानिरूपितविषयतानिरूपितविषयताश्रयत्वमेव । शब्दप्रयोगाधिकरणकालवृत्तीत्यर्थे कालवृत्तिघटादिनिष्ठा विशेष्यता तन्निरूपितविषयता वृत्तिनिष्ठा , तन्निरूपितविषयता काल एवेति । सर्वं पृथग्लक्षणम् । अतो न दोष इति वाच्यम् । शब्दप्रयोगं प्रति यथा अर्थज्ञानं कारणम् तथा शब्दज्ञानमपि । एवमध्ययनकाले शिष्यीयशब्दप्रयोगं प्रति गुरुप्रयुक्तशब्दज्ञानं कारणं दृष्टमेव । तस्मादिदं लक्षणमतीतेत्यादिशब्दान्तर्गतवर्णेऽपि भविष्यतीत्यतिव्याप्तिरिति चेन्न ; तादृशजनकतावच्छेदकप्रकारताश्रयाधेयतानिरूपकत्वं लक्षणम् । तत्र तत्र शब्दप्रयोगाधिकरणकालवृत्तीत्यत्र वृत्तिरूपाधेयतानिष्ठप्रकारतामादाय लक्षणसमन्वय इत्यदोषात् ।

ननु किमत्र लक्षणम् ? किमतीतवस्तुविषयकज्ञानजनकशब्दप्रयोगजनकतावच्छेदकप्रकारताश्रयाधेयतानिरूपकत्वम् , किं वाऽतीतशब्दप्रयोगजनकतावच्छेदकप्रकारताश्रयाधेयतानिरूकत्वम् ? नोभयमपि सम्भवति । आत्माश्रयात् । लक्षणघटकं हि जनकत्वं नियतपूर्वकालवृत्तित्वरूपम् । तत्र च कालो घटकः । एवं प्रथमेऽतीतवस्त्वित्यस्य शब्दप्रयोगाधिकरणकालवृत्तिध्वंसप्रतियोगीत्यर्थ इति च तत्र कालो घटकः । ननु लक्षणे लक्षणस्य घटकत्वे ह्यात्माश्रयः । कालत्वमतीतव्यवहारहेतुत्वमिति नोच्यते । किं तु कालस्येदं लक्षणमिति । लक्षणे तु कालत्वमेव घटकम् । तच्च तद्व्यक्तित्वादिरूपमिति न दोष इति चेत्; तथाऽपि लक्षणघटकस्य कालत्वस्यैव लक्षणत्वसम्भवेन लक्ष्यतावच्छेदकघटितलक्षणवर्णनमयुक्तम् । न च लक्ष्यं

किञ्चिद्रूपेण बुध्वा तस्य किं लक्षणमिति प्रश्ने प्रष्टुर्यत् लक्ष्येऽन्यूनानतिप्रसक्तत्वेन न ज्ञातम् , तल्लक्षणं वक्तव्यम् । यथा पृथिवीं घटपटादिकां पृथिवीत्वेन बुध्वा तल्लक्षणप्रश्ने गन्धो लक्षणमुच्यते तद्वत् । प्रकृते लक्ष्यज्ञाने सति कालत्वं ज्ञातमिति लक्षणप्रश्ने ज्ञातस्य तस्यैव कथनं न युक्तमिति वाच्यम् । तथा सत्यतीतव्यवहारहेतुस्वरूपप्रकृतलक्षणस्यापि कथनासम्भवात् । पुरुषस्य कालज्ञानं ह्यतीतोऽयं अनागतोऽयमित्येवम् । एवमतीतत्वादिज्ञाने सत्यतीतत्वादिघटके कालेऽतीतत्वादिज्ञानविषयत्वमपि ज्ञायतैव । अतो ज्ञातस्य तस्य न लक्षणत्वमिति । किञ्च पृथिवीति ज्ञानमात्रेणेतरव्यावृत्ततया न ज्ञातमिति हि गन्धो लक्षणमुच्यते । तद्वत् काल इति ज्ञानमात्रेणेतरव्यावृत्तिज्ञानाभावादिदं लक्षणमिति वक्तव्यम् । न च तत्सम्भवति । एतल्लक्षणमध्येऽपि कालत्वेनैव कालपदनादविशेषात् । किञ्च वर्तमानकालवृत्तिध्वंसप्रतियोगिविषयकज्ञानजनकशब्दप्रयोगजनकज्ञानविषयत्वापेक्षया वर्तमानकालवृत्तिध्वंसप्रतियोगिविषयकज्ञानविषयत्वमेव लघुलक्षणं भवितुमर्हति । लघुतरं च कालविषयकज्ञानविषयत्वं , लघुतमं च कालत्वमेव । लक्ष्यतावच्छेदकस्य लक्षणकोटिप्रवेशाङ्गीकारवल्लक्षणत्वमपि युज्यत एव । तस्मादेव शिरोवेष्टनेन नासिकास्पर्शो न युज्यत इति चेत्—सत्यम् । अथापि, काल इति किमर्थमतिरिक्तं द्रव्यं कल्प्यम् । वर्तमानकालः, अतीतकाल इत्यादेस्तत्तत्सूर्यपरिस्पन्दपरतयैव निर्वाहात् । परिस्पन्दश्च क्रियेति नातिरिक्तवस्तुकल्पनेत्याशङ्का कस्यचिद्भवेत् । तत्र, अतिरिक्तानङ्गीकारेऽतीतादिव्यवहारो नोपपद्यते । अतीत इति हि शब्दप्रयोगाधिकरणकालवृत्तिध्वंसप्रतियोग्यर्थकम् । तत्र कालपदेन परिस्पन्दग्रहणे तस्य शब्दप्रयोगाधिकरणत्वं न भवति । सूर्यनिष्ठक्रियायाः पुरुषनिष्ठोच्चारणक्रियाधिकरणत्वायोगात् । एवं घटादिध्वंसस्यापि न तद्वृत्तित्वम् ।

प्राच्यादिव्यवहारहेतुः दिक् । सा चैका विभ्वी नित्या च । ज्ञानाधिकरणमात्मा । स द्विविधः, परमात्मा जीवात्मा चेति । तत्रेश्वरः सर्वज्ञः परमात्मा एक एव ।

अतः शब्दप्रयोगाधिकरणत्वघटादिध्वंसाद्याश्रयोऽतिरिक्तकालः । तदाश्रयत्वेन च स प्रतीतिबलात्स्वीकार्यः । प्रतीतिश्च व्यवहारान्यथाऽनुपपत्त्या सिद्धेत्येवं तत्परिहारायातीतादिव्यवहारहेतुरित्युक्तम् । तथा च परिस्पन्दादिव्यावृत्ततया कालज्ञानमतीतादिव्यवहारहेतुत्वेन भवतीति तल्लक्षणमिति । अत्र 'अपरस्मिन्नपरं युगपच्चिरं क्षिप्रमिति काललिङ्गानी' ति सूत्रानुसारेर अतीतादिव्यवहारो हेतुः साधकप्रमाणं यस्य स इति विग्रहेणातीतादिव्यवहारानुमेयत्वं कालस्य विवक्षितमित्यपि वक्तुं शक्यम् । अतीतादिव्यवहारः सूर्यपरिस्पन्दाद्यतिरिक्तवस्तुविषयकः शब्दप्रयोगाद्यधिकरणतया किञ्चिद्विषयकत्वादित्येवमनुमानप्रकारः ।

प्राचीति । विग्रहादिकं पूर्ववत् । तथा च प्राचीविषयकज्ञानजनकशब्दप्रयोगजनकतावच्छेदकविशेष्यताश्रयत्वमिति प्राचीशब्दप्रयोगजनकतावच्छेदकविशेष्यताश्रयत्वमिति वा निष्कर्षः । प्राचीशब्दार्थो ह्युदयगिरिसन्निहिता दिगिति । तत्र दिशो विशेष्यत्वमेवेति ।

ज्ञानेति । ज्ञानस्याधिकरणमाधारतावान् । निरूपितत्वं षष्ठ्यर्थः । ज्ञानपदस्य ज्ञाननिरूपिते लक्षणा । आत्मनि समवायेन ज्ञानमस्तीत्यात्मा ज्ञानाधिकरणम् । न च विषयतासम्बन्धेन घटादौ कालिकसम्बन्धेन काले च ज्ञानसत्त्वादतिव्याप्तिरिति वाच्यम् ; समवायेन ज्ञानं लक्षणमित्याशयात् । तत्र परमात्मजीवात्मनोः । घटकत्वं सप्तम्यर्थः । परमात्मेत्यत्रान्वेति । सर्वज्ञः सर्वपदं सर्वविषयकलाक्षणिकम् । अभेदेन ज्ञाधात्वर्थज्ञाने तदन्वयः । एकः, एकत्वसंख्याविशिष्टः । एकत्वातिरिक्तसंख्यापर्याप्त्यनधिकरणत्वमेवकारार्थः । अस्याश्रयतासम्बन्धेन परमात्मन्यन्वयः ।

जीवस्तु प्रतिशरीरं भिन्नो विभुर्नित्यश्च ।

अन्यपदार्थानां च तत्रभेदेन । एवकारार्थे ईश्वरत्वं सर्वज्ञत्वं च हेतुः । **जीवस्त्विति** । तुशब्देन परमात्मापेक्षया वैलक्षण्यमाह । **प्रतिशरीरं भिन्न इति** । जीवः शरीरे शरीरे भिन्नः, जीव एकैकशरीरावच्छिन्नोऽपि शरीरान्तरावच्छिन्नजीवाद्भिन्न इति भावः । अयमर्थः—भिन्न इत्युक्तौ कस्माद्भिन्न इत्याकांक्षायां शरीराद्भिन्न इति तावन्न विवक्षितम् । अतो जीवाद्भिन्न इति वक्तव्यम् । तत्र यत्किंञ्चिज्जीवभेदोक्तौ जीवद्वयमात्रसिद्धिः स्यात् न त्वनन्तजीवसिद्धिः । जीवसामान्यभेदोक्तौ तु जीवे तदसम्भवः । अतः शरीरान्तरावच्छिन्नजीवभेदो वाच्यः । तत्र शरीरान्तरेत्यस्य न स्वावच्छेदकशरीरभिन्नशरीरेत्यर्थः, तथा सति जीवद्वयत्वयाङ्गीकारेऽपि क्षतिविरहात्; स्वावच्छेदकशरीराण्येतज्जीवीयानि, तद्भिन्नशरीराण्यन्यजीवीयानि, तदवच्छिन्नजीवसामान्यभेदो जीवेऽस्तीति । अतस्तस्य यत्किञ्चिच्छरीरभिन्नशरीरेत्यर्थः । तथा च जीवद्वयाङ्गीकारे एकैकस्य बहुशरीरसद्भावेन यत्किञ्चिच्छरीरपदेनैकशरीरग्रहणे तद्भिन्नशरीरेत्यनेन तज्जीवीयशरीरान्तरस्यापि ग्राह्यतया तदवच्छिन्नजीवः स एवेति न तस्मिन् जीवे तादृशजीवसामान्यभेदसिद्धिः । अतोऽनन्तजीवप्रतिपादकत्वमस्य वाक्यस्य । एवमप्येकस्य जीवस्यैकमेव शरीरमन्यानि शरीराणि सर्वाण्यन्यस्यैकस्येत्यङ्गीकारे शरीरपदेनैकशरीरकजीवपरिग्रहे यत्किञ्चिच्छरीरं तदीयम्, तद्भिन्नशरीरावच्छिन्नजीवसामान्यभेदस्तस्मिन्नस्तीति वाक्यार्थपर्यवसानान्नानन्तजीवपरत्वसिद्धिः, अतः प्रतिशरीरमित्युक्तम्, तथाचैकैकमपि शरीरं पृथक्पृथग्गृहीत्वा तत्र तत्र यत्किञ्चिच्छरीरभिन्नशरीरावच्छिन्नजीवसामान्यभिन्नत्वं जीव उपपादनीयम् । इदं चैकस्य शरीरद्वयाङ्गीकारेऽपि न भवति, यत्किञ्चिच्छरीरपदेन तद्द्वया-

न्तर्गतैकशरीरग्रहणे तदन्यशरीरं तद्द्वयान्तर्गतमन्यदपीति तदवच्छिन्नजीवसामान्यभिन्नत्वस्य क्वचिदपि जीवेऽसम्भवात् । अतः शरीरभेदेन जीवभेदसिद्धिः । अयमत्र बोधः । प्रतिशब्दार्थोऽव्यापकत्वमधिकरणनिष्ठाभावाप्रतियोगित्वं भेदान्वयि । अधिकरणेऽवाच्छिन्नत्वसम्बन्धेन शरीरान्वयः । भिन्न इत्यत्र भेदो यत्किञ्चिच्छरीरभिन्नशरीरावच्छिन्नजीवसामान्यप्रतियोगिकभेदरूपः, शरीरविशिष्टभेद इति यावत्, वैशिष्ट्यं स्वभिन्नशरीरावच्छिन्नजीवत्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन । तथा च शरीरावच्छिन्नाधिकरणनिष्ठाभावाप्रतियोगित्वाश्रयशरीरविशिष्टभेदनिरूपिताश्रयतावदभिन्नो जीव इति । यदि तु प्रतिशरीरमित्यस्य शरीरत्वव्यापकत्वरूपार्थविवक्षा, तदा यत्र यत्र शरीरत्वम्, तत्र तत्र तादृशभेद इत्यर्थो वाच्यः । तत्र शरीरत्वं शरीरेऽस्ति, तत्र भेदस्य सम्बन्धः स्वाश्रयावच्छेदकत्वम् । अतो व्यापकता स्वाश्रयावच्छेदकत्वसम्बन्धावच्छिन्ना ग्राह्या । व्यापकताघटकाभावीयप्रतियोगिता तत्सम्बन्धावच्छिन्नेत्युक्तं भवति । एवं च प्रतिशब्दस्याभावाप्रतियोगित्वमर्थः । अभावे शरीरस्याधेयतासम्बन्धेनान्वयः । शरीरनिष्ठाभावाप्रतियोगित्वमेव हि शरीरत्वव्यापकत्वम् । यद्यपि भिन्न इत्यस्य पूर्वोक्तार्थकत्वे जीवपदार्थस्योद्देश्यतयोद्देश्यविधेयभावमहिम्नैव जीवः सर्वोऽपि निरुक्तभेदवानित्यर्थलाभे सर्वसिद्धया प्रतिशरीरमित्यस्य वैयर्थ्यमित्याशङ्का प्रसजति; अथापि प्रतिशरीरमिति पदप्रयोगवशादेव भिन्नपदस्य शरीरभेदातिरिक्ततादृशजीवभेदरूपविवक्षितार्थसिद्धिः । एवं सर्वत्रोद्देश्यविधेयभावस्थले व्याप्यव्यापकभावप्रतीतिनियमाभावाज्जीवानन्त्यं न निश्चीयेतेति तदुक्तमिति समाधानं द्रष्टव्यम् । अत एकैकशरीरावच्छिन्नोऽपि जीवः शरीरान्तरावच्छिन्नजीवाद्भिन्न इत्यत्र प्रथमपदस्येव प्रतिशरीरमित्यस्य न वैयर्थ्यम् । अत्र चैकस्यापि जीवस्य जन्मभेदेन शरीरभेदस्येष्टत्वादीदृशभेदो

सुखाद्युपलब्धिसाधनमिन्द्रियं मनः, तच्च प्रत्यात्मनियतत्वा-

जीवे दुर्वचः । तथा योगजधर्मबलेन बहुशरीरपरिग्रहस्यापि संमततया योगिनि जीवेऽयं भेदो न भवति । अतः स्वभिन्नशरीरेत्यस्य स्वभिन्नस्व-समानकालिकयोगजधर्माजन्यशरीरेत्यर्थ इति बोध्यम् ।

एवं तावत्प्रतिशरीरमित्यत्र शरीरपदस्य यथाश्रुतार्थरक्षणेन, तत्तच्छ-रीरे शरीरान्तरावच्छिन्नजीवाद्भिन्न इति प्रयोगसमानार्थकत्वानुभवानुसारेण च बोधो वर्णितः । केचित्तु शरीरपदं यत्किञ्चिच्छरीरभिन्नशरीरपरम् । तादृशशरीरत्वव्यापकभेदप्रतियोगी जीव इति बोधः । व्यापकता स्वाश्र-यावच्छेदकत्वसंबन्धेनेत्याहुः । तत्र भिन्नशब्दस्य भेदप्रतियोगीत्यर्थवर्णन-मयुक्तम् ; घटः पटाद्भिन्न इत्यादौ भेदानुयोगीत्येवानुभवात् । एवं च स्वाश्रयावच्छेदकत्वसंबन्धविवक्षणे घटभेदमादायान्यथासिद्धिरिति स्वप्रति-योग्यवच्छेदकत्वं संबन्ध इति वक्तव्यम् । एवमपि जीवस्यैकत्वेऽपि जीव-घटोभयभेदमादाय जीवस्य भेदाश्रयत्वं भेदप्रतियोगित्वं चास्तीत्यन्यथा-सिद्धिः । तथा भेदे व्यापकत्वविवक्षामपेक्ष्य यत्किञ्चिच्छरीरभिन्नशरीराव-च्छिन्नात्मत्वावच्छिन्नप्रतियोगिताकत्वरूपलघुधर्मनिवेशेनैव सामञ्जस्यात्तदु-पेक्षणमयुक्तमिति मूलस्य न्यूनता स्यादित्यादिरस्वरसः ।

मनो लक्षयति सुखेति । सुखमादिर्येषां तानि सुखादीनामुपलब्धिः । षष्ठ्यर्थो विषयित्वम् । तस्यास्साधनं कारणतावत् । निरूपितत्वं षष्ठ्यर्थः । समास उपलब्धिपदस्य सुखतद्भिन्नविषयकोपलब्धिनिरूपितेति लक्ष्यार्थः । अभेदेन कारणतायामन्वयः । तादृशकारणतावदभिन्नामिन्द्रियाभिन्नं मन इति बोधः । सुखप्रत्यक्षकारणत्वे सतीन्द्रियत्वं लक्षणम् । आदिपदं सुखव-द्दुःखादिकमादायापि लक्षणं सुवचमिति प्रदर्शनाय । चक्षुरादावात्ममनःसं-योगरूपसन्निकर्षे चातिव्याप्तिवारणाय दलद्वयम् । प्रत्यात्मनियतत्वा-

दनन्तं परमाणुरूपं नित्यं च।

चक्षुर्मात्रग्राह्यो गुणो रूपम्। तच्च शुक्लनीलपीतरक्तहरितकपि-

---

दिति। नियतं व्यवस्थितम्। प्रतिशब्दघटितपदसमभिव्याहृतश्च नियतशब्दस्तत्पदार्थीयतत्तद्व्यक्तिव्यवस्थितपरः। तद्व्यवस्थितत्वं च तदितरासम्बन्धित्वे सति तत्सम्बन्धित्वम्। तथा च यत्किञ्चिदात्मभिन्नासम्बन्धित्वे सति तत्सम्बन्धित्वम्। स्वभिन्नासम्बन्धित्वस्वसम्बन्धित्वोभयसम्बन्धेनात्मविशिष्टत्वं प्रकृते नियतत्वम्। प्रतिशब्दस्य पूर्ववद्व्यापकत्वमभावप्रतियोगित्वमर्थो नियतत्वेऽन्वेति। आत्मन आधेयतासम्बन्धेनाभावेऽन्वयः। व्यापकत्वं चेदं निरूपकतासम्बन्धेन। यत्र यत्रात्मत्वम्, तत्र तत्रात्मनि मनोगतमात्मविशिष्टत्वं निरूपकतासम्बन्धेनास्तीति। आत्मनिरूपितवैशिष्ट्ये ह्यात्मा निरूपकः। ज्ञानज्ञाप्यत्वं पञ्चम्यर्थोऽनन्तत्वान्वयि। अनन्तमिति बहुव्रीहिरिति अन्तपदस्य पर्याप्तिसम्बन्धावच्छिन्नसंख्यानिष्ठप्रतियोगिताकाभाववदित्यर्थे, स्वव्यापकसंख्यावत्त्वसम्बन्धावच्छिन्नमनस्त्वनिष्ठप्रतियोगिताकाभाववदित्यर्थे वा लक्षणा। नञ् तात्पर्यग्राहकः। तथा चात्मनिष्ठाभावीयनिरूपकतासम्बन्धावच्छिन्नप्रतियोगित्वाभावव-दात्मविशिष्टत्व-विषयकज्ञान-ज्ञाप्यत्वाश्रय, स्वव्यापकसंख्यावत्त्वसम्बन्धावच्छिन्नमनस्त्वनिष्ठप्रतियोगिता-काभाववदभिन्नं मन इति बोधः। आत्मानो ह्यनन्ताः। अतः प्रत्यात्मं व्यवस्थितत्वान्मनोऽप्यनन्तमिति। मनस आत्मसम्बन्धित्वं चात्मनिष्ठसुखाद्युत्पादकविलक्षणसंयोगाश्रयत्वं। परमाणुरूपमिति। रूपपदस्य परमाणुत्ववति लक्षणा। पृथिव्यादिपरमाणव इव मनांस्यपि परमाणूनीति भावः।

एवं द्रव्याणि न्यरूप्यन्त। अथ गुणा निरूप्यन्ते। तत्र प्रथमं रूपं निरूपयन् लक्षयति चक्षुरिति। चक्षुरेव चक्षुर्मात्रम्। तेन ग्राह्यः।

एवकारस्तावत् स्वसमभिव्याहृतपदार्थस्य येन सम्बन्धेन यस्मिन् पदार्थेऽन्वयः समभिव्याहृततत्पदार्थभिन्नपदार्थप्रतियोगिकतत्सम्बन्धाभावं तस्मिन् पदार्थे प्रतिपादयति । अत्र च चक्षुःपदार्थस्य तृतीयार्थे जन्यत्वे निरूपितत्वसम्बन्धेनान्वय इति एवकारश्चक्षुर्भिन्ननिरूपितत्वाभावार्थवाचकः । तस्य तृतीयार्थ एव जन्यत्वेऽन्वयः । य एवकारार्थः स मात्रपदार्थ इति । यद्वा एवकारसमभिव्याहृतपदार्थे यादृशविशिष्टार्थसम्बन्धो विशिष्टवाक्येन प्रतिपाद्यते, तादृशविशिष्टार्थाभावव्याप्यभेदप्रतियोगित्वमेवकारार्थः । तस्य समभिव्याहृतपदार्थेऽन्वयः । यथा जले मधुररस एवेत्युक्तौ मधुररसे जलवृत्तित्वं वाक्येन प्रतिपाद्यते । एवकारस्य जलवृत्तित्वाभावव्याप्यभेदप्रतियोगित्वमर्थः । तस्य मधुररसेऽन्वयः । यत्र यत्र मधुररसभेदस्तिक्तरसादौ तत्र जलवृत्तित्वाभाव इति व्याप्तिः । जले इति सप्तम्या आधेयत्वमर्थो मधुररसेऽन्वेति । तथा च जलवृत्तित्वाभावव्याप्यभेदप्रतियोगित्वाश्रयो जलनिरूपिताधेयत्वाश्रयो मधुररस इति बोधः । अत्र चैवकारार्थे घटको भेदः साजात्यरूपः । साजात्यं च वक्तृबुद्ध्यनुसारेण तत्र तत्र विलक्षणम् । अतो जले मधुररसभिन्नशीतस्पर्शादेः सत्त्वेऽपि न वाक्यार्थक्षतिः । रसानां मध्ये जले मधुर एवेत्येव वक्तुस्तात्पर्येण रसान्तर्भूतत्वघटितसाजात्यस्य भेदपदार्थत्वात् । तथा च प्रकृते चक्षुर्ग्राह्यो गुणो रूपमिति वाक्येन चक्षुषि रूपविषयकग्रहनिष्ठजन्यतानिरूपकत्वस्य बोधात् मात्रपदस्य रूपविषयकग्रहनिष्ठजन्यतानिरूपकत्वाभावव्याप्यभेदप्रतियोगित्वमर्थः । तस्य चक्षुष्यन्वयः । चक्षुःपदार्थस्य तृतीयार्थे जन्यत्वे । तस्य ग्रहधात्वर्थे ज्ञाने । समासे च मात्रपदं तादृशभेदप्रतियोगिचक्षुर्जन्येत्यर्थलाक्षणिकम् । अभेदेन तस्य ग्रहेऽन्वयः । ण्यत्प्रत्ययस्य विषयतावानर्थः । ग्रहस्य विषयतायां निरूपितत्वं सम्बन्धः । तथा च तादृशविषयतावदभिन्नगुणाभिन्नं रूपमिति बोधः । एव-

कारार्थघटकव्याप्यव्यापकभावनिवेशे गौरवमिति लाघवाच्चक्षुर्भिन्नाग्राह्यत्वे सति चक्षुर्ग्राह्यत्वे सति गुणत्वमिति रूपलक्षणं फलति । अथ वा एवकारसमभिव्याहृतपदार्थे यादृशविशिष्टवाक्यार्थसम्बन्धो वाक्येन बोध्यते, तादृशविशिष्टार्थव्यापकत्वमेवकारार्थः । जले मधुररस एवेति वाक्यस्य रसमध्ये जले मधुर एवेत्यत्र तात्पर्यात् जलवृत्तिरसत्वव्यापकत्वं मधुररसे बोध्यते । व्यापकत्वमभेदसम्बन्धेन । प्रकृतवाक्यस्य चेन्द्रियेषु मध्ये चक्षुषैव ग्राह्यं रूपमित्यर्थे तात्पर्यात् चक्षुषीन्द्रियान्तर्गतत्वविशिष्टं गुणविशेषविषयकग्रहनिष्ठजन्यतानिरूपकत्वं वाक्येन बोध्यत इति मात्रपदस्य तादृशबोध्यमानधर्मव्यापकत्वमर्थः । अथ वा एवकारसमभिव्याहृतपदार्थस्य यादृशविशिष्टार्थेन यः सम्बन्धः प्रकृतवाक्यसिद्धः, तस्मिन् तादृशपदार्थं प्रति तेन सम्बन्धेन व्यापकत्वमेवकारार्थः । तादृशविशिष्टार्थव्यापकत्वं च तादृशविशिष्टार्थनिष्ठाभावाप्रतियोगित्वमात्रम् । प्रकृते च चक्षुषि रूपात्मकगुणविशेषविषयकग्रहनिष्ठजन्यत्वं प्रति निरूप्यनिरूपकभावसम्बन्धेन व्यापकत्वमेवकारावगम्यम् । तस्य चक्षुष्याश्रयतासम्बन्धेनान्वयः । एवं चक्षुषि गुणविशेषग्रहजननव्यापकत्वोक्तौ रूपे चक्षुरितराग्राह्यत्वं फलति । इदं च संख्यावारणाय । गुरुत्ववारणाय चक्षुर्ग्राह्यत्वदलम् । यद्वस्तु यदिन्द्रियग्राह्यं तन्निष्ठा जातिस्तदभावोऽपि तदिन्द्रियग्राह्याविति न्यायेन रूपत्वादावतिव्याप्तिरिति गुणत्वनिवेशः । अत्र चक्षुर्भिन्नेन मनसा रूपस्य ग्राह्यत्वादसम्भवः । अतो बहिरिन्द्रियेषु मध्ये चक्षुषैव ग्राह्यमित्यत्र वाक्यतात्पर्यात् चक्षुर्भिन्नबहिरिन्द्रियाग्राह्यत्वे सतीति प्रथमदलार्थः । एतावता गुरुत्वात् त्वगग्राह्यत्वे सतीत्येव निवेश्यम् । तथा च त्वगग्राह्या चक्षुर्ग्राह्या च या जातिस्तद्वद्गुणत्वं लक्षणम् । एवं च न परमाणुरूपेऽव्याप्तिः । त्वगग्राह्यत्वे सतीति पृथग्रूपविशेषणत्वेनानिवेश्य जातौ तन्निवेशा-

शचित्रभेदात् सप्तविधम् । पृथिवीजलतेजोवृत्ति । तत्र पृथिव्यां सप्तविधम्, अभास्वरशुक्लं जले, भास्वरशुक्लं तेजसि ।

रसनग्राह्यो गुणो रसः । स च मधुराम्ललवणकटुकषायतिक्तभेदात् षड्विधः । पृथिवीजलवृत्तिः । तत्र पृथिव्यां षड्विधः, जले तु मधुर एव ।

घ्राणग्राह्यो गुणो गन्धः । स द्विविधः सुरभिरसुरभिश्चेति । पृथिवीमात्रवृत्तिः ।

त्वगिन्द्रियमात्रग्राह्यो गुणः स्पर्शः । स त्रिविधः शीतोष्णानुष्णाशीतभेदात् । पृथिवीजलतेजोवायुवृत्तिः । तत्र शीतं जले, उष्ण-

---

त्रातीन्द्रियसंख्यायामतिव्याप्तिः । प्रभात्वजातिमादाय प्रभायामतिव्याप्तिवारणाय गुणत्वम् । तच्चेत्यादि । पूर्ववदर्थः । शुक्लेति । शुक्लादिशब्दाः पुंसि, चित्रशब्दः क्लीबे । पृथिवीजलतेजोवृत्तीति । तेषु वृत्तिर्यस्येति विग्रहः । वृत्तिपदं पृथिवीजलतेजोनिरूपिताधेयतावल्लाक्षणिकम् । तत्र पृथिवीजलतेजस्सु । घटकत्वं सप्तम्यर्थः पृथिव्यामन्वेति । तदित्यनुषज्यते । तद्घटकपृथिवीवृत्ति रूपं सप्तविधमिति । अभास्वरशुक्लमिति । तदित्यनुषङ्गाज्जलनिरूपिताधेयतावद्रूपमभास्वरशुक्लाभिन्नमिति बोधः । नात्राभास्वरशुक्लोद्देशेन जलवृत्तित्वं विधेयम् । अभास्वरशुक्लत्वस्य पूर्वमज्ञातत्वात् , तस्य पृथिव्यामपि सत्त्वाच्च । अतस्तदित्यनुषङ्गाज्जलवृत्तिरूपोद्देशेनाभास्वरशुक्लविधानम् । भास्वरत्वं परप्रकाशकत्वम् , तेजोरूपमात्रवृत्तिजातिरेव वा । असुरभिरिति । सुरभिभिन्न इत्यर्थः । स च द्विविधो दुर्गन्ध उपेक्षणीयगन्धश्चेति । पृथिवीमात्रवृत्तिरिति । गन्धनिष्ठाधेयतानिरूपकत्वव्यापकत्वं मात्रपदार्थः । समासे वृत्तिपदं पृथिवीतरावृत्तित्वविशिष्टपृथिवीवृत्तित्वविशिष्टे लाक्षणिकम् । त्वगित्यादि । रूपलक्षणवाक्योक्तरीत्या सर्वमनुसन्धेयम् । एवञ्च गुणपदं वायोः प्रत्यक्षत्वमते तत्रातिव्याप्तिवारणाय । उष्ण इति । ननु 'गुणे शुक्लादयः पुंसी'ति शुक्लादिशब्दानां गुणवाचित्वे पुंल्लिङ्गमेव युक्तमिति प्रतीयते । अथाप्य-

स्तेजसि, अनुष्णाशीतः पृथिवीवाय्वोः। रूपादिचतुष्टयं पृथिव्यां भास्वरशुक्लमित्यादिः प्रयोगस्तच्छब्दानुषङ्गेण समर्थनीयः; शुक्लादिशब्दानां सर्वत्र विशेष्यसमानलिङ्गत्वमेव। एवञ्च विशेष्यानुपादाने 'सामान्ये नपुंसक'मिति क्लीबप्राप्तौ गुणवाचित्वे तदपवादार्थं 'गुणे शुक्लादयः पुंसी'त्युक्तमिति कोशस्यान्यतात्पर्यस्थापनात्। शीतं जल इति क्लीबनिर्देशश्च 'शीतं गुण' इति कोशाद्गुणवाचित्वे क्लीबावश्यकतया सम्यगेव। उष्ण इति तु कथम्? 'उष्णो ग्रीष्मे पुमान् दक्षाशीतयोरन्यलिङ्गक' इति गुणिवाचित्वे विशेष्यलिङ्गत्वेऽपि 'शीतोष्णमांसरुधिरमुखाक्षिद्रविणं बल'मिति क्लीबसङ्ग्रहे पठितत्वेन गुणवाचित्वे क्लीबस्यावश्यकत्वात्। न च स इति स्पर्शवाचिविशेष्यपदानुषङ्गात् विशेष्यानुपादानाभावात्पुंल्लिङ्गमिति वाच्यम्। शीतमिति पूर्वं प्रयुक्ततयाऽनुषङ्गाभावदर्शनात्। न चानुषङ्गेऽननुषङ्गे वा शीतमिति क्लीब एव। अन्यथा शीतं गुण इति कोशवैयर्थ्यादिति वाच्यम्। तर्हि शीतोष्णेति कोशावैयर्थ्यायोष्णशब्देऽपि क्लीबस्यैव युक्तत्वादिति चेत्, सत्यम् शीतमित्यत्रानुषङ्गाभावेऽप्यत्रानुषङ्गस्याध्याहारस्य वाऽङ्गीकारेणैव पुंल्लिङ्गोपपत्तिः। अत एवोपर्यनुष्णाशीत इत्यप्युपपन्नम्। कोशस्तु विशेष्यानुपादाने सामान्ये नपुंसकस्य प्राप्तस्यानुवादमात्रमिति बहुलप्रयोगानुसारेण कोशस्यान्यथा नयनमिति। अथ वा सुरभ्यादिशब्दवद्धर्मिपर्यन्तवाचिन उष्णादिशब्दस्योष्णानिष्ठेत्येवं लक्षणयाऽर्थः। द्रव्येष्विव गुणादिष्वपि नित्यानित्यविवेको व्युत्पादनीयः। तत्र रूपरसगन्धस्पर्शेषु विवेक एकरूप इति तत्र तत्र पृथगनुक्त्वा चतुष्टयनिरूपणानन्तरमेकदैव तं व्युत्पादयति रूपादीति। रूपमादिर्येषां रूपरसगन्धस्पर्शानां ते रूपादयः। तेषां चतुष्टयम्। षष्ठ्यर्थो घटितत्वम्। आदिपदे बहुव्रीहिप्रयुक्ता चतुष्टयपदेन सह तत्पुरुषप्रयुक्ता च लक्षणा। अतो रूपतद्भिन्नघटितेत्यर्थः। चत्वारोऽवयवा यस्य तच्चतुष्टयम्। यच्छब्दः समुदायपरः। अव-

पाकजमनित्यं च, अन्यत्रापाकजं नित्यमनित्यं च, नित्यगतं नित्यम्, अनित्यगतमनित्यम् ।

चत्वारः घटकाः । षष्ठ्यर्थो निरूपितत्वम् । तथा च यन्निरूपितनिरूपितत्वाश्रयघटकताश्रयाश्चत्वारः । चतुर्घटितसमुदाय इति समासार्थः । रूपतद्भिन्नघटिताभिन्न-चतुर्घटितसमुदाय इति विशिष्टार्थः । अर्थाद्रूपादय एव चत्वार इति सिद्ध्यति । **पृथिव्यां रूपादिचतुष्टयं** पृथिवीनिरूपिताधेयत्वाश्रयतच्चतुष्टयम् । **पाकजं** पाकाज्जायत इति । पाकपदं पाकनिरूपिते लाक्षणिकम् । अभेदेन जनिधात्वर्थजन्यतायामन्वयः । पाको विलक्षणतेजःसंयोगः । पाकनिरूपिताभिन्नजन्यताश्रयाभिन्नमिति विशिष्टार्थः । चार्थसमुच्चयस्यात्रानित्यमित्यत्र चान्वयः । पाकजत्वादनित्यमिति तात्पर्यम् । नात्र सर्वं पाकजमित्युच्यते, अपाकजस्याप्यवयवरूपादिजन्यस्य रूपादेः पटादौ सत्त्वात् । किं तु 'अनित्यगतमनित्यमित्यत्र न विवादः । नित्यगतविषये विवेचने जलपरमाण्वादौ पाकाभावान्नित्यम् । पाकसत्त्वात्तु पृथिवीपरमाणुगतमप्यनित्य'मितीहाभिसन्धिः । अथ वा **पाकज**मिति । साक्षात् परम्परया वा पाकप्रयोज्यमित्यर्थः । **अन्यत्र** पृथिवीभिन्ने । आधेयत्वं सप्तम्यर्थः । **रूपादी**त्यनुषज्यते । न तु रूपादिचतुष्टयमिति, जलादौ गन्धाभावेन चतुष्टयासम्भवात् । पृथिवीभिन्ननिरूपिताधेयतावत् रूपतद्भिन्नमित्यर्थः । पूर्वं रूपादीति पृथक्पदमपि चतुष्टयविशेषणं कर्तुं शक्यम् । तदा रूपमादिर्यस्मिन्निति विग्रहः । **चे**त्यपाकजसमुच्चये । ननु पाकजत्वादनित्यत्वेऽपाकजत्वान्नित्यत्वमेवेति कथमनित्यत्वमपि । एवमेकस्य नित्यत्वमनित्यत्वं चायुक्तम् । यदि क्वचिन्नित्यत्वमन्यत्रानित्यत्वं च विवक्षितम् । तर्हि कुत्रेत्यत्राह **नित्ये**ति । नित्ये गतम् । **गतं** प्राप्तमाधेयमित्यर्थः । **नित्य**मिति । द्वितीयार्थो निरूपितत्वं । नित्यपदस्य नित्यनिरूपिते लक्षणा । आधेयतायामभेदेन तदन्वयः । अनित्यगतमाश्रयोत्प-

एकादिव्यवहारहेतुः संख्या। नवद्रव्यवृत्तिः। एकत्वादिपरार्धपर्यन्ता। एकत्वं द्विविधं नित्यमनित्यं चेति। नित्यगतं नित्यम्, अनित्यगतमनित्यम्, द्वित्वादिकं तु सर्वत्रानित्यमेव ।

त्तावुत्पद्यते आश्रयनाशे नश्यति । नित्यगतं त्वनादित्वान्नोत्पद्यते, नाशकाभावाच्च न नश्यतीति भावः ।

संख्यां लक्षयति एकेति। एक इत्यादिर्येषां ते । एकादयश्च ते व्यवहाराश्च तेषां हेतुः। व्यवहारपदमेकतद्भिन्नशब्दप्रयोगनिरूपितेत्यर्थकम्। हेतुः जनकज्ञानविषयः। जनकत्वे तदन्वयः । तथा चैकशब्दादिप्रयोगजनकतावच्छेदकप्रकारताश्रयः संख्येत्युक्तं भवति । एकत्वादिव्यवहारहेतुरिति पाठे तु जनकतावच्छेदकविशेष्यताश्रयत्वमेव लक्षणम्, न तु प्रकारताश्रयत्वम्। ननु किमेकव्यवहारहेतुत्वं द्विव्यवहारहेतुत्वमित्यादि पृथग्लक्षणम्, उत तत्तद्व्यवहारान्यतमहेतुत्वमित्येकं लक्षणम् । नाद्यः, पृथग्लक्षणस्य संख्यायामेकैकस्यामेव सम्भवेन संख्यान्तरेष्वव्याप्तेः । नान्त्यः, विशिष्य परार्धपर्यन्तसंख्याज्ञानस्य युगपद्दुर्लभत्वादिति चेदुच्यते। संख्याशब्दप्रयोगजनकतावच्छेदकविशेष्यताश्रयत्वमेव संख्यालक्षणम्। एकादीत्येतत्तु प्रत्येकसंख्यालक्षणमिति । एकत्वमादिर्यस्याः सा । परार्धं पर्यन्तः पर्यन्ते वा यस्याः सा। एकत्वादिश्च सा परार्धपर्यन्ता चेति कर्मधारयः। षष्ठ्या घटकत्वमर्थ एकत्वे परार्धे चान्वेति । एकत्वस्यादित्वं प्राथम्यं स्वस्मात् पूर्वं संख्यान्तरराहित्यं स्वव्याप्यसंख्याशून्यत्वं स्वभिन्नसंख्याव्यापकत्वाभाव इति यावत् । पर्यन्तश्च स्वस्मादूर्ध्वं संख्यान्तरराहित्यं स्वसंख्याभिन्नसंख्याव्याप्यत्वाभावः। पर्यन्त इति सप्तम्याः सम्बन्धो वैशिष्ट्यमर्थः। बहुव्रीहौ लक्षणया स्वभिन्नसंख्याव्यापकत्वाभाववदेकत्वघटिताभिन्न, संख्यान्तरव्याप्यत्वाभाववत्परार्धघटिताभिन्नेत्यर्थः। द्वित्वादिकमिति। द्वित्वमादिर्यस्य तत् । आदित्वं स्वभिन्न- यत्पदार्थघटकसंख्याव्यापकत्वाभावः ।

मानव्यवहाराऽसाधारणकारणं परिमाणम् । नवद्रव्यवृत्ति ।

द्वित्वस्यैकत्वव्यापकत्वेऽपि यत्पदार्थघटकत्वेनाभिमता याः संख्यास्तद्घटकसंख्यान्तराव्यापकत्वमस्त्येव । समासार्थस्तु द्वित्वव्याप्यत्वाभाववत्संख्येति । सर्वत्रेत्यस्य पूर्वेणान्वयः । सर्वं नित्यमनित्यं च । नित्यानित्यवृत्तितादृशसंख्येत्यर्थः । एवकारार्थो व्यापकत्वमभेदसम्बन्धेन । द्वित्वादिव्यापकताश्रयानित्याभिन्नमित्यर्थः । द्वित्वादिकं वस्तुनि न सर्वदा वर्तते । इदमेकमिदमेकमित्यपेक्षाबुद्धौ सत्यामुत्पद्यते । अपेक्षाबुद्धिनाशे च नश्यतीत्यनित्यमेवेति भावः । परार्धसंख्या नामाष्टादशभिर्वारैर्दशगुणोत्तरैकत्वसंख्येति कश्चित् ।

मानेति । मानमिति व्यवहारः शब्दप्रयोगस्तस्यासाधारणं कारणं कारणतावत् । साधारणमित्यस्य तत्सम्बन्धित्वे सति तद्भिन्नसम्बन्धीत्यर्थः । प्रकृते च मानव्यवहारतद्भिन्नसम्बन्धीत्यर्थः । सम्बन्धित्वं प्रकृते निरूपितत्वम् । तथा च मानव्यवहारतद्भिन्नोभयनिरूपितभिन्नमसाधारणम् । मानव्यवहारभिन्नानिरूपितमानव्यवहारनिरूपितकारणताश्रयः परिमाणमिति फलितम् । मानव्यवहारतद्भिन्नोभयनिरूपितकारणता हि नाम तदुभयनिष्ठकार्यतानिरूपितकारणतैव । उभयनिष्ठकार्यतायामुभयनिष्ठ एव धर्मोऽवच्छेदकः । स च धर्मः कार्यत्वम् । अतः 'कार्यत्वावच्छिन्नकार्यतानिरूपितकारणता साधारणकारणता', 'कार्यत्वानवच्छिन्नकार्यतानिरूपितकारणत्वमसाधारणकारणते'ति व्यवहारः । कार्यसामान्यकारणे कालादृष्टादौ मानव्यवहारं प्रत्यपि कारणत्वसत्त्वादतिव्याप्तिरतोऽसाधारणेति । वस्तुतस्तु व्यवहारे व्यवहर्तव्यज्ञानमेव कारणम् । न तु व्यवहर्तव्यमिति प्रकृतलक्षणस्य कारणत्वरूपस्यासम्भवः स्यात् । अतो मानव्यवहारकारणीभूतज्ञानविशेष्यत्वमेव पूर्ववदुक्तव्यम् । मानव्यवहारकारणतावच्छेदकविशेष्यताश्रयत्वमिति यावत् । इदं च न कालादृष्टादौ । तस्य हि स्वरूपत

तच्चतुर्विधम्, अणु महत् दीर्घं ह्रस्वं चेति।

पृथग्व्यवहारासाधारणकारणं पृथक्त्वं, सर्वद्रव्यवृत्ति।

संयुक्तव्यवहारहेतुः संयोगः, सर्वद्रव्यवृत्तिः।

संयोगनाशको गुणो विभागः, सर्वद्रव्यवृत्तिः।

एव कारणत्वम्, न तु ज्ञानद्वारा। एवं चैवं परिष्कारसूचनायैवासाधारणेत्युक्तमिति। अणु महद्दीर्घं ह्रस्वमिति अणुत्वं महत्त्वं दीर्घत्वं ह्रस्वत्वमित्यर्थः। यथाश्रुते तेषां परिमाणविशिष्टवाचित्वमेव, न परिमाणमात्रवाचित्वमिति। यद्यपि परिमाणादारभ्य नित्यानित्यविवेको ग्रन्थकृता न प्रादर्शि, अथापि स यथायथं परिशीलनीयः।

पृथगिति। सर्वं पूर्ववत्। संयुक्तेति। संयुक्ते इति व्यवहारः। संयोगस्य द्विनिष्ठत्वात् द्विवचनं युक्तमिति। संयुक्तशब्दजनकतावच्छेदकप्रकारताश्रयत्वं लक्षणम्। संयोगेति। नश धातोर्ध्वंसोऽर्थः। संयोगस्येति षष्ठ्यर्थोऽनुयोगित्वम्। यस्याभावः स प्रतियोगी। अभावोऽनुयोगी। समासे संयोगपदस्य संयोगानुयोगिनि लक्षणा। ण्वुलो जनकतावानर्थः। संयोगानुयोग्यभिन्नध्वंसनिरूपितजनकतावदभिन्नो गुणाभिन्न इति। संयोगनाशजनकत्वे सति गुणत्वं लक्षणम्। क्रिया, क्रियातो विभागः, विभागात् पूर्वसंयोगनाशः, उत्तरसंयोगोत्पत्तिः, क्रियानाश इति क्रमः। एवं संयोगनाशकत्वं विभागस्य। इदं च कर्मणोऽप्यस्ति। क्रियाभावे संयोगनाशोत्पत्त्यसम्भवात्। पूर्वजातविभागं प्रति अनन्तरजनिष्यमाणोत्तरसंयोगं च प्रतीव मध्ये जायमानं संयोगनाशं प्रत्यपि हेतुत्वस्य युक्तत्वाच्च। अतो गुणत्वनिवेशः। एवमप्यदृष्टेऽतिव्याप्तिः। अतः संयोगनाशत्वावच्छिन्नजन्यतानिरूपितजनकतावत्त्वे सतीति पूर्वदलं परिष्कार्यम्। अदृष्टे कार्यत्वावच्छिन्नजन्यतानिरूपितजनकतैवास्ति, न त्वियम्।

परापरव्यवहारासाधारणकारणे परत्वापरत्वे। ते द्विविधे, दिक्कृते कालकृते चेति। दूरस्थे दिक्कृतं परत्वम्। समीपस्थे दिक्कृतमपरत्वम्। ज्येष्ठे कालकृतं परत्वम्। कनिष्ठे कालकृतमपरत्वम्।

आद्यपतनासमवायिकारणं गुरुत्वम्। पृथिवीजलवृत्ति।

आद्यस्यन्दनासमवायिकारणं द्रवत्वम्। पृथिवीजलतेजोवृत्ति।

परेति। परं चापरं चेति परापरे। ते इति व्यवहारौ तयोरसाधारणकारणे। परव्यवहारासाधारणकारणत्वं परत्वलक्षणम्, अपरव्यवहारासाधारणकारणत्वमपरत्वस्य। अन्यत् पूर्ववत्। दिक्कृते दिशा कृते। कृञ उत्पत्त्यनुकूलव्यापारोऽर्थः। क्तप्रत्ययस्य फलवदित्यर्थः। आधेयत्वं तृतीयार्थः। समासे दिक्पदस्य दिङ्निष्ठे लक्षणा। दिङ्निष्ठाभिन्नो य उत्पत्त्यनुकूलव्यापारस्तज्जन्यफलवती इत्यर्थः। यत्र देशमादाय परत्वादिवर्णनम्, तत्र दिक्कृतत्वम्। कालमादाय, कालकृतत्वमिति दर्शयति दूरेति। दूरशब्दस्याधिकसंयुक्तसंयोगपरम्परावदित्यर्थः। दूरे तिष्ठतीति दूरस्थम्। सप्तम्या निरूपितत्वं स्थाधातोराधेयत्वं प्रत्ययस्याश्रयतावच्चार्थः। अधिकसंयुक्त-संयोगपरम्परावन्निरूपिताभिन्नाधेयताश्रयनिरूपिताधेयतावत्परत्वं दिक्कृताभिन्नमिति बोधः। समीपशब्दो न्यूनसंयुक्तसंयोगपरम्परावदर्थकः। ज्येष्ठोऽधिकक्षणवान्। कनिष्ठो न्यूनक्षणवान्।

आद्येति। आद्यं पतनं तस्यासमवायिकारणमसमवायिकारणतावत्। असमवायिकारणत्वान्वयि निरूपितत्वं षष्ठ्यर्थः। पतनपदस्याद्यपतननिरूपिते लक्षणा। आद्यत्वं प्राथम्यं प्रथमोत्पन्नत्वम्। तच्च लाघवात् पतनध्वंसासमानकालिकत्वम्। प्रकृताद्यपतनात् पूर्वमपि कुत्रापि पतनस्य जनिध्रौव्यादिदमसम्भवीति पतने स्वसमानाधिकरणेति विशेषणं देयम्। नन्वेकमेव वस्तु प्रथमतः पतितं पुनरुत्क्षिप्तं पुनः पतति। तत्र द्वितीयवारपतनक्रियास्वप्याद्यपतनमस्तीति वक्तव्यम्। तत्रेदं स्वसमानाधिकरण-

तत् द्विविधम्, सांसिद्धिकं नैमित्तिकं चेति । सांसिद्धिकं जले ।

पतनध्वंसासमानकालिकत्वं न भवति । तस्य प्रथमवारीयपतनध्वंसकालि-त्वादिति चेन्मा भूदाद्यत्वं । तद्वस्तुनिष्ठगुरुत्वे प्रथमवारीयाद्यपतनमादाय लक्षणं समन्वितमेवेति । अथापि तत्राद्यत्वव्यवहारस्य क्रियमाणतया तदनुगुणं वक्तव्यमिति चेत् स्वसमानाधिकरणपतनध्वंसोत्पत्त्यसमानकालिक-त्वमाद्यत्वमित्युच्यताम् । द्वितीयवारीयाद्यपतनमपि न प्रथमवारीयपतन-ध्वंसोत्पत्तिकालिकम् । तद्ध्वंसानां प्रागेवोत्पन्नत्वादिति । द्वितीयादि-पतनं प्रति वेगोऽसमवायिकारणम् । तत्रातिव्याप्तिरित्याद्येति । द्रवत्वेऽतिव्याप्ति-वारणाय पतनेति । प्रस्तरादौ समवायिकारणेऽतिव्याप्तिरित्यसमवायीति । पतनमधोदेशसंयोगानुकूलक्रिया । स्यन्दनं निम्नदेशसंयोगानुकूलक्रिया । **सांसिद्धिकमिति** संसिद्धौ भवं सांसिद्धिकम् । संसिद्धिस्स्वभाव आश्रय-सत्ता । भवं सत्तावत् । सप्तम्यर्थः प्रयोज्यत्वम् । प्रत्ययार्थैकदेशसत्तायां संसि-द्धेः प्रयोज्यतासम्बन्धेनान्वयः । आश्रयसत्ताप्रयोज्यसत्तावत् । आश्रयस-त्तामात्रप्रयोज्यसत्ताकम् । अग्निसंयोगानधीनमिति यावत् । **नैमित्तिक-मिति** । निमित्तमवयवगुणातिरिक्तासमवायिकारणम् । घटपटादौ द-हनतपनादौ च द्रवत्वादर्शनात्स्थलं विशिष्य दर्शयंस्तत्रासाधारणकारणमपि विशिष्य निर्दिशति **पृथिव्यामित्यादिना** । पृथिव्यामिति सप्तम्यर्थो घट-कत्वं घृताद्यन्वयि । पृथिव्यामित्यस्य घृतादाविति विशेषणं वा । तदा सप्तम्यर्थ आधेयत्वं द्रवत्वान्वयि । घृतमादिर्यस्याः सा । आदिना जतुप्रभृतिपरिग्रहः । घृततद्भिन्नाभिन्नपृथिवीनिरूपिताधेयतावत् द्रवत्व-मग्निप्रतियोगिकसंयोगनिरूपिताभिन्नजन्यतावत् । संयोगपदेऽग्निप्रतियोगि-कसंयोगनिरूपिते लक्षणा । पृथिव्यां द्रवत्वं घृतादिवृत्ति अग्निसंयोगजं चेत्यर्थेऽनेकविधानाद्वाक्यभेदस्स्यात् । 'घृतादावग्निसंयोगजं द्रवत्वं पृथिवीवृत्ति' 'पृथिवीवृत्तिद्रवत्वं घृताद्यग्निसंयोगजन्य'मित्येवमपि सुवचम् । अथापि घृता-

नैमित्तिकं पृथिवीतेजसोः । पृथिव्यां घृतादावग्निसंयोगजं द्रवत्वम् । तेजसि सुवर्णादौ ।

चूर्णादिपिण्डीभावहेतुर्गुणः स्नेहः । जलमात्रवृत्तिः ।

दिः पृथिवीति स्पष्टप्रतिपत्तिः पूर्वरीतौ । अग्निसंयोगजद्रवत्वं घृतादिपृथिवीवृत्तीत्यन्वये तु तादृशद्रवत्वसामान्यस्योद्देश्यत्वं न भवतीति विशेषस्यैवोद्देश्यत्वं स्वीकर्तव्यम् । सुवर्णादाविति । द्रवत्वमग्निसंयोगजमित्यनुषज्यते । आदिना रजतादिग्रहणम् । अत्र 'सार्पिर्जतुमधूच्छिष्टानां * पार्थिवानामग्निसंयोगात् द्रवत्वमद्भिः सामान्यम्', 'त्रपुसीसलोहरजतसुवर्णानामग्निसंयोगात् द्रवत्वमद्भिः सामान्यम्' इति सूत्रे अनुसन्धेये ।

चूर्णेति । आदिना गुडपरिग्रहः । अपिण्डस्य पिण्डस्य भावः पिण्डीभावः । अपिण्डस्य पूर्वकालिकपिण्डत्वाभाववतः । पिण्डशब्दो विलक्षणसंयोगविशिष्टवाची । भावस्सत्ता । अपिण्डाभिन्नपिण्डवृत्तिसत्तेति विग्रहार्थः । समासे च्विप्रत्ययार्थः समभिव्याहृतपदार्थतावच्छेदकपिण्डत्वादिधर्मः । तत्र पिण्डपदार्थस्याधेयत्वपूर्वकालावच्छिन्नस्वनिष्ठाभावप्रतियोगित्वोभयसम्बन्धेनान्वयः । च्विप्रत्ययार्थपिण्डत्वस्य भावपदार्थे सत्तायां सामानाधिकरण्यसम्बन्धेन । तथा च पिण्डनिरूपिता या पूर्वकालावच्छिन्नाभावप्रतियोगित्वविशिष्टाधेयता तद्वद्धर्मविशिष्टसत्तेति पिण्डीभावशब्दार्थः । प्रकृते विलक्षणसंयोग इत्येतावदेव विवक्षितम् । तस्य हेतुः कारणतावान् । समासे पिण्डीभावशब्दे चूर्णतद्भिन्नवृत्तिविलक्षणसंयोगनिरूपितेत्यर्थलक्षणा । अभेदेन कारणतायामन्वयः । स्नेहो जले वर्तमानः स्वाश्रयसंयुक्तत्वसम्बन्धेन चूर्णादौ सम्बद्धय तत्र समवायेन विलक्षणसंयोगमुत्पादयतीति तदसाधारणं निमित्तकारणम् । चूर्णादीति न लक्षणघटकम् । किं तु पिण्डीभावः कस्येत्यत्र सम्बन्धिप्रदर्शनार्थम् । विलक्षणसंयोगत्वावच्छिन्नकार्यतानिरूपि-

* अस्मदीये वैशेषिकदर्शनविमर्शे इदं द्रष्टव्यम् ।

श्रोत्रग्राह्यो गुणः शब्दः । स द्विविधः, ध्वन्यात्मको वर्णात्मकश्चेति । ध्वन्यात्मको भेर्यादौ । वर्णात्मकः संस्कृतभाषादिरूपः ।

सर्वव्यवहारहेतुः ज्ञानं बुद्धिः । सा द्विविधा, स्मृतिरनुभवश्चेति ।

तकारणतावत्त्वे सति गुणत्वं लक्षणम् । चूर्णादावतिव्याप्तिवारकं गुणत्वम् ।

ध्वनीति । ध्वनिरात्मा यस्य । आत्मा स्वरूपमसाधारणधर्मविशिष्टव्यक्तिः । षष्ठ्यर्थ आधेयत्वं धर्मेऽन्वेति । समास आत्मशब्दस्य ध्वनित्वविशिष्टे लक्षणा । भेर्यादाविति सप्तम्यर्थोऽवच्छेद्यत्वम् । भेरीतद्भिन्ननिरूपिताधेयतावान् ध्वनित्वविशिष्टाभिन्नशब्दः । भेर्याद्यवच्छेदेन हि ध्वनिराकाशे जायते । संस्कृतेति । आदिना संस्कृतभाषाव्यतिरिक्तानां सर्वासामपभ्रंशभाषाणां ग्रहणम् । संस्कृतभाषादिषु रूपं यस्येति विग्रहः । भाषा हि ज्ञानजनकवर्णसमुदायः । तद्घटकं वर्णस्वरूपमिति । सर्वेति । सर्वश्चासौ व्यवहारश्च तस्य हेतुः । सर्वत्वं समभिव्याहृतपदार्थतावच्छेदकव्यापकं बुद्धिविशेषविषयत्वम् । तत्पर्याप्त्यधिकरणं सर्वशब्दार्थः । व्यवहारपदस्य तादृशबुद्धिविशेषविषयतापर्याप्त्यधिकरणव्यवहारनिरूपितेति लक्ष्यार्थोऽभेदेन हेतुत्वेऽन्वेति । तादृशहेतुत्ववदभिन्ना ज्ञानाभिन्ना बुद्धिरिति बोधः । ननु संख्यादीनामपि यत्किञ्चिद्व्यवहारहेतुत्वस्य प्रागुक्तत्वात्तत्रातिव्याप्तिवारणाय सर्वपदमिति वक्तव्यम् । नैतच्छक्यम् । अत्र हि हेतुत्वं जनकत्वमेव, न तु जनकज्ञानविषयत्वम् । ज्ञानस्य साक्षादेव कारणत्वात् । संख्यादीनां च न साक्षाज्जनकत्वमिति । तत्कुतःसर्वपदमिति चेत् सत्यम् । संख्यापरिमाणादिलक्षणे व्यवहारविशेषणतया संख्या मानेत्यादि निवेशनीयमासीत् । अन्यथाऽतिव्याप्तेः । तद्वदत्र किमपि विशेषणं व्यवहारे न देयम् । अस्यैतद्व्यवहारं प्रत्येव कारणत्वं न त्वन्यव्यवहारं प्रतीत्यस्याभावाद्व्यवहारसामान्यकारणत्वादिति बोधनार्थमेव सर्वेत्युक्तम् । अतो व्य-

संस्कारमात्रजन्यं ज्ञानं स्मृतिः ।
तद्भिन्नं ज्ञानं अनुभवः । स द्विविधः, यथार्थोऽयथार्थश्च ।

वहारहेतुत्वमेव लक्षणम् । अदृष्टेऽतिव्याप्तिवारणाय व्यवहारत्वावच्छिन्न-कार्यतानिरूपितकारणतावत्त्वमिति निष्कर्षः । ज्ञानमिति पर्यायपदं बुद्धि-शब्देनान्तःकरणादि विवक्षितमिति भ्रमव्युदासाय ।

संस्कारेति । संस्कारबहिरिन्द्रियमध्ये संस्कारमात्रजन्यं ज्ञानं स्मृतिरिति वक्त्रभिप्रायः । अतो मात्रपदं संस्कारबहिरिन्द्रियमध्यघटकवृत्ति यत् स्मृ-तिनिष्ठजन्यतानिरूपकत्वं तद्व्यापकत्वार्थकम् । व्यापकत्वमभेदसम्बन्धेन । तस्याश्रयः संस्कारः । तथा च समासे मात्रपदं संस्कारबहिरिन्द्रियमध्यघट-कवृत्ति-स्मृतिनिष्ठजन्यतानिरूपकत्वव्यापकसंस्कारनिरूपितार्थकम् । तस्य जन्यतायामभेदेनान्वयः । तथा च बहिरिन्द्रियाजन्यत्वे सति संस्कारज-न्यत्वे सति ज्ञानत्वं लक्षणं फलितम् । सेयं गौरित्यादिप्रत्यभिज्ञायां, अनु-मित्यादौ, संस्कारध्वंसे चातिव्याप्तिवारणाय क्रमेण दलानि । स्मृतेरपि मनो-जन्यत्वादसम्भवः स्यादिति बहिरिति । अत एव संस्कारेतराजन्यत्वे सतीति सामान्यरूपेण नोक्तम् । ननु सोऽयमहमिति मानसप्रत्यभिज्ञाप्रत्यक्षेऽति-व्याप्तिः । अस्य स इत्यंशे संस्कारजन्यत्वात्, अन्यांशस्य चात्मादेर्बहिरिन्द्रि-याग्राह्यतया बहिरिन्द्रियाजन्यत्वात् । न चास्य स्मृतित्वमिष्टमिति वाच्य-म् । तथा सति तुल्यन्यायेन सेयं गौरित्यस्यापि स्मृतित्वस्यैष्टव्यतया प्रथम-दलं नापेक्षितमिति मात्रपदवैयर्थ्यात् । न च प्रत्यभिज्ञायामंशत एव स्मृ-तित्वमस्ति, अंशान्तरे त्वन्यथेति तत्त्वबोधनाय मात्रपदम् । न तु लक्षणे किञ्चिन्निवेशनीयमिति वाच्यम् । तथा सति स्मृतिभिन्नं ज्ञानमनुभव इत्य-नुभवलक्षणस्य तत्राव्याप्त्यापत्तेः । तत्रानुभवत्वस्येष्टत्वादिति चेत् लौकिक-विषयताशून्यत्वे सति संस्कारजन्यत्वे सति ज्ञानत्वं स्मृतिलक्षणम् । एतत्सू-चनाय मात्रपदमिति दिक् । तद्भिन्नम् स्मृतिभिन्नं संस्कारमात्रजन्यभि-

तद्वति तत्प्रकारकानुभवो यथार्थः । सैव प्रमेत्युच्यते । यथा रजते इदं रजतमिति ।

न्नम् । तस्माद्भिन्नमिति पञ्चम्यर्थोऽनुयोगित्वं भेदेऽन्वेति । तच्छब्दस्य संस्कारमात्रजन्यानुयोगिनि लक्षणा । क्तप्रत्ययार्थ आश्रयतावत् । तद्भिन्नत्वं घटादावपि, ज्ञानत्वं स्मृतावपीति दलद्वयम् ।

यथाभूतोऽर्थो यस्मिन्ननुभवे स यथार्थः । यथाभूत इत्यस्य प्रकारविशिष्ट इत्यर्थः । अयथेत्यस्य प्रकारशून्य इत्यर्थः । प्रकारविशिष्टवस्तुविषयको यथार्थः प्रकारशून्यवस्तुविषयकोऽयथार्थ इत्युक्तं भवति । इदमनुसृत्य तयोर्लक्षणं स्मृतिव्यावर्तकदलघटितमाह **तद्वतीत्यादिना** । सोऽस्यास्तीति तद्वान् । मतुबर्थः सम्बन्धी । सम्बन्धे तच्छब्दार्थः स्वप्रतियोगित्वसम्बन्धेनान्वेति । विशेष्यित्वं च सप्तम्यर्थ आश्रयतासम्बन्धेनानुभवे । स प्रकारो यस्य स तत्प्रकारकः । प्रकारः प्रकारतावान् । षष्ठ्यर्थो निरूपितत्वं प्रकारतान्वयि । प्रकारशब्दस्य समासे तन्निष्ठप्रकारतानिरूपके लक्षणा । यथार्थः यथार्थशब्दवाच्यः । तथा च तत्प्रतियोगिकसम्बन्धवन्निरूपितविशेष्यिताविशिष्ट-तन्निष्ठप्रकारतानिरूपकानुभवाभिन्नो यथार्थशब्दवाच्याभिन्न इति बोधः । रजते इन्द्रियसन्निकर्षे सति 'इदं रजत'मिति योऽनुभवः स यथार्थः । तत्र रजतत्वं प्रकारः तत्सम्बन्धि रजतं विशेष्यमिति, विशेष्यता रजतनिष्ठा । तन्निष्ठविशेष्यतानिरूपितविशेष्यिता ज्ञानेऽस्ति । प्रकारता रजतत्वनिष्ठा । तादृशप्रकारतानिरूपितप्रकारिताऽपि ज्ञान इति तादृशप्रकारतानिरूपकत्वमपि तत्रेति लक्षणसमन्वयः । इदं रजतमित्यनुभवानन्तरं या कदाचित् 'तद्रजत'मिति यथार्थस्मृतिस्तत्रातिव्याप्तिवारणायानुभवत्वनिवेशः । तद्वतीत्यनिवेशे किञ्चित्प्रकारकत्वे सत्यनुभवत्वमित्युक्तं भवति । इदमयथार्थानुभवेऽप्यस्ति, तत्रापि कस्यचित्प्रकारत्वात् । अतस्तद्वतीत्युक्तम् । किञ्चिद्विशेष्यकत्वमात्रोक्तावपि तत्रैवा-

तिव्याप्तिः तद्ज्ञानविशेष्ये शुक्त्यादावपि कस्यचिद्धर्मस्य वर्तमानत्वात्। अतस्तत्प्रकारकत्युक्तम् । किञ्चिद्वति किञ्चित्प्रकारक इत्युक्तावपि तत्रातिव्याप्तिरेव । तस्य शुक्तित्वरूपकिञ्चिद्वति रजतत्वरूपकिञ्चित्प्रकारकत्वात् । अतः प्रथमकिञ्चित्पदेन यत् गृह्यते तदेव द्वितीयकिञ्चित्पदेन ग्राह्यमिति ज्ञापनायोभयत्र तच्छब्दप्रयोगः । नन्वेवमपि कदाचिद्रजते शुक्तौ चेन्द्रियसन्निकर्षे सति 'इमे शुक्तिरजते' इति विपरीतज्ञानमुदेति,तत्र ज्ञानेऽतिव्याप्तिः, रजतत्वप्रकारकत्वस्य रजतत्ववद्विशेष्यकत्वस्य च सत्त्वादिति चेदुच्यते । अत्र हि विपरीतज्ञाने रजतांशे शुक्तित्वं प्रकारः , शुक्त्यंशे च रजतत्वम् । अतो रजतत्ववन्निष्ठविशेष्यतानिरूपिता शुक्तित्वनिष्ठप्रकारतैव । शुक्तित्ववन्निष्ठविशेष्यतानिरूपिता च रजतत्वनिष्ठप्रकारतैव । अतो रजतत्वनिष्ठप्रकारतानिरूपकत्वस्य शुक्तित्ववद्विशेष्यकत्वस्य चावच्छेद्यावच्छेदकभावः । ययोर्विषयतयोर्निरूप्यनिरूपकभावस्तन्निरूपितविषयितयोरवच्छेद्यावच्छेदक - भाव इत्यङ्गीकारात् । एवं शुक्तित्वनिष्ठप्रकारतानिरूपकत्वस्य रजतत्ववद्विशेष्यकत्वस्य चावच्छेद्यावच्छेदकभावः । अतो रजतत्ववन्निरूपितविशेष्यित्वावच्छिन्ना रजतत्वनिष्ठप्रकारतानिरूपकता तत्र नास्ति । प्रकृते च तद्वति तत्प्रकारक इत्यनेन तद्वन्निरूपितविशेष्यित्वावच्छिन्नतन्निष्ठप्रकारतानिरूपकताशालित्वे सत्यनुभवत्वमिति लक्षणं विवक्षितम् । अतो न दोषः । सैवेत्येवकारेणायथार्थानुभवव्यवच्छेदः । अथ वा तद्वति तत्प्रकारकत्वेनानुभवसजातीयायथार्थस्मृतिर्व्यवच्छिद्यते । स्मृतेर्यथार्थत्वेऽपि न प्रमात्वमङ्गीक्रियत इति । सा यथार्थानुभवः । इतिशब्दस्यानुपूर्वीरूपप्रकारोऽर्थः । प्रमापदं प्रमाशब्दार्थकम् । तस्यानुपूर्व्यामाधेयतासम्बन्धेनान्वयः । उच्यत इति धात्वर्थो ज्ञानजनकशब्दः । तत्रेतिशब्दार्थस्याश्रयतासम्बन्धेनान्वयः । तस्य कर्मप्रत्ययार्थे फले । तस्याश्रयतया सेतिपदार्थे। अथ वा प्रमेति

तदभाववति तत्प्रकारकानुभवोऽयथार्थः, स एव भ्रम इत्युच्यते, यथा शुक्तौ इदं रजतमिति।

यथार्थानुभवश्चतुर्विधः, प्रत्यक्षानुमित्युपमितिशाब्दभेदात्। तत्करणमपि चतुर्विधम्, प्रत्यक्षानुमानोपमानशब्दभेदात्।

प्रमेतिपदेन उच्यते शक्त्योपस्थाप्यत इत्यर्थः। ननु सति स्त्रीलिङ्गनिर्देशः कथं? पूर्वं पुल्लिङ्गनिर्देशात्। न च 'शैत्यं हि यत् सा प्रकृतिर्जलस्य' इति पूर्वं नपुंसकनिर्दिष्टमपि स्त्रीलिङ्गशब्देन परामृश्यते, कुतः? विधेयप्राधान्यात्। तद्वदिहापीति वाच्यम्। अत्र प्रमाशब्दार्थस्य विधेयत्वाभावात्। प्रमेत्युच्यत इति उच्यमानत्वं ह्यत्र विधेयम्। तत्कथं स्त्रीलिङ्गमिति। सत्यम्; उच्यमानत्वस्य विधेयत्वेऽप्यन्ततः प्रमात्वविधान एव पर्यवसानमिति तदनुरोधेन तथेति। यद्वा 'सैव प्रमा' इति इतीदं उच्यत इत्यर्थः। अत्र इतिशब्द आनुपूर्व्यवच्छिन्नशब्दप्रतिपाद्यार्थपरः। सैव प्रमेति वर्णसमुदायस्याधेयतासम्बन्धेनानुपूर्व्यामन्वयः। ईदृशवर्णसमुदायनिष्ठानुपूर्व्यवच्छिन्नशब्दप्रतिपाद्यार्थ उच्यते तार्किकैः कथ्यत इति वाक्यार्थः। एवं च सेत्यत्र प्रमाशब्दार्थ एव विधेय इति न स्त्रीलिङ्गानुपपत्तिः।

तदभाववति तस्याभावस्तद्वति। षष्ठ्या अनुयोगित्वमर्थः। समासे तच्छब्दे प्रकृतप्रकारानुयोगिनि लक्षणा। अभेदेनाभावेऽन्वेति। तदभावाश्रयनिरूपितविशेष्यित्वावच्छिन्नतन्निष्ठप्रकारतानिरूपकत्वविशिष्टानुभवत्वमयथार्थानुभवलक्षणम्। शुक्ताविन्द्रियसन्निकर्षे यो विपरीतानुभव इदं रजतमिति, सोऽयथार्थः। अयथार्थस्मृतावतिव्याप्तिवारणायानुभवत्वम्। शिष्टं यथार्थानुभववारणाय। रङ्गरजतयोरिन्द्रियसन्निकर्षे सति जायमाने इमे रङ्गरजते इति यथार्थानुभवेऽतिव्याप्तिवारणायावच्छिन्नत्वघटितपरिष्कारः। शाब्देति। शाब्दत्वं शब्दजन्यबोधमात्रवृत्तिजातिविशेषः। तत्करणं करणं। करणतावत्। तच्छब्दो यथार्थानुभववाची यथार्थानुभवनिरूपित-

असाधारणकारणं करणम् ।

लाक्षणिकः । अपिशब्दः यथार्थानुभवसमुच्चये । तत्करणमित्यत्र करण-शब्दार्थः क इत्यत्राहासाधारणेति । साधारणं तत्सम्बन्धित्वे सति तदन्यसम्बन्धि । सम्बन्धश्च प्रकृते प्रमायाः करणमित्यत्र प्रमायाः करणत्वे निरूपितत्वसम्बन्धेनान्वयात् निरूपितत्वरूपः । अतः साधारणपदं प्रकृते प्रकृतकार्यभिन्नकार्यनिरूपितार्थकम् । असाधारणं प्रकृतकार्यभिन्नकार्या-निरूपितम् । अस्य कारणपदार्थैकदेशकारणतायामन्वयः । करण-मित्यस्य प्रकृतकरणशब्दवाच्यमित्यर्थः । एवञ्च तत्तत्कार्यभिन्नकार्यानिरू-पितकारणतावत् तत्र तत्र करणमिति भावः । इदमत्राकूतम् । केचि-द्व्यापारवदसाधारणकारणं करणम्, यथा घटं प्रति दण्डः । तत्र दण्डेन घटे जननीये मध्ये भ्रमणं हि व्यापार इत्याहुः । अनेन तादृशकारणे करणशब्दप्रयोगः सिद्धः । अन्ये तु, यदव्यवहितोत्तरक्षणे कार्यं भवति तत्करणम् । यथा कपालद्वयसंयोगो घटं प्रतीत्याहुः । अनेन व्यापारे ऽपि करणशब्दप्रयोगः सिद्धः । दण्डभ्रमणादिकमपि चक्रभ्रमणमृत्पिण्ड-भ्रमणतदीयसंयोगविशेषादिकं क्रमेणोत्पादयत् व्यापारवत् कारणमेव । अतो ऽस्माभिरुभयत्र करणशब्दप्रयोगस्य प्रामाणिकत्वं स्वीकृत्योभयानुगतलक्षण-वर्णनमेवोचितम् । तच्च लक्षणमसाधारणकारणत्वम् । कालादृष्टादिकं तु साधारणत्वान्न करणम् । ननु प्रमातुः प्रमेयस्य च प्रमाणत्वं स्यादिति चेत् तदेतद्व्यापारवत्कारणं करणमिति मतेऽपि तुल्यम् । तयोर्मनःसंयो-गेन्द्रियसंयोगद्वारा कारणत्वात् । अतो व्यापारस्य व्यापारवतश्च करण-त्वमिष्टमिति । अत एव ग्रन्थकार इन्द्रिये प्रत्यक्षकरणत्वं लिङ्गपरामर्शस्या-नुमितिकरणत्वं च वक्ष्यति । दर्शयिष्यति चानुमानदीपिकायां, 'व्यापा-रवदसाधारणकारणं करणमिति मते' इति निर्देशेन मूले तस्यानभिमतत्वम् । 'तदेतत्त्रिविधकारणमध्ये यदसाधारणकारणं तदेव करण' मित्युपरि वा-

कार्यनियतपूर्ववृत्ति कारणम् । यथा, घटादिकं प्रति दण्डादिः । कार्यं प्रागभावप्रतियोगि ।

कथमपि करणत्वस्य सव्यापारनिर्व्यापारसाधारण्यं व्यनक्ति ।

करणपदार्थघटकः कारणपदार्थः क इत्यत्राह कार्येति । नियतं व्यापकम् । पूर्वा वृत्तिर्यस्य तत् । षष्ठ्यर्थं आधेयत्वम् । पूर्वा पूर्वकालनिरूपिता यन्निष्ठाधेयता पूर्वकालनिरूपिताभिन्ना । पूर्वकालनिरूपिताधेयतावदिति समासार्थः । नियतं च तत्पूर्ववृत्ति च । कार्यस्य नियतपूर्ववृत्ति । षष्ठ्यर्थो निरूपितत्वं व्यापकत्वे पूर्वत्वे चान्वेति । कार्यनिरूपिताभिन्नव्यापकत्वाश्रय,कार्यनिरूपिताभिन्नपूर्वत्वाश्रयकालनिरूपिताधेयतावत् कारणशब्दवाच्यमिति बोधः । कार्यव्यापकत्वे सति कार्यपूर्वकालवृत्तित्वं कारणत्वम् । यत् प्रकृतकार्योत्पत्तिस्थले सर्वत्रास्ति कार्योत्पत्तिप्राक्काले, तत् प्रकृतकार्यकारणम् । यत्प्रति कारणत्वं वक्तव्यम् तद्वस्तुपरिचायकं कार्यपदम् । न तु लक्षणे निवेश्यम् । स्वस्यापि स्वव्यापकत्वात् स्वं प्रति कारणत्वापत्तिरित्युत्तरदलम् । घटपूर्ववृत्तौ रासभे घटकारणत्ववारणाय पूर्वदलम् । ननु दण्डत्वदण्डरूपादीनां घटं प्रति कारणत्वापत्तिः, नियतपूर्ववृत्तित्वादिति चेत् तत्तद्भिन्नत्वनिवेशेन तत्तद्वारणीयम् । इदमेवानन्यथासिद्धत्वमिति ध्येयम् । कारणशब्दार्थनिरूपणे निर्दिष्टं कार्यं नाम किमित्यत्राह कार्यमिति । प्रागभावस्य प्रतियोगि । षष्ठ्यर्थो निरूपितत्वं प्रतियोगित्वान्वयि । यत् प्रागभूत्वा पश्चाद्भवति तत्कार्यम् । अयं भावः—कारणलक्षणे पूर्ववृत्तीत्यस्य प्रागभावाधिकरणकालवृत्तीत्यर्थः । तत्र प्रागभावपदेन यत्प्रागभावो गृह्यते तत् कार्यम् । तत्प्रागभावाधिकरणकालवृत्ति सत् यत् तन्नियतं तत्कारणमिति ।

एवं कारणं लक्षयित्वा 'प्रतिकार्यं कारणं वा करणं वा नैकमेव किं

कारणं त्रिविधम्, समवाय्यसमवायिनिमित्तभेदात् । यत्स-

तु यथासम्भवमनेक' मिति व्युत्पादनाय तद्विभजते **कारण**मिति । **सम-वाय्यसमवायिनिमित्तभेदात्** समवायिकारणासमवायिकारणनिमित्तका-रणभेदात् । आद्यं निर्वक्ति **यदिति** । **यस्मिन् समवेतम्** । समवेतं समवायप्रतियोगि । सप्तम्यर्थ आधेयत्वं । तदाधेयत्वम् च तदनुयोगिक-त्वम् । उत्पूर्वक पद्ल् धातोर्जन्यत्वमाख्यातस्याश्रयत्वमर्थः । यदनु-योगिकसमवायप्रतियोग्यभिन्नं कार्यं जन्यतानिरूपिताश्रयत्वाश्रय इति बोधः । यच्छब्दघटितवाक्यात् यच्छब्दार्थे यादृशवाक्यार्थसम्बन्धोऽवगम्यते तादृश-वाक्यार्थसम्बन्धविशिष्टयच्छब्दार्थ एव तच्छब्दात्स्वरसतः प्रतीयते । यथा पीतमम्बरं यस्य स इत्युक्तौ स इत्यतः पीतरूपाम्बरविशिष्ट इत्यर्थः प्रतीय-ते । अत इह **तच्छब्द** उत्पद्यमानकार्यप्रतियोगिकसमवायानुयोगीत्यर्थकः । तत् समवायिकारणशब्दवाच्यम् । अत्रेदं बोध्यम्— समवायिकारण-पदस्य समवायि च तत्कारणं चेति विग्रहः । समवायानुयोगि सत् कारणम् समवायिकारणम् । घटस्य समवायिकारणमित्युक्तौ घटपदा-र्थस्य समवाये कारणत्वे चान्वयात् घटप्रतियोगिकसमवायानुयोगि सत् घटकारणमित्यर्थो लभ्यते । इत्थं च तत्समवायानुयोगित्वे सति तत्कारणत्वं तत्समवायिकारणत्वमित्युक्तं भवति । असमवायिकारणादेरपि समवायि-कारणत्वापत्तिरिति प्रथमदलम् । परमाण्वेकत्वं प्रति परमाणोः कारणत्वा-पत्तिरिति द्वितीयम् । एवञ्च गुणादौ 'अयमस्य समवायिकारण' मिति विशेषव्यवहारस्य नापत्तिः । अर्थानन्वयात् । अथापि सामान्यतो गुणः समवायिकारणमिति व्यवहारापत्तिः ; गुणस्यापि रूपादे रूपत्वादिजातिस-मवायानुयोगित्वात् घटरूपादिकं प्रति कारणत्वाच्च । अतः कार्यसमवा-यानुयोगि सत् कारणं समवायिकारणशब्दार्थ इति वक्तव्यम् । एवञ्च का-

मवेतं कार्यमुत्पद्येत तत् समवायिकारणम्, यथा, तन्तवः पटस्य,

रणामिति व्यर्थम्। तथा च कार्यसमवायानुयोगित्वमेव समवायिकारणत्वमिति 'यत् समवेतं कार्यं तत् समवायिकारण' मित्येतावदेवालमिति मूले उत्पद्यत इति पदं व्यर्थमित्याशंक्येत—अत्रोच्यते । कारणताविशेषस्य समवायिकारणत्वस्य कारणताघटितत्वं युक्तम् । समवायिकारणमिति पदाच्च कारणत्वं स्फुटं प्रतीयते । अतः कारणत्वघटित एव तदर्थः, न त्वघटितः कार्यसमवायानुयोगीत्यर्थः । तत्र चार्थे समवायीति पदलब्धसमवायसम्बन्धोऽपि घटनीयः । एवञ्च समवायसम्बन्धावच्छिन्नकार्यतानिरूपितकारणतावदित्यर्थो वक्तव्यः सिद्ध्यति । एतल्लाभायोत्पद्यत इत्युक्तम् । लाभप्रकारश्चायम्-—यत्समवेतं कार्यमुत्पद्यत इत्यस्य कार्यं यत्समवेतं सदुत्पद्यते इत्यर्थः । तत्र यत्समवेतत्वविशिष्टकार्यमित्युद्दिश्य जन्यत्वं विधीयते । उद्देश्यतावच्छेदकं यत्समवेतत्वपदबोध्यम् । उद्देश्यविधेयभावस्थले चासति बाधक उद्देश्यतावच्छेदकावच्छिन्नत्वं विधेये भासत इति नियमः। अतोऽत्र विधेयभूतजन्यतायां समवेतत्वावच्छिन्नत्वं भासते । समवेतत्वावच्छिन्नत्वं च समवायप्रतियोगित्वावच्छिन्नत्वं समवायसम्बन्धावच्छिन्नत्वमेव । तथा च समवायसम्बन्धावच्छिन्नकार्यतानिरूपितकारणतावत्त्वमिति सिद्धम् । यद्यपीदमसमवायिकारणेऽतिव्याप्तम् । अथापि कारणतायां तादात्म्यसम्बन्धावच्छिन्नत्वनिवेशान्न दोषः । कार्यतायां समवायसम्बन्धावच्छिन्नत्वनिवेशप्रयोजनं तु, प्रत्यक्षे विषयस्य घटादेः कारणतया तत्र तस्य समवायिकारणत्वापत्तिः विषयतासम्बन्धेन प्रत्यक्षं प्रति तादात्म्यसम्बन्धेनैव विषयस्य कारणत्वादिति तद्वारणमेव । एवं सर्वसम्मतसमवायिकारणलक्षणसिद्धिरिति । **यथे**त्यस्योदाहरणं लक्ष्यप्रदर्शनमर्थो विषयतासम्बन्धेन तन्तुष्वन्वेति । **पटस्ये**ति समवायिकारणमिति शेषः । निरूपितत्वं षष्ठ्यर्थः समवायि-

पटश्च स्वगतरूपादेः ।

कार्येण कारणेन वा सहैकस्मिन्नर्थे समवेतं सत् कारणं असमवायिकारणम् , यथा तन्तुसंयोगः पटस्य तन्तुरूपं पटगतरूपस्य च ।

कारणत्वेऽन्वेति । यद्वा यथा यत्प्रकारविशिष्टम् । पटसमवायिकारणभूतास्तन्तव उक्तसमवायिकारणलक्षणरूपप्रकारविशिष्टा इत्यर्थः । रूपादेरित्यादिना क्रियादिपरिग्रहः ।

असमवायीत्यस्य न समवायि असमवायीति विग्रहः । समवायीत्यस्य हि समवायानुयोगीत्यर्थः तद्भिन्नमसमवायि समवायप्रतियोगि । समवेतं कारणमसमवायिकारणमिति लब्धम् । तत्र च कुत्र समवेतमित्याकांक्षायां कार्ये समवेतमिति तावदुक्तुं न शक्यते, कार्ये समवेतस्य कार्योत्पत्त्यनन्तरभावितया कार्यं प्रति कारणत्वासम्भवात् । अत औचित्यात् कार्यकारणे तत्कारणे वा समवेतं कारणमसमवायिकारणमिति वक्तव्यमित्यभिसन्धाय तल्लक्षणमाह **कार्येणेति** । अत्र सहेत्यस्य समवेतमित्यत्र धात्वर्थे समवायेऽन्वयात्समवायाधिकरणमित्यर्थः । तृतीयार्थः प्रतियोगितानिरूपकत्वं सहशब्दार्थघटकसमवायेऽन्वेति । वाशब्दस्य स्वसमभिव्याहृतपदार्थस्य यत्रान्वयस्तन्निष्ठोऽभावोऽर्थः । प्रकृते समभिव्याहृतस्य कार्येणेत्यस्य सहशब्दार्थैकदेशे समवायेऽन्वयात् समवायनिष्ठाऽभावो वाशब्दार्थः । तस्य प्रतियोगितासम्बन्धेन **कार्येण कारणेनेति** तृतीयार्थयोरन्वयः । तथा च समवायनिष्ठाभावप्रतियोगि यत् कार्यप्रतियोगिकत्वं यच्च समवायनिष्ठाभावप्रतियोगि कारणप्रतियोगिकत्वम् , तद्विशिष्टसमवायाधिकरणेति सहान्तार्थः । सहशब्दार्थाधिकरणस्य स्वानुयोगिकत्वसम्बन्धेन समवेतमित्यत्र समवायेऽन्वयः । अर्थ इति सप्तम्यर्थश्चानुयोगितानिरूपकत्वं तत्रैवान्वेति । सदित्यस्यासाधारणधर्माविशिष्टमि-

त्यर्थः । समवेतपदार्थस्यासाधारणधर्मे आधेयतासम्बन्धेनान्वयः । समवेतनिष्ठासाधारणधर्मश्च समवेतत्वमेव । तथा च प्रकृतवाक्यप्रतिपाद्यो यादृशः सहशब्दार्थघटकसमवायस्तन्निष्ठाभावप्रतियोगिकार्यप्रतियोगिकत्व-विशिष्ट-तादृशसमवायनिष्ठाभावप्रतियोगिकारणप्रतियोगिकत्वविशिष्टसमवाया-धिकरणानुयोगिक- एकाभिन्नार्थानुयोगिक-समवायप्रतियोगिनिष्ठासाधारणधर्म-विशिष्टाभिन्नकारणमसमवायिकारणमिति वाक्यार्थः । तन्तुद्वयसंयोगः पटासमवायिकारणम् । तन्तुरूपं च पटरूपस्य । तत्र कार्येण पटेन सहैकस्मिन्नर्थे तन्तौ समवेतं कारणं तन्तुद्वयसंयोगः । कार्यस्य पटगतरूपस्य कारणेन समवायिकारणेन पटेन सहैकस्मिन्नर्थे तन्तौ समवेतं कारणं तन्तुगतरूपमिति द्विविधमसमवायिकारणम् । तत्र प्रथमे कार्येण सह समवेतत्वमादाय समन्वयात्सहशब्दार्थघटकः समवायः कार्यप्रतियोगिकः, न तु कारणप्रतियोगिकः । द्वितीये कारणेन सह समवेतत्वमिति स समवायः कारणप्रतियोगिक एव । एवञ्चैकैकसमवायेऽप्यपरप्रतियोगिकत्वाभावसत्त्वाद्वाशब्दप्रयोगः । अत्र समवेतं सत्कारणमित्यनेन समवेतत्वविशिष्टे.कारणतोक्त्या समवेतत्वावच्छिन्ना कारणतेति लभ्येत । समवेतत्वं च समवाय एव । तथा च कार्यसमवायाधिकरणानुयोगिकसमवायावच्छिन्ना कार्यसमवायिकारणसमवायाधिकरणानुयोगिकसमवायावच्छिन्ना वा कारणतेति लब्धम् । तत्र च, यत्र कार्यमुत्पद्येत तत्र कारणमस्तीत्यस्यैव वक्तव्यतया प्रकृते कार्यः पटः समवायेनोत्पद्यते तन्ताविति तत्रैव तन्तुद्वयसंयोग उपपादनीयः । एवं कार्यं पटरूपं पटे उत्पद्यत इति तत्रैव तन्तुरूपमुपपाद्यम् । अतोऽत्र कार्यसमवायाधिकरणत्वान्तं प्रथमदले कार्यसमवायिकारणत्वान्तं द्वितीयदले चोपलक्षणम् । अवशिष्टांशे कारणतावच्छेदकसम्बन्ध उपलक्षणांशे च समवायरूपकार्यतावच्छेदकसम्बन्धो

दर्शितः । तथा च समवायसम्बन्धावच्छिन्नकार्यतानिरूपितसमवायस्वसमवायिसमवेतत्वान्यतरसम्बन्धावच्छिन्नकारणत्वमसमवायिकारणत्वमिति फलितम् । अत्र कार्यतावच्छेदकसम्बन्धमात्रनिवेशे समवायिकारणेऽतिव्याप्तिः । कारणतावच्छेदकसम्बन्धमात्रनिवेशे रूपस्य द्रव्यप्रत्यक्षे समवायेन द्रव्यसमवेतप्रत्यक्षे स्वसमवायिसमवेतत्वसम्बन्धेन च कारणतया प्रत्यक्षं प्रति पटरूपादेरसमवायिकारणत्वापत्तिः कारणतावच्छेदकसम्बन्धयोरेकतरनिवेशे चान्यतरस्मिन्नसमवायिकारणेऽतिव्याप्तिरितीत्थं निवेशः । नन्वेवं कार्येण कारणेन वा सह समवेतमित्यनेनैव सर्वसिद्धावेकस्मिन्नर्थ इति व्यर्थमिति चेदुच्यते । सहशब्दार्थोऽधिकरणं कालरूपं वा देशरूपं वा भवति । तत्र कालः प्रकृते न गृह्यत इति स्पष्टप्रतीतये तदुक्तिः । वस्तुतः कार्यप्रतियोगिकसमवायस्य कारणप्रतियोगिकसमवायस्य वाऽधिकरणं यावद्वस्तु भवति तावत्समवेतमेव कारणमिति न । किं तु तत्रैकस्मिन्समवेतमपि कारणम् । यथा हस्तपुस्तकसंयोगः कायपुस्तकसंयोगकारणम् । तत्र कार्यसमवायाधिकरणं कायः पुस्तकं च । हस्तपुस्तकसंयोगरूपं कारणं तु न तावत्समवेतम् । किं तु पुस्तकमात्रे । तथाऽपि तत्कारणमेव । एवं तन्तुरूपाणि पटरूपं प्रति कारणम् । तत्र पटरूपात्मककार्यस्य कारणं पटस्तत्समवायिकारणं बहवस्तन्तवः । तावत्सु समवेतमेकं रूपं नास्ति । एकैकरूपस्यैकैकवृत्तित्वात् । एवं पटीयचित्ररूपकारणस्य तन्तुगतनीलादिविभिन्नरूपस्यापि यावत्तन्त्ववृत्तित्वं द्रष्टव्यम् । तस्मादेकवृत्तित्वेऽप्यसमवायिकारणत्वं भवतीति ज्ञापनायैकस्मिन्नर्थ इत्युक्तम् । एवमेतदुक्त्या काचिदाशङ्काऽपि परिहृता । सा तावत् 'असमवायिकारणत्वं हि समवेतकारणत्वम् । अतः कारणतायां द्विविधासमवायिकारणलक्षणेऽपि समवायसम्बन्धावच्छिन्नत्वमेव निवेश्यताम् । कार्यतायामेव तु समवाय, स्वसम-

तदुभयभिन्नं कारणं निमित्तकारणम् । यथा तुरीवेमादिकं पटस्य ।

वायिसमवायान्यतरसम्बन्धावच्छिन्नत्वमित्येवंरूपा । परिहारप्रकारश्च— कायपुस्तकसंयोगः समवायेन काये पुस्तके चास्ति । हस्तपुस्तकसंयोगरूपकारणं तु पुस्तक एकस्मिन्नेव न तु कायेऽपि । तथा स एव कायपुस्तकसंयोगःस्वसमवायिसमवायसम्बन्धेन कायावयवेषु हस्तपादादिषु पुस्तकावयवेषु पत्रादिषु चास्ति । हस्तपुस्तकसंयोगस्तु हस्त एकस्मिन्नेवावयवे नान्यत्रेति तस्य कारणत्वं न स्यात् । अत एकस्मिन्नर्थे समवेतस्यापि कारणत्वात्कारणतायामेव सम्बन्धद्वयं पूर्वोक्तरीत्या विवक्षणीयम् । न तु कार्यतायाम् । एवञ्च कायपुस्तकसंयोगः काये पुस्तके च । हस्तपुस्तकसंयोगोऽपि पुस्तके समवायेन, काये स्वसमवायिहस्तसमवेतत्वसम्बन्धेनेति न दोष इति । एवं घटः समवायिसमवायसम्बन्धेन कपालावयवेऽस्ति,तत्र कपालद्वयसंयोगः समवायेन नास्तीत्येवं सर्वत्र व्यभिचारादपि कार्यतायां सम्बन्धभेदं विहाय कारणतायामेव स ग्राह्य इति ध्येयम् । तन्तुसंयोगः तन्त्वोः संयोगः । पटस्येति । असमवायिकारणमिति शेषः । एवमग्रेऽपि । चस्तन्तुसंयोगसमुच्चये तन्तुरूपस्थे ।

तदिति । तयोरुभयं तस्माद्भिन्नम् । घटितत्वं षष्ठ्यर्थः । पञ्चम्यर्थोऽनुयोगित्वं भेदेऽन्वेति । तथा चोभयपदं समवायिकारणप्रतियोगिकासमवायिकारणप्रतियोगिकपरम् । अभेदेन भेदे तदन्वयः । निमित्तकारणं निमित्तकारणशब्दवाच्यम् । तथा च समवायिकारणप्रतियोगिकभेदवत्त्वे सत्यसमवायिकारणप्रतियोगिकभेदवत्त्वे सति कारणत्वं निमित्तलक्षणम् । समवायिकारणे, असमवायिकारणे, पारिमाण्डल्यादौ चातिव्याप्तिवारणाय क्रमेण दलनिवेशः । अदृष्टे लक्षणसमन्वयः । उदाहरति यथेति ।

तदेतत्त्रिविधकारणमध्ये यदसाधारणकारणं तदेव करणम् । तत्र प्रत्यक्षज्ञानकरणं प्रत्यक्षम् ।

ननु तुर्यादीनां तुर्यादिनिष्ठरूपादिकं प्रति समवायिकारणत्वादिसद्भावात् समवायिकारणभिन्नत्वादिदलाभावादव्याप्तिः । न च समवायिकारणताभिन्नाऽसमवायिकारणताभिन्ना च या कारणता तद्वत्त्वमेव निमित्तकारणत्वम् । अत्रैव ग्रन्थतात्पर्यम् । एवं च यथा तुर्यादौ तत्तद्रूपादिसमवायिकारणता तथा तद्भिन्ना पटादि प्रति कारणताऽप्यस्तीति लक्षणसमन्वय इति वाच्यम् । एवं तर्हि कारणत्वं निमित्तकारणत्वमित्येव सुवचत्वात् क्वचिदप्यतिव्याप्त्यभावादिति चेन्न । कारणत्वमात्रस्य निमित्तलक्षणत्वे परमाणावतिव्याप्तिः तस्य समवायिकारणत्वेऽपि किंचित्प्रति निमित्तकारणत्वाभावात् । एवं जलपरमाणुरूपादावसमवायिकारणेऽतिव्याप्तिः । अतो दलद्वयनिवेशः । किं च निमित्तकारणतास्वरूपं किमिति प्रश्ने समवायिकारणत्वादिभिन्नं कारणत्वमित्येव वक्तव्यम् । अन्यथा समवायिकारणत्वादेरपि निमित्तकारणतास्वरूपत्वप्रसङ्गात् घटं प्रति कपालस्यापि निमित्तकारणत्वापातादिति । तुरीति । तुरीवेमानौ आदी यस्य तत् ।

यस्य करणशब्दार्थस्य निरूपणाय कारणशब्दार्थं सामान्यतो विशेषतश्च निरूपितवान् तं करणशब्दार्थमुपसंहरति तदिति । तेषां सामान्यतो लक्षितानामेतेषां विशेषतो लक्षितानां त्रिविधानां कारणानां मध्ये । घटितत्वं मध्यशब्दार्थः । षष्ठ्यर्थं आधेयत्वम् । निरूपकत्वं सप्तम्यर्थः । घटितत्वस्य निरूपितत्वसम्बन्धेनान्वयः । निरूपकत्वस्य कारणेऽन्वयः । एवं करणशब्दार्थव्युत्पादनेन तत्करणमपि चतुर्विधमिति वाक्यस्यार्थमवगमितवान् । तदुपर्येवमाशङ्का—यथार्थानुभवविभागेऽपि प्रत्यक्षानुमितीत्येवं प्रत्यक्षं प्रवेशितम् । तत्करणविभागेऽपि । तत् कथम्? न ह्येकस्यैव कार्यत्वं कारणत्वं च सम्भवतीति । इमामाशङ्कां परिहरति । तत्रेति । तत्र प्रत्यक्षानुमानोपमानशब्देषु प्रत्यक्षं प्रत्यक्षपदवाच्यं प्रत्यक्ष-

इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम् । तत् द्विविधम्, निर्विकल्पकं सविकल्पकं चेति । तत्र निष्प्रकारकं ज्ञानं निर्विकल्पकम् ।

ज्ञाननिरूपितासाधारणकारणतावदभिन्नामिति । तथा चानुभवविभागे प्रत्यक्षपदं प्रत्यक्षज्ञानपरं करणविभागे च तत्पदं तत्करणपरमिति न दोष इति। ननु प्रत्यक्षज्ञानकरणमित्यत्र प्रत्यक्षज्ञानं नाम किम् ? तदाहेन्द्रियेति । एवं चेश्वरीयप्रत्यक्षे नित्ये एतल्लक्षणाभावेऽपि न क्षतिः । अस्य ग्रन्थस्योक्तप्रश्नसमाधानार्थत्वात् । अर्थेन घटपटादिना सह सन्निकर्षः सम्बन्धः। तृतीयार्थः साहित्यं वैशिष्ट्यमाधाराधेयभावरूपम् । अर्थनिष्ठसम्बन्धस्या इति यावत् । अर्थे सन्निकर्ष इत्येव वा विग्रहः । इन्द्रियस्यार्थसन्निकर्षः । षष्ठ्यर्थो निरूपितत्वम् । एतेनेन्द्रियार्थसन्निकर्षेत्यस्येन्द्रियप्रतियोगिकार्थानुयोगिकसम्बन्धेत्यर्थकत्वे श्रोत्रेन्द्रियशब्दसन्निकर्षस्याग्रहणम् । श्रोत्रेन्द्रियस्याकाशत्वात् शब्दस्य तत्राधेयत्वात् सन्निकर्षस्य समवायस्याकाशप्रतियोगिकत्वशब्दानुयोगिकत्वयोरभावात् आधारो ह्यनुयोगी ; आधेयः प्रतियोगीति । तस्येन्द्रियानुयोगिकार्थप्रतियोगिकसम्बन्धपरत्वे चक्षुर्घटसंयोगाद्यग्रहणम् , घटस्यानुयोगिताया एव स्वरसत्वादित्यपास्तम् । अन्यविधार्थस्योक्तस्य सर्वानुगतत्वात् । सन्निकर्षाज्जन्यम् । पञ्चम्यर्थो निरूपितत्वम् । निष्प्रकारकमिति । निष्क्रान्तं प्रकारात् । निष्क्रान्तं सम्बन्धशून्यं । सम्बन्धश्च प्रकारिता । प्रकारनिरूपितप्रकारिताशून्यमिति यावत् । तथा च प्रकारिताशून्यत्वे सति ज्ञानत्वं लक्षणम् । घटादिवारणाय द्वितीयदलम् । निर्विकल्पकमित्यत्र विकल्पो नाम भेदः । स च प्रकारित्वविशेष्यित्वसंसर्गित्वाख्यविषयितारूपः । तच्छून्यमित्यर्थो लभ्यते । तत्र निष्प्रकारकमित्यनेन प्रकारिताशून्यत्वमात्रमुक्तं, तावदेव लक्षणं पर्याप्तमिति । एवं विशेष्यिताशून्यत्वं संसर्गिताशून्यत्वमपि पृथग्लक्षणं संभवति । इदमत्र बोध्यम्—अयं मनुष्यः, अयं पशुरित्यादिज्ञानं तावदनुभवसिद्धम् ।

सप्रकारकं ज्ञानं सविकल्पकम् । यथा, डित्थोऽयं ब्राह्मणोऽयं श्यामोऽयं पाचकोऽयं इति ।

प्रत्यक्षज्ञानहेतुरिन्द्रियार्थसन्निकर्षः षड्विधः । संयोगः,

तत्रायमर्थो विशेष्यः, मनुष्यत्वादि विशेषणम् । एवं विशेषणविशेष्यविषयकत्वात्तद् ज्ञानं सविकल्पकं विशिष्टज्ञानमित्युच्यते । विशिष्टज्ञाने च विशेषणज्ञानं कारणम् । न हि दण्डस्य ज्ञानाभावे दण्डी पुरुष इति ज्ञानं भवति । तदत्र मनुष्यत्वादिकं विषयीकृत्य प्रथमत एकं ज्ञानं भवतीति स्वीकार्यम् । तच्च न विशिष्टज्ञानम्, तत्पूर्वं कस्यचिद्विशेषणस्य ज्ञानाभावात् । तत्र च मनुष्यत्वज्ञाने मनुष्यत्वमनुष्यव्यक्त्योः संसर्गो भासतां मा वा । प्रकारस्तावद्विषयी भवति । परं तु न प्रकारतया विषयी भवति । कस्यचिद्विशेष्यतया भानाभावेऽस्य प्रकारतया भानस्य दुर्वचत्वात् । अत एवं प्रकारज्ञानतया कल्प्यमानस्य, प्रकारज्ञानान्तरापेक्षा नास्तीति प्रदर्शनाय निष्प्रकारकमित्येव निर्विकल्पकं लक्षितवान् ग्रन्थकारः, न तु निर्विशेष्यकं निःसंसर्गकमित्येवम् । निर्विकल्पकस्य चाकारो न प्रदर्शितः, तस्यातीन्द्रियत्वात् । ननु यथार्थानुभवान्तर्भूते प्रत्यक्षे निर्विकल्पकमन्तर्भूतम् । अत्र यथार्थानुभवसामान्यलक्षणस्याव्याप्तिः, किञ्चित्प्रकारकत्वाभावादिति चेन्न । अयथार्थभिन्नत्वे सत्यनुभवत्वं निर्विकल्पकसाधारणयथार्थानुभवलक्षणमित्याशयादिति दिक् ।

लोके नामजातिगुणक्रियाभिर्वस्तुपरिच्छेदो भवति । तदभिसन्धाय क्रमेण चत्वार्युदाहरणानि दर्शयति यथेति । सर्वत्रायम्पदोत्तरमन्ते निर्दिष्टस्येतिशब्दः सम्बन्धः । डित्थः डित्थनामविशिष्टः । इतिशब्दार्थो विषयित्वम् डित्थाभिन्नेदमर्थनिरूपितविषयतावदित्यर्थः । ज्ञानमित्यनुषङ्गः ।

संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेषणविशेष्यभावश्चेति । चक्षुषा घटप्रत्यक्षजनने संयोगः सन्निकर्षः । घटरूपप्रत्यक्षे संयुक्तसमवायः, चक्षुःसंयुक्ते घटे रूपस्य समवायात् । रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवायः सन्निकर्षः, चक्षुःसंयुक्ते घटे रूपं समवेतम्, तत्र रूपत्वस्य समवायात् । श्रोत्रेण शब्दसाक्षात्कारे समवायः सन्निकर्षः, कर्णविवरवृत्त्याकाशस्य श्रोत्रत्वात् शब्दस्याकाशगुणत्वात् गुणगुणिनोः समवायात् । शब्दत्वसाक्षात्कारे समवेतसमवायः सन्निकर्षः,

---

चक्षुषेति प्रयोज्यत्वं तृतीयार्थः । घटेति । द्रव्यसामान्योपलक्षणम् । जनन इति सप्तम्यर्थः प्रयोजकत्वम् । चक्षुर्निरूपितप्रयोज्यत्वाश्रयद्रव्यप्रत्यक्षोत्पत्तिप्रयोजकत्वाश्रयसन्निकर्षः संयोग इत्यर्थः । घटरूपप्रत्यक्ष इति । चक्षुषेत्यनुषङ्गः । घटसमवेतरूपविषयकप्रत्यक्ष इत्यर्थः । द्रव्यसमवेतविषयकचाक्षुषप्रत्यक्ष इति यावत् । सप्तम्यर्थः प्रयोजकत्वमनुषक्तसन्निकर्षपदार्थेऽन्वेति । एवमग्रेऽपि । उपपादयति चक्षुरिति । रूपस्य सन्निकर्षजन्यप्रत्यक्षविषयरूपस्य । ज्ञानज्ञाप्यत्वं पञ्चम्यर्थः । तस्य संयुक्तसमवायत्वे संयुक्तसमवाय एव वाऽन्वयः । तथा च घटरूपप्रत्यक्षजनकसन्निकर्षः स्वजन्यप्रत्यक्षविषयरूपप्रतियोगिक, चक्षुःसंयुक्तघटानुयोगिकसमवायविषयकज्ञानज्ञाप्यसंयुक्तसमवायाभेदाश्रयः इति समुदायार्थः । घटस्य चक्षुःसंयुक्तत्वं रूपस्य तत्समवेतत्वं च यदि ज्ञायते तदा रूपप्रत्यक्षे सन्निकर्षः संयुक्तसमवाय इति ज्ञायते । एवमुत्तरत्र । रूपत्वसामान्यप्रत्यक्षे द्रव्यसमवेतसमवेतविषयकचाक्षुषे । कर्णविवरेति । विवरं सन्निवेशविशेषः कर्णविवरे वृत्तिर्यस्य तस्याकाशस्य । वृत्तिरवच्छिन्नत्वम् । विवर इति सप्तम्यर्थो निरूपितत्वम् । तथा च कर्णसम्बन्धिसन्निवेशविशेषावच्छिन्नाकाशनिष्ठश्रोत्रत्वज्ञानज्ञाप्यत्व, शब्दनिष्ठाकाशगुणत्वज्ञानज्ञाप्यत्व, गुणगुणि-

श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायात् । अभावप्रत्यक्षे विशेषणविशेष्यभावः सन्निकर्षः, भूतलं घटाभाववत् इत्यत्र चक्षुःसंयुक्ते भूतले घटाभावस्य विशेषणत्वात् । एवं सन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्। तत्करणमिन्द्रियम् । तस्मादिन्द्रियं प्रत्यक्षप्रमाणमिति सिद्धम् ।

सम्बन्धित्वविशिष्टसमवायज्ञानज्ञाप्यत्वाश्रयसमवायाभेदाश्रयः श्रोत्रजन्यशब्दसाक्षात्कारजनकसन्निकर्ष इति । पञ्चम्यन्तत्रयार्थविषयकज्ञानं समवायज्ञाने कारणम् । इत्यत्रेति । इतिशब्दार्थः विषयित्वरूपधर्मः अत्रेतीदंशब्दार्थो बुद्धिस्थं ज्ञानम् । सप्तम्यर्थो निरूपितत्वं विशेषणत्वेऽन्वेति । ज्ञाने भूतलस्य विशेषणत्वात् भूतलनिरूपिता घटाभावनिष्ठा विशेषणता । तथा च घटाभाववद्भूतलनिरूपितविषयिताश्रयज्ञाननिरूपितत्वाश्रय, चक्षुःसंयुक्तभूतलनिरूपितत्वाश्रय, घटाभावनिरूपिताधेयताश्रयविशेषणत्वविषयकज्ञानज्ञाप्यत्वाश्रयविशेषणविशेष्यभावाभेदाश्रयस्तादृशसन्निकर्ष इति । विशेषणविशेष्यभाव इत्यनेन प्रकृते विशेषणत्वं विवक्षितम् । ननु सन्निकर्षः प्रत्यक्षे कारणम् । कारणं च कार्यनियतपूर्ववर्ति । विशेषणत्वं तु घटाभावस्य प्रत्यक्षजननानन्तरं भविष्यति । न पूर्वम् । स कथं सन्निकर्ष इति चेत् ; सत्यम् न विशेषणत्वं सन्निकर्षः । किं तु प्रत्यक्षेऽभावस्य विशेषणताप्रयोजको भूतलस्य घटाभावस्य च यः सम्बन्धः स एव सन्निकर्षः । एवं च संयुक्तविशेषणतेत्यस्य संयुक्तीयस्वरूपसम्बन्ध इत्यर्थ इत्यन्यत्र विस्तरः ।

पूर्वमिन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षमित्यत्रेन्द्रियार्थसन्निकर्षजन्यत्वं कथमिति प्रश्ने तन्निरूपणमेतावता विधायोपसंहरति एवमिति । एवं प्रत्यक्षानुमानेति विभागवाक्ये प्रत्यक्षपदस्य प्रत्यक्षज्ञानकरणेत्यर्थमुक्त्वा प्रत्यक्षज्ञानमुपपाद्य तत्करणमेव प्रत्यक्षपदवाच्यमिति व्युत्पाद्य तत्करणं किमित्यत्र विशिष्य तद्दर्शयति तत्करणमिति। तस्मादिति । अयं भावः–प्रत्यक्षा-

नुमानोपमानशब्दभेदादित्यस्य प्रत्यक्षज्ञानकरणानुमितिकरणोपमितिकरणशब्दभेदादित्यर्थः सिद्ध्यति । न तथैव विभजने तात्पर्यम् , तत्र प्रत्यक्षज्ञानेत्यादेरिन्द्रियार्थसन्निकर्षजन्यज्ञानेत्येवमर्थकतया तत्तदर्थघटकेन्द्रियादिमात्रेण विभजनस्य सुकरत्वेन शिरोवेष्टनस्यायुक्तत्वात् । तथा चेन्द्रियपरामर्शसादृश्यज्ञानशब्दभेदादित्येव विभागे तात्पर्यम् । अत एवेन्द्रियार्थसन्निकर्षेत्यपि न विभागवाक्ये निवेशनीयम् । इन्द्रियार्थसन्निकर्षस्येवेन्द्रियस्याप्यसाधारणकारणत्वप्रसिद्धिसद्भावेन तावन्मात्रोक्त्यैव सामञ्जस्यात् । न च तर्हि परामर्शेत्यपि न वक्तव्यम् । परामर्शपदस्य व्याप्तिविशिष्टपक्षधर्मताज्ञानेत्यर्थकतया तद्घटकस्य व्याप्तिज्ञानस्य करणतया निर्देशस्य युक्तत्वादिति वाच्यं व्याप्तिविशिष्टपक्षधर्मताज्ञानमित्यस्य शोधने व्याप्तिज्ञानेति विशिष्टांशस्य तत्र घटकत्वाभावात् । घटकोक्त्यैव सामञ्जस्ये घटितं न वक्तव्यमित्येतावत एव प्रकृते विवक्षितत्वात् । व्याप्तिज्ञानं वा वक्तव्यं पक्षधर्मताज्ञानं वेति विनिगमनाविरहाच्च । अत एव 'तस्माल्लिङ्गपरामर्शोऽनुमान'मिति वक्ष्यतीति ।

इति प्रत्यक्षपरिच्छेदः ।

अनुमानपरिच्छेदः ।

अनुमितिकरणं अनुमानम् । परामर्शजन्यं ज्ञानं अनुमितिः । व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः ।

प्रत्यक्षानुमानेति करणविभागवाक्ये प्रत्यक्षशब्दार्थ उक्तः । अनुमानशब्दार्थः क इत्यत्राह अनुमितीति । अनुमितिनिरूपितकरणतावदनुमानशब्दवाच्यमिति बोधः । तद्घटकानुमितिशब्दार्थमाह परामर्शेति । परामर्शध्वंसेऽतिव्याप्तिवारणाय ज्ञानत्वम् । परामर्शशब्दार्थमाह व्याप्तीति । व्याप्त्या विशिष्टम् । पक्षस्य धर्मः धर्म आधेयतावान् षष्ठ्यर्थो निरूपितत्वं धर्मस्य भावो धर्मता । असाधारणधर्मस्तल्प्रत्ययार्थः । एवं च पक्षनिरूपितनिरूपितत्वाश्रयाधेयतावन्निष्ठासाधारणधर्म इति पक्षधर्मताशब्दार्थः । स चासाधारणधर्मस्तत्प्रत्ययप्रकृत्यर्थतावच्छेदक एव । तथा च पक्षधर्मतेत्यस्य पक्षनिरूपिताधेयतेति निष्कृष्टार्थः । तस्या ज्ञानम् । षष्ठ्या विषयित्वमर्थः । व्याप्तिविशिष्टस्य पक्षधर्मताज्ञानम् व्याप्तिविशिष्टपक्षधर्मताज्ञानम् । व्याप्तिविशिष्टवस्तुविषयकपक्षनिरूपिताधेयताविषयकज्ञानं परामर्शपदवाच्यमिति विशिष्टार्थः । अथ वा व्याप्तिविशिष्टा च सा पक्षधर्मता च तस्या ज्ञानमिति विग्रहः । वैशिष्ट्यं सामानाधिकरण्यसंम्बन्धेन । यद्वा व्याप्तिविशिष्टस्य पक्षधर्मता तस्या ज्ञानमिति । अत्र व्याप्तिविशिष्टं च तत् पक्षधर्मताज्ञानं चेति विग्रहं व्याप्तिविशिष्टमित्यस्य व्याप्तिविषयकमित्यर्थं च प्रायो वर्णयन्ति । तत्र हेतुं चाहुः व्याप्तिविशिष्टस्येति षष्ठीसमासे व्यभिचारिलिङ्गकपरामर्शेऽव्याप्तिरिति । तत्रेदं वक्तव्यम् विशिष्टपदस्य तद्विषयकेत्यर्थवर्णनं बालव्युत्पादनार्थे ग्रन्थे न स्वरसम् । न चाव्याप्तिपरिहारार्थं तथा वर्णनामिति वाच्यम् । कर्मधारयविग्रहेऽप्यव्याप्तितादवस्थ्यात् । धूमवान्

यथा, वह्निव्याप्यधूमवान् अयं पर्वतः इति ज्ञानं परामर्शः । तज्जन्यं पर्वतो वह्निमान् इति ज्ञानं अनुमितिः । यत्र यत्र धूमः

वह्नेरित्यत्र व्याप्तेरेवाप्रसिद्ध्या व्याप्तिविशिष्टत्वस्य ज्ञाने दुर्वचत्वात् । हेतुव्यापकसाध्यसामानाधिकरण्यं हि दीपिकोक्ता व्याप्तिः । न च तत्र वह्निरूपहेतुव्यापकत्वं धूमरूपसाध्यस्य सम्भवति । तर्हि का गतिरिति चेन्न कश्चित्क्लेशः । पूर्वं यथार्थानुभवस्य प्रत्यक्षानुमितीति विभागं विधाय तत्करणस्यैव प्रत्यक्षानुमानेति विभजनात् यथार्थानुमितिकरणस्यैव प्रकृते व्युत्पादनीयतया तादृशपरामर्शः सद्धेतुपरामर्श एवेति न व्याप्तिविशिष्टस्य पक्षधर्मताया ज्ञानमिति स्वरसार्थो भञ्जनीय इति । न च दोपिकाविरोधः, वस्तुगत्या व्याप्तिमान् यस्तस्य पक्षधर्मताज्ञानमिति न मन्तव्यम् ज्ञाने व्याप्तिविषयकत्वमपि विवक्षितमिति विशिष्टपदस्वारस्यप्रदर्शनार्थत्वात्तद्ग्रन्थस्येति । परामर्शे व्याप्तिविशिष्टपक्षधर्मताज्ञानत्वं ज्ञानाकारप्रदर्शनेन व्युत्पादयति यथेति । थाल्प्रत्ययार्थः प्रकारः । इतिशब्दस्य विषयित्वमर्थः । अथ वा इतिशब्दः प्रकारवचनः । वह्निव्याप्यविशिष्टपर्वतत्वार्थकः । स्वावच्छिन्नविषयकत्वसम्बन्धेन तस्य ज्ञानेऽन्वयः । तथा च परामर्शपदवाच्यवह्निव्याप्यविशिष्टपुरोवर्तिपर्वतत्वावच्छिन्नविषयकज्ञानं व्याप्तिविशिष्टपक्षधर्मताज्ञानत्वरूपयादृशप्रकारविशिष्टमिति वाक्यार्थः । अथानुमित्याकारं दर्शयति तज्जन्यमिति । व्याप्तिविशिष्टपक्षधर्मताज्ञानमित्यत्र व्याप्तिशब्दार्थमाह यत्रेति । यत्र धूमस्तत्राग्निरितिपर्यन्तं प्रकृते वाक्यपरम् । इतिशब्द आनुपूर्वीरूपधर्मपरः । तस्य स्वावच्छिन्नवाक्यबोध्यत्वसम्बन्धेन साहचर्यनियमेऽन्वयः । एवं च यत्रपदाद्यग्निपदान्तनिष्ठानुपूर्व्यवच्छिन्नवाक्यबोध्यसाहचर्यनियमो व्याप्तिशब्दार्थ इति । अत्र यच्छब्दो महानसादिपरः । यन्निरूपिताधेयतावान् धूमः तन्निरूपिताधेयतावानग्निरित्यर्थः । तथा च साहचर्यनियमः कथं

तत्राग्निः इति साहचर्यनियमो व्याप्तिः ।

बोद्धयत इति चेदुच्यते । **यत्र धूम** इति वाक्यानुसारेण तत्रेत्यस्य धूमवतीत्यर्थः प्रतीयते । यच्छब्दघटितवाक्येन यच्छब्दार्थे यादृशविशिष्टार्थसम्बन्धो बोद्धयते, तच्छब्देन तादृशविशिष्टार्थसम्बन्धित्वेन तादृशयच्छब्दार्थप्रतीतेरानुभविकत्वात् । एवञ्च **तत्राग्नि**रित्यनेन धूमवद्वृत्तिरग्निरित्युक्तं भवति । उद्देश्यतावच्छेदकव्यापकत्वस्य विधेये भानं चानुभवसिद्धम् । एवञ्च धूमवदुद्देशेनाग्निविधाने वाक्यतात्पर्यमिति धूमवत्त्वव्यापकत्वमग्नौ भासते । अतो हेतुव्यापकसाध्यभानं सिद्धयति । अग्नौ धूमवद्वृत्तित्वभानाद्धूमेऽपि हेतौ तुल्यवित्तिवेद्यतया साध्यसामानाधिकरण्यभानं सिद्धमिति वक्ष्यमाणसाहचर्यनियमस्य वाक्यादवगतिरस्त्येव । अत्र 'तत्राग्नि' रित्यत्राग्निपदं धूमव्यापकाग्नीत्यर्थलाक्षणिकम् । अतो व्यापकत्वभानमित्यप्याहुः । **साहचर्यनियम** इति । सह चरतीति सहचरः तस्य भावः साहचर्यम् । चरतीत्यस्य प्रकृते वर्तत इत्यर्थः । अग्निना सह वर्तते धूमः । सहशब्दार्थोऽधिकरणम् । अग्न्यधिकरणवृत्तिर्धूम इति, अग्निसाहचर्यमग्निसामानाधिकरण्यं धूमे । अग्निसाहचर्यस्य धूमे नियमः । षष्ठ्यर्थ आधेयत्वम् । सप्तम्यर्थो निरूपितत्वं । नियमो व्यापकत्वम् । तथा चाग्निसामानाधिकरण्यनिष्ठं धूमनिरूपितव्यापकत्वम् । व्यापकत्वं चाभावाप्रतियोगित्वं, जगद्व्यापको विष्णुरित्युक्तौ जगन्निष्ठाभावाप्रतियोगी विष्णुरिति बोधात् । धूमनिरूपितव्यापकत्वं च धूमनिष्ठाभावाप्रतियोगित्वम् । एवञ्च यत्र यत्र धूमत्वम्, तत्र तत्राग्निसामानाधिकरण्यमिति धूमनिष्ठाभावाप्रतियोगि भवत्यग्निसामानाधिकरण्यम् । यद्यप्ययं नियमः साहचर्यनिष्ठः । व्याप्तिश्च हेतुनिष्ठा वक्तव्या । अथापि नियमविशिष्टं साहचर्यं धूमनिष्ठाभावाप्रतियोगिभूतमग्निसामानाधिकरण्यं व्याप्तिरित्यत्र तात्पर्यम् । इत्थमेवार्थं मनसि निधाय मणिकारः,

व्याप्यस्य पर्वतादिवृत्तित्वं पक्षधर्मता ।

साध्यसामानाधिकरण्यावच्छेदकहेतुतावच्छेदकवत्त्वं व्याप्तिरित्युक्तवान् । तस्य हि स्वव्यापकसाध्यसामानाधिकरण्यकहेतुतावच्छेदकवत्त्वमित्यर्थः । परन्त्वेवं धूमत्वव्यापकत्वस्य वह्निसामानाधिकरण्ये विवक्षणापेक्षया वह्नौ धूमव्यापकत्वविवक्षणे लाघवमस्तीति परिचिन्तनया धूमव्यापकवह्निसामानाधिकरण्यं व्याप्तिरिति निष्कर्षः क्रियत इति ध्येयम् । यद्वा धूमनिष्ठाग्निसामानाधिकरण्यस्य नियमो व्यवस्थितत्वम् अग्नीतरासम्बन्धित्वे सत्यग्निसम्बन्धित्वम् ; अग्नीतरानिरूपितत्वे सत्यग्निनिरूपितत्वम् । इतरेत्यनेन च प्रकृतेऽग्न्यभावो विवक्षितः । धूमनिष्ठसामानाधिकरण्यस्याग्न्यभावानिरूपितत्वे सत्यग्निनिरूपितत्वमस्तीत्युक्तौ पूर्ववदस्य नियमस्य साहचर्यनिष्ठत्वात् व्याप्तेर्हेतुनिष्ठत्वस्यावश्यकत्वात् नियमविशिष्टं सामानाधिकरण्यं व्याप्तिरिति वक्तव्यम् । धूमनिष्ठसामानाधिकरण्येऽग्न्यभावानिरूपितत्वोक्तौ धूमेऽग्न्यभावनिरूपितसामानाधिकरण्याभावो लभ्यते । तथा चाग्न्यभावासमानाधिकरणत्वे सत्यग्निसामानाधिकरण्यं साध्याभाववदवृत्तित्वे सति साध्यवद्वृत्तित्वं व्याप्तिरिति सिद्ध्यति । अस्या व्याप्तेः केवलान्वयिन्यव्याप्त्या हेतुव्यापकसाध्यसामानाधिकरण्यमिति निष्कर्षकरणमिति । पक्षधर्मताशब्दार्थमाह व्याप्यस्येति । वस्तुतो यो व्याप्यो धूमादिस्तन्निष्ठपर्वतादिवृत्तित्वमिति । पर्वतवदन्यस्यापि कदाचित्पक्षत्वं भवतीत्यादिपदम् । यदज्ञातमनुमीयते तत्साध्यम् ; येन साध्यते स हेतुः ; यत्र साध्यते स पक्षः ; हेतोः पक्षे सत्त्वं पक्षधर्मतेति ।

प्रत्यक्षानुमानेत्यत्रानुमानपदेन परामर्शो विवक्षणीय इति वक्ष्यति । स्वार्थानुमानस्थले परामर्शस्यानुमानत्वेऽपि परार्थानुमानस्थले वाक्यस्यैवानुमानत्वात् कथं सर्वत्र परामर्शोऽनुमानमिति शङ्का मा भूदिति, स्वयमेवानुमानद्वैविध्यमुपपाद्यानुमानपदेन परामर्शमात्रग्रहणस्य युक्ततां गमयितुमारभते

अनुमानं द्विविधम्, स्वार्थं परार्थं चेति, स्वार्थं स्वानुमितिहेतुः । तथा हि, स्वयमेव भूयो दर्शनेन यत्र धूमस्तत्राग्निरिति महानसादौ व्याप्तिं गृहीत्वा पर्वतसमीपं गतः पर्वते धूमं पश्यन् तद्गते चाग्नौ सन्दिहानः व्याप्तिं स्मरति यत्र धूमः तत्राग्निरिति ।

अनुमानमित्यादिना । **अनुमानं** तार्किकैरनुमानपदेन व्यवह्रियमाणम् । स्वार्थमिति स्वस्यार्थः प्रयोजनं यस्मात्तत् । परार्थं परस्यार्थः प्रयोजनं यस्मात्तत् । प्रयोजनं च प्रकृतेऽनुमितिरित्याशयेन समासार्थमेकस्याह स्वानुमितिहेतुरिति । स्वपदेन यस्मिन्ननुमानमस्ति स पुरुषो ग्राह्यः । उपपाददयितुमाह **तथा हीति** । सर्वत्र तथा हीत्यारभ्योपपादकवाक्यं यावत्प्रयुज्यते तावद्वाक्यप्रतिपाद्यार्थनिष्ठं हेतुत्वं हिशब्देनोच्यते । तथेत्यत्र थाल्प्रत्ययार्थप्रकारे हेतुत्वस्य निरूपकतासम्बन्धेनान्वयः । तथा च पूर्वोक्तार्थः वक्ष्यमाणार्थनिष्ठहेतुतानिरूपकपूर्वोक्तप्रकारविशिष्ट इति **तथा ही**त्यस्यार्थः । उपपादयति **स्वयमेवेति** । एवकारः पञ्चावयववाक्यप्रयोक्तृपुरुषान्तरव्यवच्छेदार्थः । 'तत्र धूमं पश्य'न्नित्युक्तौ तत्रेत्यस्य पर्वतसमीप इत्येवार्थः प्रतीयेत, पर्वतसमीपमित्येव प्रागुक्तत्वात् । अतः पुनः **पर्वत** इत्युक्तम् । **तद्गते** पर्वतं गते तन्निष्ठे । स्वेतरानधीनं स्वाधीनं भूयोदर्शनजन्यं यत्र धूमस्तत्राग्निरित्यानुपूर्वीकशब्दगम्यव्याप्तिविषयकं महानसाद्यवच्छिन्नत्वविषयकं च यद्ग्रहणं तदुत्तरकालिकपर्वतसमीपवृत्तिसंयोगानुकूलव्यापाराश्रयाभिन्नः पर्वतविषयकधूमविषयकदर्शनाश्रयः समुच्चयाश्रयपर्वतनिष्ठाग्निविषयकसन्देहाश्रयः 'यत्र धूमस्तत्राग्नि'रिति शब्दगम्यव्याप्तिविषयकस्मरणाश्रयत्ववानित्येवं बोधः । प्रथमतोऽग्निधूमयोः सहचरितयोर्महानसादौ भूयोदर्शनम् । ततो धूमसामान्यस्याग्निसामान्येन व्याप्तिरूपसम्बन्धज्ञानम् । अथ कदाचित् पर्वते धूमदर्शनम् । ततः पूर्वानुभूतव्याप्तिरूपसम्बन्धस्मरणम् । पश्चाद्विशिष्टपरामर्शः । ततोऽनुमितिरिति स्वार्थानुमानस्थले क्रमः । सकृद्धेतु-

तदनन्तरं वह्निव्याप्यधूमवानयं पर्वतः इति ज्ञानमुत्पद्यते। अयमेव लिङ्गपरामर्श इत्युच्यते। तस्मात् पर्वतो वह्निमानित्यनुमितिरुत्पद्यते। तदेतत् स्वार्थानुमानम्।

यत्तु स्वयमेव धूमादग्निमनुमाय परप्रतिपत्त्यर्थं पञ्चावयववाक्यं प्रयुंक्ते तत्परार्थानुमानम्। यथा, पर्वतो वह्निमान्, धूमवत्त्वात्, यो यो धूमवान् स सोऽग्निमान् यथा महानसम्, तथा चायम्,

---

साध्यदर्शने साध्यसामान्यस्य हेतुसामान्यस्य च व्याप्तिग्रहो नोदेति। भूयोदर्शने तु तथेति प्रायिकस्थितिपर्यालोचनेन भूयोदर्शनं व्याप्तिग्रहकारणमुक्तम्। तदनन्तरमिति। न विद्यते अन्तरं व्यवधानं यत्र तत् अनन्तरम् अव्यवहितम्। प्रकृते चाव्यवहितोत्तरमित्यर्थः। व्याप्तिस्मरणनिरूपिताव्यवहितोत्तरत्वाश्रयोत्पत्त्याश्रयत्ववद् ज्ञानमिति। अयमेवेत्येवकारेण धूमदर्शनव्याप्तिस्मरणव्यवच्छेदः। परामर्शपदस्य ज्ञानमात्रार्थकतया लिङ्गपरामर्श इत्यस्य लिङ्गविषयकज्ञानमित्यर्थ इति यद्यपि पर्वतो धूमवान् वह्निव्याप्यो धूम इति ज्ञानयोरपि लिङ्गपरामर्शत्वं शक्यशङ्कम्, अथापि व्याप्तिविशिष्टपक्षधर्मताज्ञान एव लिङ्गपरामर्शपदं पारिभाषिकमिति भावः। तस्मादिति परामर्शादित्यर्थः। पञ्चम्यर्थो निरूपितत्वमुत्पत्तावन्वेति। तत् स्वाधीनम् एतत् लिङ्गपरामर्शरूपं ज्ञानम्। परार्थानुमानं व्युत्पादयति यत्त्विति। यत् पञ्चावयववाक्यमित्यन्वयः। स्वयमेव धूमादग्निमनुमायेति। स्वस्य ज्ञानाभावे परं प्रति प्रतिपादनमशक्यमित्यभिप्रेत्येदमुक्तम्। स्वयमेवेत्यविवक्षितम्। तत् पञ्चावयववाक्यम्। पञ्च अवयवा यस्य तत् पञ्चावयववाक्यम्। पञ्चावयवान् प्रकृते विशिष्य दर्शयति यथेति। यादृशपञ्चावयववाक्यत्वरूपप्रकारविशिष्टमित्यर्थः। धूमवत्त्वादिति द्वितीयोऽवयवः। तथा चायमिति चतुर्थोऽवयवः। इतीति उक्तशब्दसमुदा-

तस्मात्तथेति । अनेन वाक्येन प्रतिपादितात् लिङ्गात् परोऽप्यग्निं प्रतिपद्यते । प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्च अवयवाः। पर्वतो वह्निमानिति प्रतिज्ञा । धूमवत्त्वादिति हेतुः । यो यो धूमवान् सोऽग्निमान् यथा महानसमित्युदाहरणम् । तथा चायमित्यु-

---

यनिष्ठानुपूर्व्यवच्छिन्नमित्यर्थः । अस्य वाक्यस्य परार्थानुमानत्वं कथमित्यत्र तस्यानुमितिप्रयोजकत्वं विद्यमानं दर्शयति अनेनेति । प्रतिपादितात् ज्ञापितात् प्रतिपादनं ज्ञानानुकूलव्यापारः । स चैतद्वाक्यमेव । तथा चैतद्वाक्याभिन्नव्यापारजन्यज्ञानविषयीभूतादित्यर्थः । क्तप्रत्ययस्य फलाश्रय इत्यर्थः । फलाश्रयत्वं च प्रकृते ज्ञानविषयत्वमिति । प्रतिपद्यत इति । तथा च परो वाक्यं श्रुत्वा तदर्थं बुद्ध्यते । ततो व्याप्तिविशिष्टपक्षधर्मता प्रकृतेऽस्तीति परामृशति । ततोऽनुमितिमान् भवतीति भावः । पञ्चावयववाक्यमित्युक्तम् । तत्रावयवानां पारिभाषिकं नाम ग्राहयति प्रतिज्ञेति । कस्य भागस्य किं नामेत्यत्र विशदयति पर्वत इति । पर्वतः पक्षः वह्निस्साध्यः । तथा च साध्यविशिष्टपक्षप्रतिपादकवाक्यं प्रतिज्ञेत्यर्थः । धूमवत्त्वादिति धूमादिति यावत् । ज्ञानज्ञाप्यत्वं पञ्चम्यर्थः । ज्ञाने धूमस्य विषयितासम्बन्धेनान्वयः । धूमश्च हेतुः । तथा च हेतुविषयकज्ञानज्ञाप्यत्वबोधकवाक्यं हेतुवाक्यमित्यर्थः । उदाहरणे वाक्यत्रयम् । यो यो धूमवानिति प्रथमम् । सोऽग्निमानिति द्वितीयम् । यथा महानसमिति तृतीयम् । प्रथमयच्छब्दः प्रकृते धूमवदेकव्यक्तिपरः । द्वितीययच्छब्दो व्यक्त्यन्तरपरः । स इति यच्छब्दद्वयोपात्तसर्वव्यक्तिपरः । अथ वा स इत्यस्य पूर्ववाक्यानुसारात् धूमवद्व्यक्तिरित्यर्थः । यथेति धूमवत्त्वाग्निमत्त्वरूपयादृशप्रकारद्वयविशिष्ट इत्यर्थः । अत्रोदाहरणे धूमवद्व्यक्तौ वह्निमत्त्वबोधके धूमवत्त्वव्यापकवह्निमत्त्वबोधकत्वमप्यस्ति । उद्देश्य-

पनयः । तस्मात्तथेति निगमनम् । स्वार्थानुमितिपरार्थानुमित्योः लिङ्गपरामर्श एव करणं, तस्माल्लिङ्गपरामर्शोऽनुमानम् ॥

लिङ्गं त्रिविधं, अन्वयव्यतिरेकि, केवलान्वयि, केवलव्यतिरेकि चेति । अन्वयेन व्यतिरेकेण च व्याप्तिमत् अन्वयव्यतिरेकि, यथा,

---

तावच्छेदकव्यापकत्वस्य विधेये भानसम्भवात् । वीप्साबलाच्च तादृशभानं स्वरसम् । तथा च व्याप्तिप्रतिपादकवाक्यमुदाहरणमित्युक्तं भवति । तथा चायम् वह्निव्याप्यधूमवान् पर्वतः । साध्यव्याप्यहेतुमत्पक्षप्रतिपादकवाक्यमुपनय इत्यर्थः । तस्मात्तथा वह्निव्याप्यधूमवत्त्वाद्वह्निमान् ज्ञानज्ञाप्यत्वं पञ्चम्यर्थः । तथा च साध्यव्याप्यहेतुज्ञानज्ञाप्यसाध्यवत्प्रतिपादकवाक्यं निगमनमिति सिद्धम् । एवं चेदृशसमुदायरूपाद्वाक्याद्व्याप्तिपक्षधर्मताविशिष्टज्ञानोत्पत्तेः प्रागुक्तत्वात् स्वार्थानुमिताविव परार्थानुमितावपि परामर्श एव कारणम् । वाक्यस्य तदुपयोगित्वेनान्यथासिद्धत्वान्न करणत्वम् । केवलमनुमितिप्रयोजकत्वमात्रेण तत्र परार्थानुमानव्यवहार इति दर्शयति स्वार्थेति । तथा च प्रत्यक्षानुमानेति विभागवाक्येऽनुमानपदेन परामर्श एव विवक्षित इति दर्शयति तस्मादिति । व्याप्तिविशिष्टपक्षधर्मताज्ञानमित्यत्र व्याप्तिः सर्वत्र नैकरूपा । किं तु क्वचिदन्वयव्याप्तिरूपा क्वचिद्व्यतिरेकव्याप्तिरूपा चेति व्युत्पादयितुं लिङ्गत्रैविध्यं पूर्वैरुक्तं दर्शयति लिङ्गमिति । अन्वयश्च व्यतिरेकश्च तावस्य स्त इत्यन्वयव्यतिरेकि । केवलो व्यतिरेकाभावविशिष्टोऽन्वयोऽस्यास्तीति केवलान्वयि । केवलोऽन्वयाभावविशिष्टो व्यतिरेकोऽस्यास्तीति केवलव्यतिरेकि । अत्र कस्यान्वयः कस्य व्यतिरेकश्च विवक्षितः ? अन्वयवत्त्वं व्यतिरेकवत्त्वं च केन सम्बन्धेनेत्यत्र विशदयति अन्वयेनेति । तृतीयार्थो निरूपितत्वं व्याप्तावन्वेति । तथा च व्याप्तौ साध्यादिनिरूपितत्वस्यैव सम्भवादन्वयपदस्य साध्यान्वयः साध्यसम्बन्धः साध्यवत्त्वमित्यर्थः ।

वह्नौ साध्ये धूमवत्त्वम् । यत्र धूमः तत्राग्निः यथा महानस इत्यन्वयव्याप्तिः । यत्र वह्निर्नास्ति तत्र धूमोऽपि नास्ति यथा महाह्रद इति व्यतिरेकव्याप्तिः ॥

साध्यवत्त्वं च साध्यमेव । व्यतिरेकपदस्य साध्यव्यतिरेकः साध्याभाव इत्यर्थ इति सूचितम् । एवञ्च साध्यनिरूपितव्याप्तिमत्वे सति साध्याभावनिरूपितव्याप्तिमत्त्वमन्वयव्यतिरेकित्वम् । अन्वयव्यतिरेकीत्यत्रेनिप्रत्ययेन स्वनिरूपितव्याप्तिमत्त्वरूपसम्बन्धेनान्वयव्यतिरेकवान् विवक्षित इत्युक्तं भवति । **साध्ये** सिद्धिविषये,अनुमितिविषये । इयं सति सप्तमी । ईदृशस्थले सप्तम्याः समभिव्याहृतधात्वर्थ एवार्थः । अतोऽत्र वह्नाविति सप्तम्याः साध्य इत्यत्र सिद्धिरूपधात्वर्थोऽर्थः । तस्य समानकालिकत्वसम्बन्धेन भवनक्रियायामन्वयः । भवतीत्यध्याहारः । तथा च साध्याभिन्नवह्निविषयकसिद्धिसमानकालिकयादृशान्वयव्यतिरेकित्वरूपप्रकारविशिष्टभवनाश्रयो धूमवत्त्वमिति बोधः । ननु लिङ्गस्य साध्यव्याप्तिः साध्याभावव्याप्तिश्चेत्युभयं कथं स्यात्, मिथो विरोधादित्याशङ्कायां साध्याभावव्याप्तिरित्युक्तौ साध्याभावेन साहचर्यनियम इति न मन्तव्यम् । अपि त्वन्यविधैव सा व्याप्तिरिति बोधयितुमाह **यत्रेति** । **महानस** इति **महाह्रद** इति च सप्तम्यन्तम् । **तत्र धूमोऽपि नास्तीति** । वह्न्यभाववद्ध्रदादिनिरूपिताधेयत्वाभाववान् धूम इत्यर्थः । इति **व्यतिरेकव्याप्तिः** एतदानुपूर्वीकशब्दगम्या व्यतिरेकव्याप्तिः । अत्र वह्न्यभाववन्तमुद्दिश्य धूमाभावविधाने तात्पर्यात् तयोर्व्याप्यव्यापकभावो भासते । तथा च वह्न्यभावव्यापकीभूताभावप्रतियोगी धूम इत्युदाहरणाल्लभ्यते । एवञ्च साध्यनिरूपितव्याप्तिर्नाम साध्येन साहचर्यनियमः, साध्यव्यतिरेकनिरूपितव्याप्तिर्नाम साध्याभावव्यापकीभूताभावप्रतियोगित्वम् । तदुभयञ्च मिथो विरुद्धमिति भावः । नन्विदमन्वयव्यतिरेकिलक्षणं केवलव्यतिरेकिण्यतिव्याप्तम् , तस्यापि वस्तुतोऽन्वयव्याप्तिमत्त्वादिति चेन्न ।

अन्वयमात्रव्याप्तिकं केवलान्वयि । यथा, घटोऽभिधेयः प्रमेयत्वात् पटवत् इत्यत्र प्रमेयत्वाभिधेयत्वयोः व्यतिरेकव्याप्तिर्नास्ति, सर्वस्यापि प्रमेयत्वात् अभिधेयत्वाच्च ।

प्रकृतलक्षणघटकमन्वयव्याप्तिमत्त्वं नाम प्रकृतपक्षभिन्नपदार्थावच्छिन्नसाध्यव्याप्तिमत्त्वम् । साध्यसामानाधिकरण्यं हि व्याप्तिः । तच्च प्रकृतपर्वतादिपक्षभिन्नमहानसाद्यवच्छेदेनापि हेतावस्तीति लक्षणसमन्वयः । तत्र तु पृथिवीसामान्यस्य पक्षत्वात्तद्भिन्ने कुत्रापि हेतुसाध्याभावान्न दोष इति । केवलान्वयि लक्षयति **अन्वये**ति । अन्वयमात्रेण व्याप्तिर्यस्य, प्रकृतहेतुनिष्ठव्याप्तित्वव्यापकं यत् अन्वयनिरूपितत्वं तदन्वयनिरूपितत्वविशिष्टव्याप्तिमत्केवलान्वयिशब्दवाच्यमिति । यत्र हि व्याप्तिद्वयमप्यस्ति तत्र व्याप्तित्वस्य व्यतिरेकव्याप्तावपि सत्त्वात् तत्र साध्यनिरूपितत्वाभावात् स्वनिष्ठव्याप्तित्वव्यापकान्वयनिरूपितत्वकत्वरूपमिदं लक्षणं न वर्तते । उदाहरति **यथे**ति । 'घटोऽभिधेयः प्रमेयत्वात्पटव' दित्यानुपूर्वीकशब्दगम्यहेतुरुक्तकेवलान्वयित्वरूपप्रकारविशिष्ट इति बोधः । पञ्चावयवप्रयोगे कर्तव्येऽपि तत्र पक्षसाध्यहेतुदृष्टान्तभेदानां प्रदर्शनेऽन्यत्सर्वं स्वयमेव पूरयितुं शक्यमिति **घटोऽभिधेयः प्रमेयत्वात् पटवदि**त्येतावन्मात्रमुक्तम् । उपपादयति **अत्रे**ति । **अत्र** अस्मिन् प्रयोगे 'घटोऽभिधेयः प्रमेयत्वात्पटव'दिति शब्दराशौ । ज्ञाप्यत्वं तत्रोऽर्थः । तादृशशब्दराशिगम्यार्थपर्यन्तो वेदंशब्दार्थः । घटकत्वं तत्रर्थः प्रमेयत्वाभिधेयत्वान्वयि । षष्ठ्यर्थो निरूपितत्वं धात्वर्थे सम्बन्धित्वेऽन्वेति । तस्याख्यातार्थ आश्रयत्वे, तस्य प्रतियोगितानिरूपकत्वसम्बन्धेन नञर्थेऽभावे, तस्याश्रयतासम्बन्धेन व्यतिरेकव्याप्तौ । तथा च व्यतिरेकव्याप्तेः प्रमेयत्वनिष्ठत्वमभिधेयत्वनिरूपितत्वं च नास्तीत्यर्थः । कुत इत्यत्राह **सर्वस्ये**ति । ज्ञानज्ञाप्यत्वं पञ्चम्यर्थो नञर्थाभावान्वयि । व्यतिरेकव्याप्तिर्हि अभावव्यापकीभूताभावप्रतियोगित्वम् । अभिधेयत्वरूपसाध्यस्य

व्यतिरेकमात्रव्याप्तिकं केवलव्यतिरेकि । यथा, पृथिवी इतरेभ्यो भिद्यते गन्धवत्त्वात् । यदितरेभ्यो न भिद्यते न तत् गन्धवत्, यथा, जलम् । न चेयं तथा। तस्मान्न तथेति । अत्र यत् गन्धवत्

सर्वनिष्ठतयाऽभिधेयत्वाभावस्य कुत्रापि वक्तुमशक्यत्वात् साध्याभावेत्यप्रसिद्धम् । प्रमेयत्वरूपहेतोरपि सर्वनिष्ठतया हेतावभावप्रतियोगित्वरूपव्याप्तिर्दुर्वचा । अतो व्यतिरेकव्याप्तिर्नात्र सम्भवतीति भावः । अत्र सर्वनिष्ठत्वोपपादनं साध्यमात्रस्यैवापेक्षितम् । हेतौ तदुपपादनं तु वस्तुतः प्रकृतहेतोरपि तादृशत्वात् । असर्वनिष्ठोऽपि केवलान्वयिहेतुर्भवति यथा घटोऽभिधेयो द्रव्यत्वादिति । असर्वनिष्ठं साध्यं सर्वनिष्ठश्च हेतुर्यदि विवक्ष्यते, स हेतुरसद्धेतुरेव स्यादिति न तादृशस्य लक्ष्यत्वम् । तथा च केवलान्वयिसाध्यनिरूपितव्याप्तिमत्त्वं केवलान्वयिलिङ्गलक्षणम् । अत्र केवलान्वयित्वमत्यन्ताभावाप्रतियोगित्वम् । न च गगनाभावस्य केवलान्वयित्वं न स्यात् गगनं प्रति प्रतियोगित्वादिति वाच्यम्। गगनाभावाभावस्य गगनरूपतया हि गगनाभावस्य गगनात्मकात्यन्ताभावप्रतियोगित्वम् वक्तव्यम् । गगनाभावाभावश्चाप्रसिद्ध इति कुतो गगनरूपत्वं तस्य ? कुतस्तरां च गगनाभावस्य प्रतियोगित्वमिति । पूर्वमन्वयिस्थलीयोदाहरणोपनयनिगमनप्रयोगरीतेर्दर्शितत्वात्केवलान्वयिनिरूपणावसरे तद्विशदमनुक्त्वा 'घटोऽभिधेयः प्रमेयत्वात् पटव'दित्येतावदुक्तवान् । व्यतिरेकिस्थले तद्रीतेरप्रदर्शितत्वादत्रैव विशदमाह यथेत्यादिना । इतरेभ्यो न भिद्यते इतरप्रतियोगिकभेदाश्रयत्वाभाववत् । न गन्धवत् गन्धवत्प्रतियोगिकभेदवत् । अत्रेतरभेदाभाववद्रूपतच्छब्दार्थमुद्दिश्य गन्धवद्भेदविधाने इतरभेदाभावव्यापको गन्धवद्भेद इति लभ्यते । गन्धवद्भेदश्च गन्धाभाव एव । अतः प्रकृतव्यतिरेकव्याप्तिलाभः । न चेयं तथा पृथिवी गन्धाभाववती न । तस्मान्न तथेति । (गन्धाभाववद्भिन्नत्वात्) गन्धवत्त्वादितरभेदाभाव-

तदितरभिन्नं इत्यन्वयदृष्टान्तो नास्ति । पृथिवीमात्रस्य पक्षत्वात् ।
सन्दिग्धसाध्यवान् पक्षः, यथा धूमवत्त्वे हेतौ पर्वतः ।

ती नेत्यर्थः । ननु 'हेत्वपदेशात्प्रतिज्ञायाः पुनर्वचनं निगमन'मिति सूत्रे (न्या १--१--३९) उदाहरणोपनयद्वैविध्येऽपि निगमनद्वैविध्यं नास्तीति भाषितत्वादन्वयव्याप्तिस्थल इव तस्मात्तथेत्येतावदेव निगमनं वक्तुमुचितमिति चेदुच्यते हेतुनिर्देशपुरस्सरं प्रतिज्ञावाक्यं तादृशानुपूर्वीकमेव निगमनेऽपि घटनीयमित्येव भाष्याशयः । यदि तु प्रतिज्ञागतानुपूर्वीमुपेक्ष्य प्रतिज्ञार्थबोधकशब्दान्तरघटनेऽपि नातीव बाधकमिति 'तस्मात्तथे'ति तथाशब्दघटनेनान्वयिनिगमनमुच्यते, तर्हि व्यतिरेकिनिगमनेऽर्थस्पष्टत्वाय 'न तथे'ति प्रयोगेऽपि न किञ्चिद्बाधकमिति ग्रन्थकाराशयः । नन्वन्वयव्याप्तिरहितत्वे सति व्यतिरेकव्याप्तिमत्त्वरूपं केवलव्यतिरेकिलक्षणमसम्भवि । वस्तुतो गन्धवत्त्वं यत्र तत्रेतरभेदसत्त्वेनान्वयव्याप्तेरक्षतत्वादित्यत्राह अत्रेति । अयं भावः—यद्यप्यन्वयव्याप्तिरस्ति, अथाप्यनुमितेः पूर्वं तद्ज्ञानं न भवति । दृष्टान्ताभावे व्याप्तिनिश्चयासम्भवात् । प्रकृते गन्धवतः सर्वस्य पक्षत्वेन पक्षातिरिक्तस्य हेतुसाध्याधिकरणस्याभावान्न व्याप्तिनिश्चयः । अतोऽन्वयव्याप्तिशून्यत्वस्थाने निश्चितान्वयव्याप्तिशून्यत्वेति निवेशः कार्यः । यद्वा प्रकृतपक्षातिरिक्तावृत्तिसाध्यनिरूपितव्यतिरेकव्याप्तिमत्त्वं केवलव्यतिरेकिलक्षणं वाच्यमिति । **पृथिवीमात्रस्य** सर्वस्या अपि पृथिव्याः । ननु पृथिव्याः पक्षत्वमप्यस्तु, तथा दृष्टान्तत्वमपि । तत् कथमन्वयदृष्टान्तो नास्तीत्युच्यत इत्याशङ्कायां 'दृष्टान्तो हि सपक्षः ; स कथं पक्ष' इति बोधयितुं पक्षादिकं विविच्य दर्शयति **सन्दिग्धेति** । सन्देहप्रकारीभूतं साध्यं प्रकारतयाऽस्यास्तीति सन्दिग्धसाध्यवान् । मतुबर्थः सम्बन्धी प्रकृते विशेष्यतावान् सन्देहप्रकारत्वविशिष्टसाध्यानिरूपितविशेष्यतावान् साध्यनिष्ठसन्देहप्रकारतानिरूपितविशेष्यतावानिति यावत् । तत्त्वं पक्षलक्षणम् । धूमवत्त्वे हेतौ

निश्चितसाध्यवान् सपक्षः । यथा, तत्रैव महानसः । निश्चितसाध्याभाववान् विपक्षः । यथा, अत्रैव महाह्रदः । एवं सद्धेतवो निरूपिताः ।

पर्वतः धूमवत्त्वहेतुस्थलीयपर्वतः । तत्स्थलीयत्वं च तद्ज्ञानविषयत्वम् । तथा च हेताविति सप्तम्या ज्ञानविषयत्वरूपसम्बन्धोऽर्थ आश्रयतया पर्वतेऽन्वेति । धूमवत्त्वाभिन्नहेतुविषयकज्ञानविषयताश्रयपर्वतो यत्प्रकारकवि-शिष्ट इति बोधः । निश्चितेति निश्चयप्रकारेत्यर्थः । मतुबर्थो विशे-ष्यः । पूर्ववत् साध्यनिष्ठनिश्चयप्रकारतानिरूपितविशेष्यितावत्त्वं सपक्ष-लक्षणम् । तत्र धूमरूपहेतौ । तथा च तादृशसन्देहस्थलं निश्चयस्थलं च न युगपदेकं भवितुमर्हतीति भावः । एवं पक्षदृष्टान्तभेदं प्रदर्श्य प्र-सङ्गाद्व्यतिरेकदृष्टान्तरूपविपक्षमपि व्युत्पादयति निश्चितेति । निश्चयप्रका-रेति साध्याभावान्वयि । एवं लिङ्गत्रैविध्यनिरूपणेन व्याप्तिभेदस्तदधीन-परामर्शभेदश्च दर्शितः । तथा चेदृशव्याप्तिविशिष्टलिङ्गपरामर्शोऽनुमिति-करणमिति सिद्धम् ।

अथास्य, न वस्तुतस्साध्यनिरूपिता या व्याप्तिर्वस्तुतस्तद्वान् यो हेतु-र्वस्तुतस्तद्वत्पक्षविषयकज्ञानत्वेन रूपेण, परामर्शस्य कारणत्वम् । तथा सति ह्रदो धूमव्याप्यवह्निमानिति भ्रमात्मकपरामर्शात् ह्रदो धूमवानिति भ्रमा-त्मकानुमितेरनुत्पत्तिप्रसङ्गात् । अतः परामर्शे यस्य यस्य यद्यदंशे प्रका-रत्वं, तत्तन्निष्ठप्रकारतानिरूपिततत्तन्निष्ठप्रकारतेति रीत्या विशेषितहेतुनिष्ठ-प्रकारतानिरूपितपक्षनिष्ठविशेष्यताशालिनिश्चयत्वेन कारणत्वम् । तत्र च स्थले वस्तुतस्तस्य तस्य पदार्थस्य सम्बन्धाभावेऽपि भ्रमात्मकज्ञानेन तस्य तस्य तत्तदंशे प्रकारतया ग्रहणान्न तत्र कारणत्वहानिरिति कारणतावच्छेद-करूपशिक्षाप्रदर्शनमभिसंधाय वस्तुतो व्याप्तिपक्षधर्मतावैशिष्ट्यशून्यान् अ-

सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पञ्च हेत्वाभासाः ।

सव्यभिचारोऽनैकान्तिकः । स त्रिविधः, साधारणासाधारणानुपसंहारिभेदात् । तत्र साध्याभाववद्वृत्तिः साधारणः । यथा पर्वतो वह्निमान् प्रमेयत्वात्, अत्र प्रमेयत्वस्य वह्न्यभाववति ह्रदे विद्यमानत्वात् ।

सर्वसपक्षविपक्षव्यावृत्तो हेतुः असाधारणः । यथा, शब्दो

सद्धेतूनपि निरूपयति **सव्यभिचारे**त्यादिना । **हेत्वाभासा** इति । आभासन्त इत्याभासा ईषद्भासमानाःस्वगतयथावास्थितधर्मं विना भासमाना भ्रमविषयाः । हेतव आभासाः, अभेदसम्बन्धेन हेतुप्रकारकभ्रमविषयाः व्याप्तिपक्षधर्मताविशिष्टत्वरूपेहेतुत्वभ्रान्तिविषया इति यावत् । व्यभिचारेण सह वर्तत इति **सव्यभिचारः**, व्यभिचारोऽन्यत्रापि सम्बन्धः प्रकृतसाध्यवदन्यवृत्तित्वं, तद्विशिष्ट इत्यर्थः । इत्थं च साधारण एव सव्यभिचारः स्यात् । अतस्तदर्थमाह **सव्यभिचार** इति । **अनैकान्तिक** इति । एकश्चासावन्तश्चैकान्तः 'नित्यत्वमप्येकोऽन्तः, अनित्यत्वमप्येकोऽन्त' इति भाष्यानुसारात् । अन्तो निश्चेतव्यो धर्मः कोटिः । एकान्ते भव एककोटिस्थः एककोटिसमानाधिकरणः एकधर्मनिश्चयप्रयोजक इति यावत् । न ऐकान्तिक एकधर्मनिश्चयाप्रयोजकोऽनेकधर्मज्ञानप्रयोजकः संशयप्रयोजक इति यावत् । तथा च साध्यतदभावसंशयप्रयोजकत्वमनैकान्तिकत्वमित्यलम् । साधारणः साध्यतदितरसम्बन्धी साध्यवद्वृत्तिः साध्याभाववद्वृत्तिश्चेत्यर्थः । तत्र साध्यवद्वृत्तित्वांशं व्यर्थं परित्यज्याह **साध्ये**ति । **प्रमेयत्वा**दिति । 'इत्यत्र प्रमेयत्व'मिति शेषः । **अत्र** अस्मिन् प्रयोगे । असाधारणः पक्षासाधारणः पक्षेतरावृत्तिः सन् पक्षवृत्तिः पक्षेतरश्च सपक्षो विपक्षश्चेत्यभिसन्धाय निष्कृष्टमाह **सर्वे**ति । सर्वेभ्यः सपक्षेभ्यो विपक्षेभ्यश्च व्यावृत्तः । सपक्षविपक्षशब्दार्थौ प्रागुक्तौ । व्यावृत्तोऽभावप्रतियोगी ।

नित्यः शब्दत्वात्, अत्र शब्दत्वं हि सर्वेभ्यो नित्येभ्योऽनित्येभ्यो व्यावृत्तम्, शब्दमात्रवृत्ति ।

अन्वयव्यतिरेकदृष्टान्तरहितोऽनुपसंहारी । यथा सर्वं अनित्यं प्रमेयत्वात् । अत्र सर्वस्यापि पक्षत्वात् दृष्टान्तो नास्ति ।

साध्याभावव्याप्तो हेतुः विरुद्धः । यथा, शब्दो नित्यः कार्यत्वात्, अत्र कार्यत्वं नित्यत्वाभावेनानित्यत्वेन व्याप्तम् ।

यस्य साध्याभावसाधकं हेत्वन्तरं विद्यते सः सत्प्रतिपक्षः ।

सद्धेतुवारणाय सपक्षव्यावृत्तत्वम् विरुद्धवारणाय सर्वविपक्षव्यावृत्तत्वम् । सर्वसपक्षव्यावृत्तत्वमेवालम्, दुष्टसङ्करेऽपि दोषासङ्करात् । अनुपसंहारीत्यस्योपसंहारकभिन्न इत्यर्थः । उपसंहारकत्वं दृष्टान्तबलेन साध्यस्य पक्षे सम्पादकत्वम् । तथा च दृष्टान्तप्रयुक्तसाध्यानुमितिजनकताशून्योऽनुपसंहारीत्यर्थः । तत्र लाघवाद्दृष्टान्तरहित इत्येवालम् । परं तु केवलान्वयिनि केवलव्यतिरेकिणि चातिव्याप्तिवारणाय दृष्टान्तसामान्यराहित्यं विवक्षणीयमिति दर्शयति अन्वयेति । दृष्टान्तो निश्चितस्थलं निश्चयविशेष्य इति यावत् । तथा च साध्यान्वयप्रकारकनिश्चयविशेष्यरहितत्वे सति साध्यव्यतिरेकप्रकारकनिश्चयविशेष्यरहित इत्यर्थः । दृष्टान्तराहित्यं चैकज्ञानविषयत्वसम्बन्धेन दृष्टान्ताभाववत्त्वम् । तच्च साध्यादिप्रकारकनिश्चयविषयविषयकज्ञानाविषयत्वम् । तथा च लाघवात् साध्यप्रकारकनिश्चयाविषयत्वे सति साध्याभावप्रकारकनिश्चयाविषयत्वमनुपसंहारित्वम् । केवलान्वयिस्थले केवलव्यतिरेकिस्थले च साध्यतदभावप्रकारकनिश्चयविषयत्वं हेतोः परामर्शदशायामस्ति । तद्वदत्र नास्तीति लक्षणसमन्वयः । हेतुः हेतुत्वेनाभिमत इत्यर्थः तस्य सद्धेतुत्वाभावात् । इदं च स्वरूपकीर्तनम्; न लक्षणघटकम् । सत्प्रतिपक्ष इत्यस्य सन् प्रतिपक्षो यस्येति विग्रहः । प्रतिपक्षपदस्य साध्याभावसाधकहेत्वन्तरमित्यर्थः । तदाह यस्येति । अ-

यथा, शब्दो नित्यः श्रावणत्वात्, शब्दोऽनित्यः कार्यत्वात् घटवत्।

असिद्धस्त्रिविधः, आश्रयासिद्धः स्वरूपासिद्धः व्याप्यत्वासिद्धश्चेति। आश्रयासिद्धो यथा, गगनारविन्दं सुरभि अरविन्दत्वात् सरोजारविन्दवत्। अत्र गगनारविन्दमाश्रयः, स च नास्त्येव!

स्वरूपासिद्धो यथा, शब्दो गुणः चाक्षुषत्वात् रूपवत्। अत्र चाक्षुषत्वं शब्दे नास्ति, शब्दस्य श्रावणत्वात्।

सोपाधिको व्याप्यत्वासिद्धः। साध्यव्यापकत्वे सति साधनाव्यापकत्वं उपाधित्वम्। साध्यसमानाधिकरणात्यन्ताभावाप्रति-

---

सिद्धत्वमसिद्ध्याश्रयत्वमभावाश्रयत्वम्। अभावनिरूपिताश्रयत्वं चैकज्ञानविषयत्वसम्बन्धेन। अभावश्चाश्रय-स्वरूप-व्यापकत्वान्यतमप्रतियोगिकः। आश्रयासिद्ध इति। आश्रयेण स्वाश्रयेण प्रकृतहेत्वाश्रयेण पक्षेणासिद्ध इति। गगनारविन्दम् गगनजन्यारविन्दम्। सरोजेति सरोजन्येत्यर्थः। सोपाधिक इति उपाधिविशिष्ट इत्यर्थः। वैशिष्ट्यं च व्यभिचारित्वसम्बन्धेन। कः पुनरुपाधिरित्यत्राह साध्येति। सतीति समभिव्याहृतपदघटकधात्वर्थसत्ता सप्तम्यर्थः। साधनाव्यापकत्वविशेषणतया सदित्येकं पदमध्याहार्यम्। सप्तम्यर्थसत्तायाः सामानाधिकरण्यसम्बन्धेन सदित्यत्र सत्तायामन्वयः। सामानाधिकरण्यं चोभयोर्निरूपकतासम्बन्धेन। तथा च साध्यव्यापकत्वविशिष्टं साधनाव्यापकत्वमुपाधित्वम्। साध्यसमानाधिकरणेति। साध्यपदं साध्याधिकरणलाक्षणिकम्। समानपदमभिन्नार्थकम्। समानमधिकरणं यस्य। तथा चाधिकरणपदं साध्याधिकरणवृत्तौ लाक्षणिकम्। पूर्वपदं तात्पर्यग्राहकम्। तादृशो योऽत्यन्ताभावस्तदप्रतियोगित्वं तं प्रति प्रतियोगित्वाभावः। साधनाव्यापकत्वमित्यत्राव्यापकत्वं तादृशात्यन्ताभावप्रतियोगित्वाभावाभावः। तथा निवेशे

योगित्वं साध्यव्यापकत्वम् । साधनवन्निष्ठात्यन्ताभावप्रतियोगित्वं साधनाव्यापकत्वम् । यथा, पर्वतो धूमवान् वह्नेरित्यत्रार्द्रेन्धनसंयोगः उपाधिः । यत्र धूमः तत्रार्द्रेन्धनसंयोग इति साध्यव्यापकता । यत्र वह्निः तत्रार्द्रेन्धनसंयोग इति नास्ति, अयोगोलके आर्द्रेन्धनसंयोगाभावात् । एवं साध्यव्यापकत्वे सति साधनाव्यापकत्वादार्द्रेन्धनसंयोगः उपाधिः । सोपाधिकत्वात् वह्निमत्वं व्याप्यत्वासिद्धम् ॥

यस्य साध्याभावः प्रमाणान्तरेण निश्चितः सः बाधितः । यथा, वह्निः अनुष्णः पदार्थत्वात् जलवत् । अत्रानुष्णत्वं साध्यं, तदभावः उष्णत्वं स्पार्शनप्रत्यक्षेण गृह्यते इति बोध्यम् ॥

व्याख्यातमनुमानम् ॥

गौरवादाह साधनेति । यत्र यावत्स्वधिकरणेषु । इति नास्ति एतदानुपूर्वीकशब्दगम्यं वह्निव्यापकत्वं नास्ति । कस्मादित्यत्राहायोगोलक इति । वह्निमतीत्यादिः । उपाधिः उपाधिशब्दवाच्यः । यस्येति । साध्य एतदन्वयः । प्रमाणान्तरेण प्रत्यक्षादिना निश्चितः पक्ष इति शेषः । यदीयसाध्यप्रतियोगिकाभावः प्रत्यक्षादिजन्यपक्षविशेष्यकनिश्चयविषय इत्यर्थः । प्रमाणान्तरेण निश्चित इतीदमविवक्षितम् । साध्याभाववत्पक्षको बाधित इत्येतावदेव विवक्षितम् । स्पार्शनप्रत्यक्षेणेति । नेदं प्रमाणान्तरपदसमानार्थकम्, तस्य प्रमितिकरणत्वगिन्द्रियादिपरत्वात् । गृह्यते विषयीक्रियते । इति बोध्यमिति । उष्णत्वं स्पार्शनप्रत्यक्षप्रयोज्यविषयताश्रयत्वनिरूपितप्रकारिताश्रयबोधविषय इत्यर्थः । एवं हेत्वाभासनिरूपणेन परामर्शस्य निरूप्यनिरूपकभावापन्नविषयताशालित्वेन कारणत्वमिति कारणतावच्छेदकस्वरूपं शोधितम् । निगमयति व्याख्यातमिति । प्रत्यक्षानुमानेत्येतद्धटकमनुमानं स्वरूपकारणादिनिरूपणेन वृत्तविशदनिरूणपविषय इत्यर्थः ।

इत्यनुमानपरिच्छेदः ।

उपमितिकरणमुपमानम् । संज्ञासंज्ञिसम्बन्धज्ञानमुपमितिः । तत्करणं सादृश्यज्ञानम् । अतिदेशवाक्यार्थस्मरणं व्यापारः ।

तथा हि । कश्चित् गवयपदार्थमजानन् कुतश्चिदारण्यकपुरुषात् गोसदृशो गवयः इति श्रुत्वा वनं गतो वाक्यार्थं स्मरन् गोसदृशपिण्डं पश्यति ।

अथ प्रत्यक्षानुमानोपमानोपमानेति वाक्ये उपमानपदग्राह्यं दर्शयितुमुपमानं निरूपयति उपमितीति । उपमानमुपमानपदवाच्यम् । उपमितिः केत्यत्राह संज्ञेति । अनेनोपमितिस्तुल्यत्वज्ञानं न प्रकृते विवक्षितमिति सूचितम् । संज्ञा वाचकशब्दः । संज्ञि वाच्यार्थः । संज्ञासंज्ञिनोः सम्बन्धो वाच्यवाचकभावरूपस्तस्य ज्ञानम् । तथा च पदवाच्यत्वप्रकारकज्ञानविशेष उपमितिशब्दवाच्य इति भावः । तत्करणम् तस्याः करणम् । सादृश्यज्ञानमिति । केचित्सादृश्यविशिष्टपिण्डदर्शनं करणमित्याहुः । अन्येऽतिदेशवाक्यार्थशाब्दबोधः करणमिति । अपरेऽतिदेशवाक्यार्थस्मरणमव्यवहितपूर्ववर्तित्वात्करणमिति । सर्वसाधारण्याय ज्ञानमिति । उपपादयति तथा हीति । तथा करणत्वरूपप्रकारविशिष्टम् । हिशब्दार्थो हेतुत्वम् । तथा च सादृश्यज्ञानं वक्ष्यमाणार्थनिष्ठहेतुतानिरूपकतत्करणत्वरूपप्रकारशालीति बोधः । कश्चित् ग्रामीणः । कुतश्चित् कस्मादपि । आरण्यकपुरुषविशेषणमेतत् । चिदादिशब्दसमभिव्याहृतः किंशब्दो बुद्धिस्थव्यक्तिवचनः । चिदादिपदं तात्पर्यग्राहकम् । श्रुत्वेति । गोसदृशो गवयशब्दवाच्य इति तदर्थं बुद्ध्वेति शेषः । क्त्वाप्रत्ययस्योत्तरकालिकत्वमर्थः । तथा च ध्वंसः क्त्वाप्रत्ययार्थः श्रवणस्य स्वप्रतियोगिकत्वसम्बन्धेन तत्रान्वयः । ध्वंसस्य कालिकसम्बन्धेन बोधेऽन्वय इत्युक्तं भवति । एवं क्त्वाल्यप्प्रयोगे सर्वत्रानुसन्धेयम् । अत्र 'गोसदृशं पिण्डं पश्यन् वाक्यार्थं स्मरती'ति ऋजुः पाठः । अत्राजानन् श्रुत्वेति निर्देशादज्ञानश्रवणयोः

तदनन्तरं अयं गवयपदवाच्यः इत्युपमितिरुत्पद्यते ।

व्याख्यातमुपमानम् ।

समानकालिकत्वं, श्रुत्वा वनं गत इति क्त्वाप्रत्ययेन श्रवणोत्तरगमनम्, वनं गतः पश्यन्निति क्ताप्रत्ययेन पिण्डदर्शने वनगमनानन्तर्यं, पश्यन् स्मरतीति शत्रा दर्शनस्मरणयोः समानकालिकत्वं च दर्शयति । तथा चायं भावः—पिण्डदर्शनबलाद्यदि वाक्यार्थस्मरणम्, तदा तदपि कारणम् । यदि गवयबुभुत्सया वनं प्रति गच्छतो दर्शनात् प्रागेव वाक्यार्थस्मरणं तदनन्तरक्षणे च पिण्डदर्शनं भवति, तदा तयोर्युगपदेकस्मिन् क्षणे वर्तमानत्वात् कारणत्वमक्षतमिति । तदनन्तरमिति पिण्डदर्शनवाक्यार्थस्मरणानन्तरक्षण इत्यर्थः । अयमिति न पुरोवर्तिव्यक्तिमात्रपरम्, तथा सति गवयव्यक्त्यन्तरेषु गवयपदवाच्यत्वग्रहासम्भवप्रसङ्गात् । अतः पुरोदृष्टं यद्गवयत्वं तदवच्छिन्नसामान्यपरमिति ध्येयम् ।

इत्युपमानपरिच्छेदः ।

आप्तवाक्यं शब्दः। आप्तस्तु यथार्थवक्ता। वाक्यं तु पदसमूहः। शक्तं पदम्। अस्मात् पदादयमर्थो बोद्धव्य इतीश्वरसङ्केतः शक्तिः।

प्रत्यक्षानुमानोपमानशब्देत्यत्र शब्दपदेन न ध्वन्यात्मकशब्दः, न केवलवर्णात्मकः, न केवलपदरूपोऽपि शब्दो ग्राह्यः तेषां शाब्दबोधाजनकत्वात्। नाप्याप्तानाप्तसाधारणं वाक्यमात्रम्, अनाप्तवाक्येऽपि शाब्दप्रमाजनकत्वाभावात्, प्रमाकरणस्यैव विभजनादित्यभिप्रेत्याहाप्तवाक्यमिति। आप्तस्य वाक्यम्। षष्ठ्यर्थ उच्चरितत्वरूपः सम्बन्धः। नायमाप्तशब्दः सामान्यतः सखिमात्रवचनः, नापि यथार्थद्रष्टृमात्रवचनः, तदुक्तवाक्यस्यापि विप्रलम्भनदशायामविश्वसनीयत्वादित्याशयेनाह आप्तस्त्विति। यथार्थेति। यथाभूतोऽर्थो यथार्थोऽबाधितोऽर्थो मिथःसम्बन्ध्यर्थः, तस्य वक्ता। षष्ठ्यर्थो विषयित्वं ज्ञानान्वयि। वक्ता ज्ञानानुकूलशब्दप्रयोगाश्रयः। वाक्यं नाम नावश्यं तिङन्तसहितसुबन्तमेव, किं तर्हि सुबन्तसमुदायमात्रमपि। नीलो घट इत्येतावतोऽपि वाक्यत्वादित्यभिप्रेत्याह वाक्यन्त्विति। यद्यप्यनाकांक्षितासन्निहितानन्वितार्थकपदसमुदायो वाक्यं न भवति। अतः पदसमूहत्वमात्रं न लक्षणम्। अथाप्याप्तसम्बन्धोक्त्यैव तादृशपदसमूहवारणात्प्रकृते वाक्यपदस्यैतावानर्थः पर्याप्त इत्याशयः। अत्र पदशब्देन न 'सुप्तिङन्तं पद'मिति परिभाषितस्य ग्रहणम्। किं तु पद्यते गम्यतेऽनेनार्थ इति पदमित्याशयेनाह शक्तमिति। का पुनरियं शक्तिः अत्राह अस्मादिति। पदादिति पञ्चम्यर्थो जन्यत्वं बोधेऽन्वेति। अयमर्थ इदम्पदजन्यबोधविषय इत्यर्थः। इति शब्दार्थो विषयित्वम्। अर्थपदार्थस्य विषयितायामन्वयः। तस्याः सङ्केते इच्छायामन्वयः। इदम्पदजन्यबोधविषयत्वविशिष्टेदमर्थनिरूपितविषयितावदीश्वरीयेच्छा शक्तिपदवाच्येति। घटपदाद्घटत्वरूपजातिविशिष्टोऽर्थो बोद्धव्यः पटपदात् पटत्वरूपजात्यवच्छि-

आकांक्षा योग्यता सन्निधिश्च वाक्यार्थज्ञानहेतुः ।

त्वं बोद्धव्यमित्येवं तत्तत्पदबोद्धव्यत्वेन तत्तदर्थविषयिणीच्छैव तत्तत्पदस्य तत्तदर्थे शक्तिरित्यर्थः । घटपदस्य घटे शक्तिरित्यत्र शक्तिपदं बोद्धव्यत्वप्रकारकेच्छार्थकम् । घटपदस्येति षष्ठ्या जन्यत्वरूपसम्बन्धोऽर्थः । तस्य बोधेऽन्वयः । घट इत्यत्र सप्तम्यर्थो विशेष्यत्वमिच्छान्वयि । तथा चाऽऽसृष्टेरुपयुज्यमानेष्वर्थेषु प्रयुज्यमानाश्शब्दा नार्वाचीनपुरुषसङ्केतवशोत्पन्ना भवितुमर्हन्तीतीश्वरसङ्केत एव तस्य तस्य शब्दस्य तत्तदर्थबोधकत्वे निमित्तम् । अर्वाचीनेच्छाग्रहण इच्छाप्रकारस्य नियन्तुमसम्भवेन यस्मात्कस्मादपि पदात्कमप्यर्थं लोको बोधयितुमिच्छेत् । योगिनो महर्षयोऽपि मिथः समबलाः स्वाच्छन्द्येन शब्दान् प्रयुञ्जानाः प्रबन्धान् प्रणीतवन्तः स्युः, येष्वस्माकमैदमर्थ्यमशक्यनिर्धारणम् । किञ्च वेदशब्देभ्य एव विशिष्टस्याप्यर्थस्य सृष्टतया वेदस्य चेश्वरकृततया तत्र तत्रार्थे प्रयुज्यमानास्त एव वैदिकशब्दा ईश्वरसङ्केतिता इतोश्वरसङ्केत एव शक्तिर्वक्तुमुचितेत्यभिप्रेत्येश्वरेत्युक्तम् । अत्र यद्यप्याप्तवाक्यमेव प्रमाणम् । अथाप्याप्तसम्बन्धित्वेन ज्ञायमानतया न शाब्दबोधकरणत्वं शब्दस्य । अपि तु केवलं तत्तच्छब्दरूपेणैव । ननु कथं तर्हि 'गौरश्वः' 'अग्निना सिञ्चे'दित्यादिश्रवणे प्रायशो बोधो न जायत इति चेन्न, शब्दस्य केवलं कारणत्वाभावात् आकाङ्क्षादीनामपि सहकारित्वादित्याशयान आकाङ्क्षादिसहकारि दर्शयति आकाङ्क्षेति । हेतुः प्रयोजको जनकज्ञानविषय इत्यर्थः । आकाङ्क्षाज्ञानं योग्यताज्ञानं सन्निधिज्ञानं च शाब्दबोधे सहकारिकारणमित्युक्तं भवति । शाब्दप्रमास्थले वस्तुत आकांक्षादेः सद्भावेऽपि तद्भ्रमस्थले तदभावात् तत्राकांक्षादिज्ञानस्यैव भ्रमात्मकस्य कारणत्वमावश्यकमित्यविशेषात् सर्वत्र तद्ज्ञानमेव कारणमिति । अत्राकांक्षा नाम नेच्छा, पदस्य पदान्तराकांक्षेत्यत्रेच्छाया दुर्वचत्वात्, अ-

पदस्य पदान्तरव्यतिरेकप्रयुक्तान्वयाननुभावकत्वं आकांक्षा । अर्थाबाधो योग्यता । पदानामविलम्बेनोच्चारणं सन्निधिः ।

चेतनपद इच्छाया अभावात् । अतोऽन्यैवेयमित्याह **पदस्येति** । षष्ठ्यर्थ आधेयत्वमननुभावकत्वान्वयि । अन्यत् पदं **पदान्तरम्** । प्रकृतपदभिन्नपदमित्यर्थः । व्यतिरेकोऽभावः । **प्रयुक्तं** प्रयोज्यम् , अधीनमिति । प्रयुक्तपदमिह समासे प्रकृतपदभिन्नपदप्रतियोगिकाभावप्रयोज्यरूपार्थलाक्षणिकम् । पूर्वं तात्पर्यग्राहकम् । अस्याननुभावकत्वेऽन्वयः । अन्वयस्यानुभावकत्वं पदार्थस्य पदार्थान्तरेणान्वयविषयको योऽनुभवः शाब्दबोध इति यावत् तज्जनकत्वम् ; तदभावोऽन्वयाननुभावकत्वम् । पदं ह्येकं पदान्तराभावे शाब्दबोधं न जनयति । यथा घटमानयेत्यत्राम्पदाभावे घटपदं बोधं न जनयति । **आकांक्षा** आकांक्षापदवाच्यम् । अत्रेदमवधेयम्---घटः कर्मत्वमानयनं कृतिरित्युक्तौ बोधो न भवति । घटमानयेत्युक्तौ भवति । तत् कस्मात् ? पूर्वत्राकांक्षाया अभावात् परत्र भावादिति वक्तव्यम् । तन्न शक्यते । पूर्वत्राम्पदाश्रवणादम्पदाभावाधीनमननुभावकत्वं घटपदस्य वर्तत इति तत्रैवाकांक्षा वर्तते । परत्राम्पदसद्भावाद्बोधस्य जायमानतयाऽननुभावकत्वरूपाकांक्षा नास्तीति । तस्मादुक्तस्याकांक्षात्वासम्भवादेवं तात्पर्यं वर्णनीयम् । यत्पदस्य यत्पदाभावेऽन्वयाननुभावकत्वं भवेत् तत्पदस्य तत्पदमिलितत्वमाकांक्षा । यथा घटपदस्याम्पदाविशिष्टत्वम् । इदं च घटमानयेत्यत्रास्ति, घटः कर्मत्वमित्यत्र नास्तीति न दोष इति । **अर्थेति** । अर्थस्याबाधोऽसम्बन्धाभावः अर्थसम्बन्ध इति यावत् । पदार्थस्य पदार्थान्तरसम्बन्धो योग्यता । अयमर्थनिष्ठो धर्मः । प्रथमतृतीयौ तु शब्दनिष्ठाविति विवेकः । **पदानामिति** । इदमुच्चारणान्वयि । **अविलम्बेन** अव्यवहितत्वविशिष्टमित्यर्थः । पदस्य पदान्तराव्यवधानं सन्नि-

आकांक्षादिरहितं वाक्यं न प्रमाणम्। यथा, गौरश्वः पुरुषो हस्तीति वाक्यं न प्रमाणम्, आकांक्षाविरहात्। अग्निना सिञ्चतीति वाक्यं न प्रमाणम्, योग्यताविरहात्। प्रहरे प्रहरेऽसहोच्चरितानि

धिरिति यावत्। अव्यवधानं च पूर्वं प्रयोगेण वा पश्चात्प्रयोगेण वोभयथाऽपि ग्राह्यम्। आकांक्षादीनां शाब्दबोधहेतुत्वं तत्तदभावे शाब्दबोधाभावप्रदर्शनेन व्यतिरेकमुखेन साधयति **आकांक्षेति**। **यथेति** उदाह्रियत इत्यर्थः। **अकांक्षाविरहादिति**। पञ्चम्यर्थः प्रयोज्यत्वं प्रमाणप्रतियोगिकभेदरूपे नञर्थेऽन्वेति। ननु गौरश्व इत्यत्र गवादिपदार्थस्य किमनुच्चारिततिष्ठत्यादिपदार्थान्वयेऽप्रमाणत्वमुच्यते उताश्वादिपदार्थान्वये। नाद्यः, तिष्ठत्यादिपदसन्निध्यभावेन सन्निधिरूपकारणाभावादेवाप्रमाणत्वनिर्वाहात्। नान्त्यः, गवाभेदस्याश्वे बाधितत्वेन योग्यतारूपकारणाभावादेव निर्वाहात्। अत आकांक्षा किमर्थमतिरिक्तं कारणमिति चेन्न; नोदाहरणमादर्तव्यमिति न्यायेन 'घटः कर्मत्वमानयनं कृति'रित्युदाहरणान्तरस्यैवाभिप्रेतत्वेनादोषात्। अत्र हि, घटमानयेति वाक्ये यः प्रातिपदिकार्थो घटः यो द्वितीयार्थः कर्मत्वं यो धात्वर्थ आनयनं य आख्यातार्थः कृतिस्ते सर्वे उपस्थाप्यन्ते। सन्निधिर्योग्यता च स्तः। तथाऽपि न कथं बोध इति चेदाकांक्षा नास्तीत्येवोत्तरम्। घटपदस्यान्वयाननुभावकत्वं न कर्मत्वपदव्यतिरेकात्, किं तु अम्पदव्यतिरेकादिति। सन्निधौ पदनियमः पौर्वापर्यनियमो वा नास्ति। यथा गिरिरग्निमान्, पर्वतोऽग्निमान्, अग्निमान् गिरिरिति। आकांक्षायां तु नियमोऽस्ति। यथा घटपदोत्तरमम्पदमेव प्रयोक्तव्यम्, न कर्मत्वपदम्। तथा तत्पदमुत्तरत्रैव प्रयोक्तव्यम्, न पूर्वत्रेति। **असहोच्चरितानि** असह परस्परानधिकरणकाले। अयमेव कालो व्यक्तं दर्शितः **प्रहरे प्रहर** इति। यामे याम इत्यर्थः। अत्र व्यापकत्वगमकवीप्सा नेष्टा।

गामानयेत्यादिपदानि न प्रमाणम्, सान्निध्याभावात् । वाक्यं द्विविधम्, वैदिकं लौकिकं चेति । वैदिकमीश्वरोक्तत्वात् सर्वमपि प्रमाणम् । लौकिकं तु आप्तवाक्यं प्रमाणम् । अन्यदप्रमाणम् । वाक्यार्थज्ञानं शाब्दज्ञानम् । तत्करणं शब्दः ।

इति शब्दपरिच्छेदः ।

किं त्वेकैकप्रहरवृत्तित्वमेकैकस्य पदस्य विवक्षितम् । तथा चैकप्रहरवृत्तितद्भिन्नप्रहरवृत्तिविभिन्नकालिकोच्चारणविषयीभूतानीत्यर्थः । इत्यादीत्यादिपदेन सर्वत्सामिति पदग्रहणम् । नन्वाप्तवाक्यस्यैव प्रमाणत्वे वेदस्य कथं प्रामाण्यम् । न खल्वसावाप्तोक्तः, अपौरुषेयत्वादिति शङ्कापरिजिहीर्षया, वेदस्य कार्त्स्न्येन प्रामाण्यनिरूरूपयिषया, शाब्दबोधजनकत्वं वेदस्यैवेति मतान्तरमनिष्टमित्यवजिगमयिषया च वाक्यं विभजते वाक्यमिति । वैदिकमिति वेदघटकमित्यर्थः । लौकिकं लोकस्वतन्त्रोच्चारितम् । ईश्वरोक्तत्वादिति । तस्य सर्वज्ञस्य परमकारुणिकस्य पुरुषोत्तमस्याप्तत्वादिति भावः । नन्वेकैकजन्यबोधोऽपि शब्दजन्यत्वाच्छाब्दबोध एव । तत् कथं वाक्यमेव प्रमाणमिति शङ्कां परिहरति वाक्येति । अयं भावः—प्रथमतस्तावदस्य पदस्यायमर्थ इति व्यवहारादिना शक्त्यवधारणमावश्यकम् । एवं पदपदार्थयोर्वाच्यवाचकभावसम्बन्धज्ञाने सति कदाचित्पदज्ञाने जाते एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकमिति न्यायात् पदार्थस्मरणम् । इदं च पदार्थस्मरणं स्मृतिरूपत्वान्नानुभवः, नापि तदन्तर्गतः शाब्दबोधः । यत्पुनरेवमनेकपदार्थस्मरणानन्तरं तेषां परस्परसम्बन्धावगाहि ज्ञानम् , स एव शाब्दबोधः । तत्र च पदसमुदाय एव करणमिति । शब्द इति इदमवसवाक्यं शाब्दबोधेत्यत्र शब्दपदग्राह्यमिति भावः । एवं प्रत्यक्षानुमानोपमानशब्दपदार्था निरूपिताः । एवं च 'तत्करणमपि चतुर्विध'मिति वाक्यार्थज्ञानं निष्पादितम् ।

इति शब्दपरिच्छेदः ।

एवं यथार्थानुभवो निरूपितः । अयथार्थानुभवः त्रिविधः, संशयविपर्ययतर्कभेदात् । एकस्मिन् धर्मिणि विरुद्धनानाधर्मप्रकारकज्ञानं संशयः । यथा, स्थाणुर्वा पुरुषो वेति ।

एवमादौ विभक्तानां द्रव्यादिविशेषाणां क्रमेण निरूपणमारभ्य द्रव्यनिरूपणं समाप्य गुणनिरूपणावसरे बुद्धिं विभज्य तत्र यथार्थानुभवनिरूपणावसरे तच्चातुर्विध्यस्थापनाय तत्करणचातुर्विध्यप्रपञ्चं विधायावसरप्राप्तं परिशिष्टबुद्ध्यादिनिरूपणमारप्स्यमानो यथार्थानुभवनिरूपणं निगमयति एवमिति । एवम् उक्तप्रकारेण । निरूपितः निरूपणं ज्ञानानुकूलव्यापारः । यथार्थानुभव उक्तप्रकारप्रकारकज्ञानानुकूलव्यापारजन्यफलाश्रय इति बोधः । विपर्ययेति । तर्कान्यविपर्ययेत्यर्थः ।

संशयं लक्षयति एकस्मिन्निति । धर्मिणीति विशेष्यत्वं सप्तम्यर्थो ज्ञानान्वयि । विरुद्धा नाना धर्मा विरुद्धौ नानाधर्मौ वा तद्वैशिष्ट्यं तत्सम्बन्धस्तस्य ज्ञानम् । षष्ठ्यर्थः संसर्गित्वम् । एकधर्मिनिरूपितविशेष्यताश्रय-विरोधविशिष्टानेकधर्मप्रतियोगिकसंसर्गनिरूपितसंसर्गिताश्रयज्ञान संशयपदवाच्यमिति बोधः । एकधर्मिविशेष्यकविरोधविशिष्टानेकधर्मप्रकारकज्ञानत्वं संशयत्वम् । स्थाणुर्वेत्यादि । अयमिति पूरणीयम् । इतीति । ज्ञानमिति शेषः । इतिशब्दार्थो विषयित्वरूपो धर्मः । वाशब्दः समभिव्याहृतपदार्थविरोधार्थकः । इदमर्थस्य, स्थाणोः पुरुषस्य च विषयितारूपेतिशब्दार्थेऽन्वयः । तथा चाभेदसम्बन्धेन पुरुषविरोधाश्रयस्थाणुनिरूपितविषयित्वं यत्, यच्चाभेदसम्बन्धेन स्थाणुविरोधाश्रयपुरुषनिरूपितविषयित्वम्, यच्चेदमर्थनिरूपितविषयित्वं तदाश्रयसंशय इत्यर्थः । अथवेतिशब्द आनुपूर्व्यर्थकः, तस्य संशये स्वावच्छिन्नशब्दज्ञानप्रयोज्यत्वसम्बन्धेनान्वयः । इदमर्थविशेष्यक-स्थाणुत्वविरुद्धपुरुषत्व,पुरुषत्वविरुद्धस्थाणु-

मिथ्याज्ञानं विपर्ययः । यथा, शुक्तौ इदं रजतं इति ।

त्वप्रकारकसंशय इति यावत् । अयं भावद्वयकोटिकसंशयः । एवं भावाभावकोटिकसंशयोऽपि भवति, यथा स्थाणुर्न वेति । पर्वतो वह्निमान् ह्रदश्च वह्न्यभाववानिति ज्ञानेऽतिव्याप्तिरित्येकधर्मिविशेष्यकत्वनिवेशः । रामः श्यामोऽभिरामश्चेति निश्चयेऽतिप्रसङ्ग इति विरोधिविशिष्टेति । पर्वतो वह्निमानिति निश्चयवारणाय नानेति । घटो नीलो वा रक्तो वा भवत्विती-च्छावारणाय ज्ञानेति । विपर्ययं लक्षयति मिथ्येति । विपर्ययः तर्कान्यो विपर्ययशब्दवाच्यः मिथ्याज्ञानं तर्कान्यमिथ्याज्ञानमित्यर्थः । मिथ्यात्वं वस्तुनि वचने ज्ञाने च भवति । तत्र वस्तुनि मिथ्यात्वं स्वाभावाधिकरणे भासमानत्वम् ; मिथ्या वचनमित्यादौ वचने मिथ्यात्वं तदभाववति तत्प्रकारकज्ञानानुकूलशब्दत्वम् ; ज्ञाने मिथ्यात्वं च तदभाववति तत्प्रकारकत्वम् । अतस्तदभाववति तत्प्रकारकत्वं मिथ्यापदार्थः । इदं तर्केप्यस्तीति तर्कान्यत्वनिवेशः । यद्यपि तर्कस्य विपर्ययत्वमिष्टमेव । अथाप्यत्र पार्थक्येन तद्विभजनात् प्रकृतविपर्ययपदेनैवं विवक्षितमिति । तस्य पृथग्विभज्य दर्शनं कुत इति चेत् विपरीतज्ञानत्वेऽपि तस्य प्रमाणेनार्थनिर्णये सम्पादनीये क्वचिदुपकारकत्वमस्तीति विशेषाध्यवसायेन तत्राऽऽदरातिशयादिति । यद्यपीदं लक्षणं संशयेऽप्यस्ति, स्थाणौ अयं स्थाणुर्वा पुरुषो वेति संशयस्य पुरुषत्वाभाववति पुरुषत्वप्रकारकत्वात् तर्कान्यत्वाच्च, अथापि संशयान्यत्वस्यापि निवेशान्न दोषः । तथा च तदभाववति तद्विरुद्धधर्माप्रकारकतत्प्रकारक-तर्कान्य-ज्ञानत्वं प्रकृते विपर्ययत्वम् । एवमेव पूर्वं यथार्थानुभवलक्षणेऽपि संशयवारणाय तद्विरुद्धधर्माप्रकारकत्वं विशेषणं देयमिति ध्येयम् । उदाहरति यथेति । इतोत्यनन्तरं विपर्यय इति शेषः । तत्र शुक्ताविति सप्तम्यर्थविशेष्यिताया अन्वयः । शुक्तिविशेष्यकमपि ज्ञानं न शुक्ति-

व्याप्यारोपेण व्यापकारोपः तर्कः। यथा, यदि वह्निः न स्यात् तर्हि धूमोऽपि न स्यादिति ।

त्वेन शुक्तिं गृह्णाति, तथा सति रजताभेदग्रहणासम्भवात् । अपि त्विदंत्वेन पुरोवर्तित्वेन तां गृह्णातीतीदमित्यनेन दर्शितम् । इदमित्यनेन वास्तवरजतं न ग्राह्यम् । तथा सति विपर्ययत्वाभावप्रसंगादिति ज्ञापनाय शुक्ताविन्युक्तम् । तर्कं लक्षयति व्याप्येति । व्याप्यस्यारोपस्तेन । आरोप आहार्यज्ञानम् । आहार्यज्ञानं नाम बाधज्ञाने सत्येवेच्छयोत्पादितं विपरीतज्ञानम् । यथा मुखे चन्द्रत्वारोपोऽचन्द्रत्वज्ञानकालिकेच्छाजनितः । आरोपेणेति तृतीयार्थो जन्यत्वं व्यापकारोपेऽन्वेति । वस्तुतो व्याप्यं यत् तत्प्रकारकाहार्यज्ञानजन्यत्वे सति वस्तुतो यद्व्यापकं तद्विषयकाहार्यज्ञानत्वं तर्कत्वम् । यदि वह्निर्न स्यात्तर्हि धूमोऽपि न स्यादिति वह्न्यभावारोपजन्ये धूमाभावारोपे लक्षणमस्ति । वह्न्यभावस्य व्याप्यत्वाद्धूमाभावस्य व्यापकत्वात्, यो वह्न्यभाववान् स धूमाभाववानिति व्याप्तेः । व्यापकविषयकाहार्यज्ञानत्वमात्रस्य लक्षणत्वे मुखे चन्द्रत्वारोपाद्यात्मके सर्वत्राहार्यज्ञानेऽतिव्याप्तिः । चन्द्रत्वादेरपि यत्किञ्चिद्व्यापकत्वात्तदारोपस्यापि व्यापकारोपत्वात् । अतो व्याप्यारोपजन्यत्वनिवेशः । चन्द्रत्वारोपस्तु केवलेच्छाजनितः, न पुनरारोपान्तरजन्य इति । व्याप्यविषयकाहार्यज्ञानजन्येत्यत्राहार्यत्वानिवेश्य व्याप्यविषयकज्ञानजन्येत्येतावदुक्तौ, स्थाणौ कदाचिन्नायं पुरुष इति बाधज्ञाने सत्येव यदा तन्निष्ठशाखादौ करादिभ्रमो भवति, करादिश्च पुरुषत्वव्याप्य इति, तादृशव्याप्यभ्रमादयं पुरुष इत्याहार्यज्ञानं जायते, तत्रातिव्याप्तिः । तन्निवेशे च करादिभ्रमस्याहार्यत्वाभावान्न दोषः । व्यापकारोप इत्यस्य व्यापकविषयकाहार्यज्ञानमित्यर्थकतया तत्राहार्यत्वानिवेशे शंखे पीतत्वव्याप्याभावरूपबाधज्ञाने सत्येव पीतत्वव्याप्यवान् शंख इत्याहार्यज्ञानम्, तज्जन्य-

स्मृतिरपि द्विविधा, यथार्थाऽयथार्था चेति । प्रमाजन्या यथा-

शशंखः पीत इति भ्रमस्तत्रातिव्याप्तिः । इदं च नाहार्यज्ञानम्, तदा पीतत्वाभाववान् शंख इति बाधकज्ञानाभावात् । अतस्तन्निवेशः । उदाहरति यथेति । **यदि वह्निर्न स्यादिति** । अत्रेति शेषः । निरूपितत्वं त्वलर्थो धात्वर्थे सत्तायामन्वेति । तस्य नञर्थाभावे स्वप्रतियोगिकत्वसंबन्धेनान्वयः । वह्नेराधेयतासंम्बन्धेन नञर्थेऽन्वयः । यदिशब्दार्थः प्रयोजकत्वम् । तत्राभावस्याधेयतासम्बन्धेनान्वयः । स्यादिति लिङ्प्रयोगस्तु 'हेतुहेतुमतोर्लिङ्' इत्यनुशासनसिद्धो यदिपदस्य प्रयोजकत्वरूपार्थतात्पर्यग्राहकः । प्रयोजकत्वस्य धूमोऽपि न स्यादित्यत्र नञर्थाभावे निरूपकत्वसम्बन्धेनान्वयः । यदिशब्दार्थः प्रयोज्यत्वमेव वा । तर्हीत्यस्यापि पूर्वोक्तार्थप्रयोज्यत्वमेवार्थः । तच्च स्पष्टत्वाय पुनरुक्तम् । अत एव तर्हीतिपदं विनापि वाक्यप्रयोगः । यदिशब्दस्य तात्पर्यग्राहकत्वमङ्गीकृत्य प्रथमस्यात्पदस्याख्यातस्य प्रयोज्यत्वमर्थस्स्वीक्रियतामिति चेत् काममस्तु । परं तु क्रियापदं स्यात्प्रभृति विनापीदृशः प्रयोगो भवतीति तथोक्तम् । तथा चेदमर्थपर्वतादिनिरूपितसत्ताप्रतियोगिकवह्न्यनुयोगिकाभावप्रयोज्य इदमर्थनिरूपितसत्ताप्रतियोगिकधूमानुयोगिकाभाव इति बोधः । इतिशब्दार्थो विषयित्वम् । अभावस्य तत्रान्वयः । आरोप इत्यध्याहारः । तत्रैतदन्वयः । अत्र 'यदि वह्निर्न स्या' दित्यन्तं व्याप्यारोपजन्यत्वरूपदलोपपादनार्थम् । प्रकृततर्कस्य लक्ष्यभूतस्याकारस्तु धूमोऽपि न स्यादित्येतावानेव । तथा च 'यथा यदि वह्निर्न स्यादित्यारोपजन्यो धूमोऽपि न स्यादित्यारोप' इति लेखनमेव चिकीर्षितमिति ध्येयम् । पूर्वमनुभवलक्षणस्य स्मृतिघटितत्वात् स्मृतिरनुभवश्चेति विभज्य स्मृतिलक्षणं प्रथमत उक्तम् । अथ स्मृतिनिष्ठयथार्थत्वायथार्थत्वयोरनुभवनिष्ठयाथार्थ्यायाथार्थ्यनिबन्धनत्वाद्यथार्थायथार्थानुभवौ निरूप्य स्मृतावपि 'सं विभागं दर्शयति प्रमेत्यादिना । यथार्थस्मृत्यादिलक्षणं तु

र्था । अप्रमाजन्याऽयथार्था ॥

सर्वेषामनुकूलतया वेदनीयं सुखम् ।

सर्वेषां प्रतिकूलतया वेदनीयं दुःखम् ।

इच्छा कामः, क्रोधो द्वेषः, कृतिः प्रयत्नः ।

विहितकर्मजन्यो धर्मः ।

तद्वति तत्प्रकारकस्मृतित्वादिकमेवेति मन्तव्यम् ।

सर्वेषामिति षष्ठ्यर्थः समवेतत्वं वेदनेऽन्वेति । अनुकूलत्वमिच्छाविषयत्वम् । तथा चेच्छाविषयत्वप्रकारकसर्वसमवेतवेदनविषयस्सुखम् । पशुपुत्रादिवारणाय सर्वेषामिति । सुखसाधनं पशुपुत्रादि चानुकूलतया वेदनीयं न सर्वेषाम् । केषांचित्तत्र द्वेषदर्शनात् । सर्वसमवेतवेदनविषयत्वं दुःखादावप्यस्तीति अनुकूलतयेति । वेदनीयमित्युक्तिस्तु सर्वेषामनुकूलत्वमनुभवसिद्धमिति प्रदर्शनार्थम् । न तु तदर्थस्य लक्षणे प्रवेशः । तथा च सर्वसमवेतेच्छाविषयत्वं लक्षणम् । अथ वेदं स्वरूपकथनम् । सुखत्वजातिरेव लक्षणमिति । प्रतिकूलतयेति । सर्वेषामित्यनुषङ्गः । अहिकण्टकादौ केषांचित्प्रतिकूलतया वेदनीयत्वमस्ति । सर्वसमवेतद्वेषविषयत्वं लक्षणमित्यादि पूर्ववत् । इच्छादीनां तत्तज्जातिमत्त्वमेवानुभवसिद्धं लक्षणमिति सूचयितुं पर्यायपदेन तानुत्कीर्तयति इच्छेत्यादिना । धर्मः पुण्यम् ; अधर्मः पापम् ; तयोर्लक्षणमाह विहितेत्यादिना । यागादयः फलसाधनत्वेन शास्त्रे चोदिताः । फलस्य बहुकालानन्तरभावित्वाद्यागादीनां चानुष्ठानसमय एव विनाशित्वान्न तेषां साक्षात्फलजनकत्वसंभव इति विधिबलान्मध्ये व्यापारः कल्प्यत इति स एव धर्मः । एवं निषेधस्थले निषिध्यमानस्य कलञ्जभक्षणादेः कालान्तरभाविदुःखजनकत्वस्य साक्षादसम्भवान्निषेधबलान्मध्ये व्यापारः कश्चिदनुमीयत इति स एवाधर्मः । न च

निषिद्धकर्मजन्योऽधर्मः ।

बुद्ध्यादयोऽष्टात्ममात्रवृत्तिगुणाः । बुद्धीच्छाप्रयत्ना नित्या अनित्याश्च । नित्या ईश्वरस्य, अनित्या जीवस्य । संस्कारस्त्रिविधः,

---

वेदविहितकर्मजन्यत्वमेव धर्मलक्षणं वक्तव्यम्, अन्यथा बुद्धादिविहितकर्मजन्येऽतिव्याप्तिरिति वाच्यम् ; बुद्धादिभिः कर्मविधानेऽपि तस्य निष्फलत्वेन तज्जन्यस्यैवाप्रसिद्ध्याऽतिव्याप्त्यभावेन वेदेत्यस्यानावश्यकत्वात् । अत्र कर्मेत्यविवक्षितम्, विधिविषयजन्यत्वस्यैव पर्याप्तत्वात् । कर्मभिन्नेन द्रव्यादिना 'दध्नेन्द्रियकामस्य जुहुया'दित्यादौ धर्मोत्पादनस्य स्वीकृतत्वेन तत्राव्याप्तिप्रसङ्गाच्च । ननु विहितजन्यत्वं तद्ध्वंसेऽप्यस्ति । न च विधिविषयजन्यत्वे सति विध्युद्देश्यजनकत्वं धर्मत्वम् ; ध्वंसस्य च फलजनकत्वाभावान्नातिप्रसङ्ग इति वाच्यम्, व्रीहीनवहन्तीत्यादिविहितावहननादिजन्ये यागोपयोगिपुरोडाशाद्यर्थतण्डुलनिष्पत्त्यादिफलजनके वैतुष्यादावतिव्याप्तिरिति चेन्न । यत्साक्षादवहननादितस्सम्भवति, तस्यैव विध्युद्देश्यत्वात्तण्डुलनिष्पत्तेरनुद्देश्यत्वात् । वस्तुतो विध्यनुमितविहितनिरूपितजन्यतावत्वं धर्मलक्षणमिति न कश्चिद्दोषः । वैतुष्यादेरवहननादिजन्यत्वस्य लोकसिद्धत्वेन विधिबोधितत्वाभावात् । शब्दान्तगुणानां तत्तन्निरूपणावसर एव तत्तदाश्रयप्रदर्शनं कृतम् । बुद्ध्यादीनामधर्मान्तानां त्वेकवृत्तित्वेन वचनलाघवाय पृथक्पृथगनुक्त्वा तावन्निरूपणानन्तरं तं प्रदर्शयति बुद्ध्यादय इति । सुखदुःखद्वेषधर्माधर्माणामीश्वरेऽनङ्गीकर्तव्यत्वात्तेषां जीवमात्रनिष्ठानां कर्मायत्तानामनित्यत्वमेवेत्यभिसन्धाय ज्ञानेच्छाप्रयत्नानामुभयरूपत्वं दर्शयति बुद्धीति । ईश्वरस्येति । तस्य करणकलेवररहितत्वात्तदीयज्ञानादेः शरीरादिनिरपेक्षत्वादिति भावः । संस्कारत्वजातिमत्त्वं संस्कारलक्षणम् । विभजते संस्कार इति । वेगः इष्वादिषु जायमानया प्रथमक्रि-

वेगो भावना स्थितस्थापकश्चेति । वेगः पृथिव्यादिचतुष्टयमनोवृत्तिः । अनुभवजन्या स्मृतिहेतुः भावना । आत्ममात्रवृत्तिः ।

ययोत्पाद्यते, क्रियान्तरं च जनयति दूरपातार्थं यस्स वेगः । पृथिव्यादिचतुष्टयं च मनश्च चतुष्टयमनसी तत्र वृत्तिर्यस्येति । भावनां लक्षयति अनुभवेति । अनुभूतमेव स्मर्यत इत्यनुभवसिद्धम् । तदनुभवस्य स्मृतिकारणत्वमन्वयव्यतिरेकसिद्धं साक्षान्न भवति ; अनुभवे नष्टे बहुकालव्यवधानेन स्मृतेर्जायमानत्वात् । अतोऽत्र यागाद्धर्म इव मध्ये व्यापारः कश्चन कल्प्यते । सा भावना । अनुभवजन्यत्वमात्रोक्तावनुभवध्वंसेऽतिव्याप्तिः, स्मृतिहेतुत्वमात्रोक्तावात्मादावतिव्याप्तिरित्युभयनिवेशः । न चानुभवत्वावच्छिन्नजनकतानिरूपितजन्यतानिवेशान्नानुभवध्वंसेऽतिव्याप्तिः, ध्वंसं प्रति प्रतियोगिनस्तत्तद्व्यक्तित्वेन कारणत्वात् , अनुभवध्वंसं प्रत्यनुभवत्वेन कारणत्वमिति कार्यकारणभावानङ्गीकारादिति वाच्यम् । तथाऽपि स्मृतावनुभवजन्यत्वसत्त्वेनातिव्याप्तिवारणाय द्वितीयदलावश्यकत्वात् । ननु पूर्वं स्मृतिलक्षणे संस्कारमात्रजन्यत्वं निवेशितम् । तदत्र संस्कारलक्षणे स्मृतिहेतुत्वं निवेश्यत इत्यन्योन्याश्रय इति चेन्न ; तत्र संस्कारपदेन संस्कारत्वजातिमत एवोक्तत्वात्, भावनेत्यनुक्तत्वात्, अत्र संस्कारविशेषभावनालक्षण एव स्मृतिघटनाच्चादोषात् । यद्वाऽनुभवत्वावच्छिन्नजनकतानिरूपितजन्यतावत्वमित्यत्र जन्यत्वमव्यवहितोत्तरक्षणावच्छिन्नं ग्राह्यम् । एतत्सूचनाय स्मृतिहेतुरित्युक्तम् । स्मृतेश्च संस्कारव्यवधानेनैव जायमानतया नातिव्याप्तिः । न चैवमनुभवत्वावच्छिन्नेति निवेशो व्यर्थः अनुभवनिष्ठेति निवेश एवालम् । अनुभवध्वंसेऽतिव्याप्त्यभावात् । अनुभवस्य द्विक्षणावस्थायितया तृतीयक्षण एव ध्वंसस्योत्पद्यमानतया तत्राव्यवहितोत्तरक्षणावच्छिन्नजन्यत्वाभावादिति वाच्यम् ; परामर्शात्मकानुभवजन्यायामनुमितावतिव्याप्तिवारणायानु-

अन्यथा कृतस्य पुनस्तादवस्थ्यापादकः स्थितस्थापकः ।

भवत्वावच्छिन्नत्वस्यावश्यकत्वात् । अस्य च लक्षणस्य प्राचीनमते सङ्गतत्वेऽपि नव्यमते न सामञ्जस्यम्; तन्मते स्मृतितोऽपि स्मृत्युत्पत्तेस्संस्कारोत्पत्तेश्च स्वीकृतत्वेन संस्कारजनकतायास्स्मृतावपि वर्तमानतयाऽनुभवत्वावच्छिन्नत्वासम्भवात् । अतः स्मृत्यनुभवसाधारण्येन ज्ञानत्वेनैव कारणत्वम् । न च तर्हि ज्ञानत्वावच्छिन्नजनकतानिरूपितजन्यतावत्त्वमित्येव लक्षणमुच्यतामिति वाच्यम्; ज्ञानस्येच्छां प्रत्यपि कारणतया तत्रातिव्याप्तेः । अतो नव्यमतानुसारे **स्मृतिहेतुरि**ति लक्षणपरम् । स्मृतिहेतुत्वं कालादेरपीति स्मृतित्वावच्छिन्नजन्यतानिरूपितजनकतावत्त्वमिति वक्तव्यम् । संस्कारद्वारा ज्ञानस्यापि स्मृतिं प्रतिकारणत्वादतिव्याप्तिरित्यव्यवहितपूर्वक्षणावच्छिन्ना जनकता विवक्षणीया । ज्ञानस्य संस्कारव्यवधानेन कारणत्वाददोषः । अस्याव्यवहितपूर्वक्षणावच्छिन्नत्वस्य लाभायैवानुभवजन्येत्युक्तम् । अतो मतभेदेन लक्षणभेदमन्तरभिसंधायाऽनुभवजन्या **स्मृतिहेतुरि**ति भङ्ग्या निर्देशः । स्थितस्थापकं लक्षयति **अन्यथे**ति । **स्थितस्य** पूर्वकालसम्बन्धिविलक्षणसंस्थानजातीयस्य **स्थापकः** पुनरुत्पत्तिजनक इति शब्दार्थ एवात्र विवृतः । **अन्यथा** पूर्वसंयोगविलक्षणसंयोगवत्तया **कृतस्य** तादृशसंयोगवत्त्वप्रकारककृतिविषयस्य । आधेयत्वं षष्ठ्यर्थस्तादवस्थ्यान्वयि । साऽवस्था संस्थानं विलक्षणसंयोगो यस्य तत् तदवस्थम् । तस्य भावस्तादवस्थ्यम् । तदापादक उत्पादकः । धात्वर्थ उत्पत्तौ पुनरित्यस्यान्वयः । पुनःशब्दःपूर्वकालिकसत्त्वप्रतियोगिकाभावाधिकरणकालानन्तरकालवृत्तित्वार्थकः । तथा च पूर्वसंयोगविजातीयसंयोगवद्वस्तुनिष्ठपूर्वसंयोगसजातीयसंयोगप्रयोजकः स्थितस्थापक इत्यर्थः । अत्र नायं साक्षात् तादृशसंयोगजनकः; अपि तु वेग इव कटादौ तादृशसंयोगानुकूल-

कटादिपृथिवीमात्रवृत्तिः ।

चलनात्मकं कर्म । ऊर्ध्वदेशसंयोगहेतुरुत्क्षेपणम् । अधोदेशसंयोगहेतुरवक्षेपणम् । शरीरसन्निकृष्टसंयोगहेतुराकुञ्चनम् । शरीरविप्रकृष्टसंयोगहेतुःप्रसारणम् । अन्यत्सर्वं गमनम् ॥

नित्यमेकमनेकानुगतं सामान्म् । द्रव्यगुणकर्मवृत्ति । परं सत्ता । अपरं द्रव्यत्वादि ॥

क्रियाजनकः । सा च क्रिया विद्यमानं संयोगविशेषं विनाश्य पूर्वस्थितजातीयं संयोगमुत्पादयतीति ध्येयम् ।

कटादीति । तालकृता हि कट आकुञ्चित एव रक्षितः कदाचित् प्रसारितोऽपि संस्कारविशेषात् पुनर्वेष्टनमेव लभत इति । आदिना शाखादिपरिग्रहः । शाखादिकं ह्यवनमितं विसृज्यमानं पुनः पूर्वदेशावच्छेदेन संस्कारवशात् संयोगं लभत इति ॥

एवं गुणा निरूपिताः । कर्म निरूपयति चलनेति । चलतीति प्रतीतिसाक्षिकं कर्मत्वं जातिविशेषः । हेतुरिति । कर्मेति शेषः । कन्तुकमुत्क्षिपति , नारिकेलमवक्षिपतीत्यादौ प्रतीयमानमिदं कर्म । प्रसारितस्य शरीरावयवस्य पुनः सन्निकृष्टदेशे संयोग आकुञ्चनेन भवति । स्वाश्रयावयवभिन्नभूयोऽवयवसन्निकृष्टदेशावच्छिन्नस्वाश्रयसंयोगहेतुः क्रिया आकुञ्चनम् । एवं प्रसारणमपि विप्रकृष्टघटितम् । अन्यत् उक्तचतुष्टयभिन्नम् । सर्वं भ्रमणरेचनस्पन्दनादि ॥ सामान्यं लक्षयति नित्यमिति । अनुगतम् समवेतम् । एकमिति न लक्षणघटकम् । नित्यत्वे सत्यनेकसमवेतत्वं लक्षणम् । संयोगवारणाय नित्यत्वम् । आकाशादिवारणाय द्वितीयम् । परमाण्वेकत्वादिवारणायानेकेति । घटाभावादिवारणाय समवायसंबन्धनिवेशः । परमिति जातित्वावच्छिन्नव्यापकजातिरित्यर्थः । अपर-

नित्यद्रव्यवृत्तयो व्यावर्तका विशेषाः ।

नित्यसम्बन्धः समवायः । अयुतसिद्धवृत्तिः । ययोर्मध्ये एक-

मिति । किञ्चिज्जातिव्याप्यजातिरित्यर्थः । आदिना घटत्वादिग्रहणम् । विशेषं लक्षयति नित्येति । व्यावर्तकाः व्यावृत्तिबुद्धिजनका इतरभिन्नत्वानुमितिजनकाः । नित्यद्रव्यवृत्तयो व्यावर्तका इत्येनन नित्यद्रव्येषु व्यावृत्तिबुद्धिजनकाः परमाणुविशेष्यकपरस्परव्यावृत्त्यनुमितिजनका इत्युक्तं भवति । तथा हि—लोके घटपटादीनां व्यावृत्तिबुद्धिराकारवैषम्यादिना भवति, न तथा परमाणुषु ; तत्र रूपरसादिगुणोदैरकरूप्यात् कृशत्वस्थूलत्वाद्यभावात् अनाश्रितानां तेषामाश्रयवैलक्षण्यस्यापि दुर्वचत्वात् । अतस्तत्र पारस्परिकव्यावृत्तिबोधो यस्माद्भवति , स कश्चिदतिरिक्तः प्रतिपरमाणु भिन्नो विशेषकत्वेनैव सिद्ध्यन् विशेष इत्युच्यते । ननु विशेषेषु परस्परव्यावृत्तिज्ञानं कथमिति चेत्, अनवस्थाभयात्ते परं स्वात्मनैव स्वव्यावर्तका इष्यन्त इति स्वतो व्यावृत्ता इति । गन्धवत्त्वादेरपि पृथिव्यादौ व्यावृत्त्यनुमितिजनकत्वादतिव्याप्तिरिति परमाणुविशेष्यकेति । परमाणुः स्पर्शवान् स्पर्शवत्समवायिकारणत्वादित्यत्र हेतोः परमाणुविशेष्यकानुमितिजनकत्वात्तत्र हेतावतिव्याप्तिरिति परस्परव्यावृत्तीति । पूर्वं ग्रन्थारम्भे नित्यद्रव्यवृत्तय इत्युक्तिर्नित्यद्रव्याणां परमाणूनामनन्तत्वात् विशेषाणामनन्तत्वमिति बोधनार्थम् ; अधुना तु लक्षणे परमाणुविशेष्यकत्वरूपविशेषणलाभार्थम् । नित्येति । नित्यत्वे सति सम्बन्धत्वं लक्षणम् । संयोगसम्बन्धवारणायाद्यम् । गगनादिवारणायान्त्यम् । यु-मिश्रणामिश्रणयोरिति युतौ अमिश्रितौ सिद्धौ युतसिद्धौ पृथक्सिद्धावित्यर्थः । अयुतसिद्धावपृथक्सिद्धौ सम्बद्धावेव सिद्धाविति व्युत्पत्तिलभ्यमयुतसिद्धशब्दार्थमाह ययोरिति । ययोर्घटादिकपालाद्योः । एकं घटादि । अपराश्रितं अन्या-

मविनश्यदवस्थमपराश्रितमेवावतिष्ठते तावयुतसिद्धौ। यथा, अवयवावयविनौ गुणगुणिनौ क्रियाक्रियावन्तौ जातिव्यक्ती विशेषनित्यद्रव्ये चेति।

श्रितं कपालादिनिष्ठम्। ययोरिति षष्ठ्यर्थ आधेयत्वम्। मध्यशब्दार्थो घटितत्वम्। निरूपकत्वं सप्तम्यर्थ एकापरपदार्थान्वयि। अविनश्यदवस्थम् विनश्यतोऽवस्था यस्य तद्विनश्यदवस्थम्। विनश्यदिति वर्तमानसामीप्ये वर्तमाननिर्देशः। तथा चाव्यवहितोत्तरक्षणावच्छिन्ननाशप्रतियोगिना याऽवस्था दशा यावत्स्वनाशकारणसामग्रीमिलितत्वं नाशोत्पत्त्यव्यवहितपूर्वक्षणवृत्तित्वं वा तद्विशिष्टम्। एवं च स्वनाशोत्पत्त्यव्यवहितपूर्वक्षणावच्छिन्नं विनश्यदवस्थम्। तद्भिन्नमविनश्यदवस्थम्। एवकारार्थो व्यापकत्वम्। अविनश्यदवस्थैकनिष्ठसत्ताव्यापकत्वं अपराश्रितस्य तादात्म्यसम्बन्धेन। तथा च ययोर्मध्येविनश्यदवस्थैकनिष्ठसत्ताव्यापकापराश्रितनिष्ठसत्तावदविनश्यदवस्थमेकम्, तावयुतसिद्धाविति बोधः। इत्थं च स्व, स्वनाशाव्यवहितप्राक्क्षणीयभिन्नस्वसत्ताव्यापकस्वनिष्ठाधेयतानिरूपकोभयमयुतसिद्धमिति। घटनाशाव्यवहितपूर्वक्षणीयभिन्ना तदितरक्षणनिरूपिता या घटसत्ता, तद्व्यापिकैव घटस्य कपालनिरूपिताधेयतेति तदुभयमयुतसिद्धम्। अत्र व्याप्यव्यापकभावः कालिकसम्बन्धेन। आश्रयनाशाद्घटनाशस्याङ्गीकर्तव्यतयाऽऽश्रयभूतकपालनाशकालेऽपि घटसत्ताऽस्ति, तत्र च न कपालनिष्ठेतेति व्यापकत्वभङ्ग इति स्वनाशाव्यवहितपूर्वक्षणीयभिन्नत्वनिवेशः। नन्वाश्रयनाशानन्तरमसमवायिकारणनाशस्ततो घटनाश इत्येव सिद्धान्त इति घटनाशाव्यवहितपूर्वक्षणीयाभिन्ना घटसत्ता आश्रयनाशकालिकसत्ताऽपि भवति? तत्र कपालसत्ता नास्तीति व्यापकत्वभङ्ग इति चेन्न, अव्यवहितपूर्वक्षणेत्यनेन तादृशक्षणद्वयमपि विवक्षितमित्यदोषात्। ननु जातिव्यक्त्यादिष्वयुतसिद्धत्वं न सिद्ध्यति, तत्र स्वपदेन जातिपरिग्रहे तन्ना-

शाप्रसिद्ध्या लक्षणसङ्गमनासम्भवात् । तथा जात्यादिसत्ताव्यापकत्वमपि घटादिनिरूपिताधेयतायां न भवति । जात्यादेः सर्वदा सत्त्वात् कस्यापि घटस्य तावत्कालवृत्तित्वाभावादिति चेन्न ; विनाश्याधेयघटितायुतसिद्धयो-रेवेदं लक्षणम् । नित्याधेयघटितायुतसिद्धयोऽस्तु, स्व, स्वसत्ताव्यापक-स्वनिष्ठाधिकरणतानिरूपकोभयत्वमेव लक्षणम् । यदा घटसत्ता तदा घट-निष्ठा घटत्वादिजातिनिरूपिताधिकरणतेति समन्वयः । तथा च तादृशो-भयत्वैतादृशोभयत्वान्यतरवत्त्वमयुतसिद्धत्वम् । अथ वा नाशाव्यवहितप्रा-क्क्षणीयत्वसम्बन्धेन स्वाभाववत्स्वसत्ताव्यापकस्वनिष्ठाधेयत्वाधिकरणत्वान्यतर-निरूपकं यत् यच्च स्वं तदुभयत्वमयुतसिद्धत्वम् । स्वपदेनाधिकरणग्रहणा-त्तन्निष्ठाधिकरणतानिरूपकजातेस्तस्य चायुतसिद्धत्वम् । स्वपदेनाधेयग्रहणा-त्तन्निष्ठाधेयतानिरूपककपालस्य तस्य चायुतसिद्धत्वम् । परमाणुतद्विशेषयो-र्लक्षणसमन्वये च नाशेत्यादिव्यधिकरणसम्बन्ध इति । अत्र चाधेयताधिक-रणता च कालिकसम्बन्धानवच्छिन्ना ग्राह्या । तेन रूपादेर्महाकालस्य च कालिकसम्बन्धेन सम्बद्धयोरपि नायुतसिद्धत्वम् । न चेश्वरज्ञाने विषयि-तासम्बन्धेन सर्वस्य सत्त्वात् सर्वस्य तस्य चायुतसिद्धत्वापत्तिरिति वाच्यम् ; विषयितासम्बन्धस्य वृत्त्यनियामकतया लक्षणघटकमुख्याधाराधेयभावस्य त-त्राभावात् । ननु सामान्यत्वविशेषत्वसमवायत्वादीनां तत्तदाश्रयाणां चायुतसिद्धत्वात् तत्रापि समवायसम्बन्धः स्यादिति चेन्न । सप्तपदा-र्थातिरिक्तपदार्थानङ्गीकारात् सामान्यत्वादीनां धर्म्यपेक्षयाऽतिरिक्तत्वाभावा-त सर्वथा तत्र परस्परं मुख्याधाराधेयभावास्वीकारेणायुतसिद्धत्वस्यैवानुपगमे-न तत्र समवायसम्बन्धाप्रसक्तेः । **तावयुतसिद्धाविति** । सिद्धिर्नामा-विनश्यदवस्थीया सत्ता । अयुतत्वं चाधेयत्वाधिकरणत्वान्यतरनिरूपकत्व-म् । मिश्रितसिद्धावित्यनुक्त्वा अयुतसिद्धावित्यनेन नामिश्रितसिद्धाविति

अनादिः सान्तः प्रागभावः । उत्पत्तेः पूर्वं कार्यस्य ।

सादिरनन्तः प्रध्वंसाभावः । उत्पत्तेरनन्तरं कार्यस्य ।

त्रैकालिकसंसर्गाभावोऽत्यन्ताभावः । यथा, भूतले घटो नास्तीति । तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावोऽन्योन्याभावः यथा, घटः पटो न भवतीति ।

नन्द्वयार्थवचनं लक्षणघटकव्यापकत्वज्ञापनायेति भावः । यद्यप्येकमिति क्लीबनिर्देशानुसारेण 'ते अयुतसिद्धे' इति वक्तुं युक्तम्, अथापि पटाद्यभिप्रायेण पुंल्लिङ्गोक्तिः ।

अन्तिमं पदार्थं निरूपयति **अनादिरि**त्यादिना । **आदिः** कारणम् , अथ वाऽऽरम्भ उत्पत्तिरिति यावत् । **सान्त** इत्यन्तो ध्वंसः । साहित्यं प्रतियोगितासम्बन्धेन । तथा चोत्पत्त्यभाववत्त्वे सति ध्वंसप्रतियोगित्वं प्रागभावलक्षणम् । घटगगनवारणाय दलद्वयम् । **कार्यस्ये**ति । अभाव इति शेषः । **सादिः** उत्पत्त्याश्रयः । **अनन्तः** ध्वंसाप्रतियोगी । न च ध्वंसलक्षणे ध्वंसप्रवेश आत्माश्रय इति वाच्यम्, उत्तरदलस्य लक्षणाघटकत्वात् । उत्पत्त्याश्रयत्वे सत्यभावत्वमित्येव लक्षणे तात्पर्यात् । घटादिवारणाय द्वितीयदलम् । **त्रैकालिकः** त्रिषु कालेषु वर्तत इति । कालत्रयवर्तित्वं प्रागभावेऽप्यास्ति ; श्वो जनिष्यमाणस्य घटस्य प्रागभावो वर्तमानक्षणे तत्पूर्वकाल उत्तरकाले चास्तीति । अतः कालिकसम्बन्धेन कालत्वव्यापकत्वं वक्तव्यम् । अथ वा प्रागभावाप्रतियोगित्वे सति ध्वंसाप्रतियोगित्वं तत् । **संसर्गाभाव** इत्यन्योन्याभावभिन्नाभावे परिभाषा । तथा च तादात्म्यसम्बन्धानवच्छिन्नप्रतियोगिताकाभावत्वं संसर्गाभावत्वम् । तादात्म्यसम्बन्धातिरिक्तसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वमत्यन्ताभावस्य लक्षणम् । ध्वंसप्रागभावयोः सम्बन्धावच्छिन्नप्रतियोगिताकत्वं नाङ्गीक्रियते । इतीति, उक्तशब्दगम्य इत्यर्थः ।

सर्वेषामपि पदार्थानामुक्तेष्वेवान्तर्भावात् सप्तैव पदार्था इति सिद्धम् ।

काणादन्यायमतयोर्बालव्युत्पत्तिसिद्धये ।
अन्नम्भट्टेन विदुषा रचितस्तर्कसंग्रहः ॥

इति तर्कसंग्रहः समाप्तः ।

एवं सप्त पदार्था विभज्य संग्रहेण निरूपिताः । अथ शक्त्यादिरन्यैः पार्थक्येन स्वीकृतोऽपि यथायथमत्रैवान्तर्भवति , एवं न्यायदर्शनोक्ताः षोडश पदार्था अपीति न सप्तधा विभजनमयुक्तमित्याह **सर्वेषामिति** । **अन्तर्भावो** घटकत्वमसाधारणधर्मवत्त्वम् । उक्तवृत्त्यसाधारणधर्मवत्त्वात् । **इतीति** । उक्तानुपूर्व्यवच्छिन्नशब्दप्रमेयमित्यर्थः । **सिद्धमबाधितम्** । ज्ञानज्ञाप्यत्वमन्तर्भावादिति पञ्चम्यर्थः । अथ वा **सिद्धमबाधितत्वप्रकारकानुमितिविषयः** । तदा पञ्चम्यर्थोऽनुमित्यन्वयि प्रयोज्यत्वम् । यद्वा **सप्तैव पदार्था इतीति** । एतदानुपूर्वीकवाक्यमित्यर्थः । **सिद्धमबाधितार्थकम्** । पञ्चम्यर्थो ज्ञानज्ञाप्यत्वम् । तथा च सप्तैव पदार्था इति वाक्यमबाधितार्थकं पदार्थत्वव्यापकस्वप्रतिपाद्यार्थघटकताकत्वादित्यनुमानम् ।

नन्विदं किं कणाददर्शनमनुरुध्य, किं वा गौतमदर्शनं ? नाद्यः, तत्र प्रत्यक्षमनुमानमिति प्रमाणद्वयमेव न्यरूपि । शब्दोपमानयोश्चानुमान एवान्तर्भावोऽभिसंहितः । अत्र पुनस्तयोः पार्थक्यं प्रादर्शीति विरोधात् । नान्त्यः, तत्र सप्तानां पदार्थानां निरूपणक्रमानुपलम्भादित्युभयदर्शिनामाशङ्कां परिहरन् ग्रन्थं समापयति **काणादेति** । काणादे न्यायमते च । व्युत्पत्तावेतदन्वयः । व्युत्पत्तिश्शब्दार्थज्ञानम् । **सिद्धये** निष्पत्तये । उद्दे-

श्यत्वं चतुर्थ्यर्थो रचनान्वयि । अन्नम्भट्टेनेति तृतीयार्थः कर्तृत्वम् । तथा च बालसमवेतकाणादन्यायमतविषयकज्ञानोत्पत्त्युद्देश्यकविद्वदभिन्नान्नम्भट्टनिष्ठकृतिजन्यरचनाजन्यफलाश्रयस्तर्कसंग्रह इति बोधः । अयं भावः—ग्रन्थोऽयं न केवलं कणादमतमनुसृत्य, न वा केवलं न्यायमतम् । कणादो महर्षिः प्रमेयस्य निरूपण एवैदम्पर्यमुवाह ; गौतमश्च महर्षिः प्रमाणस्य । प्रथमः स्वयमतत्परतया शब्दोपमानयोरुपमानस्यात्यन्तोपयोगविरहमाकलयमानो न तन्निरूपयत् । शब्दस्य चानुमानादपार्थक्येऽपि न कथञ्चिदाम्नायप्रामाण्याद्यभीष्टविहतिप्रसक्तिरित्यभिसन्धाय न तदतिरेकसाधने प्रावर्तिष्ट । अनन्तरः पुनःप्रमाणविवेचनव्यग्रो वस्तुतत्त्वव्युत्पिपादयिषया शब्दोपमानयोः प्रमाणान्तरतां प्रादर्शयत् । सप्तधा पदार्थविभजनमनिष्टममन्वानोऽप्यनुमानप्रमाणं सप्रपञ्चं बुबोधयिषुस्तदर्थे षोडशधा पदार्थान् पर्यजगणतेति न सर्वथा विरोधप्रदर्शने यतितव्यम् । दृश्यते च परस्परसिद्धानामर्थानामुपजीवनं प्रायश उभयोरपि । तदिदमुभयं समानतन्त्रमेवेति व्याख्यातारस्तत्तदुक्तोपपन्नप्रमाणप्रमेयग्रहणेनैकतन्त्र्यमेवोभयोः समपीपदन्निति, तदनुरुध्य ग्रन्थोऽयं प्राणीयतेति नात्र मात्रयाऽपि विदुषः प्रबन्धे प्रामादिकं मन्तव्यम् । अपि तु विश्वस्य यथोक्तमुपपन्नमध्यवसाय सर्वदर्शनोपयोगीदं समादर्तव्यमिति ।

श्रीमत्कस्तूरिरङ्गार्यप्रसिद्धाचार्यशिष्यतः ।
स्वच्छन्दश्रीनिवासार्यगुरोः प्रज्ञादयानिधेः ॥ १ ॥

अधीततर्कशास्त्रो यः शिरोमणिरिति श्रुतः ।
यो मीमांसासुधास्वादं बालप्रौढमनोहरम् ॥ २ ॥

व्याख्यानमापदेवीयप्रकाशस्य प्रणीतवान् ।
वेदान्ते च कृतीः काश्चिदन्यदप्युपकारकम् ॥ ३ ॥

वीरराघवसंज्ञेन वात्स्येनै
तर्कार्णवेन 'सौकर्यं स

'वर्धतां पठतामत्र व्युत्प
वहता विहिता सेयं तर्कस

अयमञ्जनशैलशृङ्गधामा गुणधामाऽञ्ज
परितुष्यति पद्मया किमन्यैरथ वा तोषय

श्रीरस्तु ॥